इसी प्रकार से धर्म, वीर, वेद, वृक्ष, सूर्य, सागर, स्तंभ, बाण, मृग, राघव, मास, पक्ष, शिव, शैल, गुह्यक, त्रास, गण्डक, कट, पाट, नाग, शंकर, घट और पट आदि शब्दों के रूप चलते हैं।

पूर्व और पर के मिलने से अर्थ की उपलब्धि होने पर उसे 'पद' संज्ञा होती है॥१५१॥

पूर्व और पर का क्या अर्थ है? प्रकृति और विभक्ति को पूर्व और पर कहते हैं। प्रकृति किसे कहते हैं? वृक्षादि शब्द और भू आदि धातु प्रकृति कहलाते हैं। विभक्ति किसे कहते हैं? सि आदि विभक्तियाँ और ति, तस् आदि प्रत्यय विभक्ति कहलाते हैं।

इन प्रकृति और विभक्ति के मिलने पर जो रूप बनता है उससे अर्थ का बोध होता है। अतः इस समुदाय का नाम 'पद' है जैसे यहाँ 'पुरुष' यह पद है। इस प्रकार से सर्वत्र विभक्ति हैं अन्त में जिनके ऐसे शब्दों को पद संज्ञा होती है। अर्थात् पुरुष शब्द को लिंग संज्ञा थी जब उसमें विभक्तियाँ लग गईं तब उन्हें पद संज्ञा हो गई।

सर्वशब्द सर्वनाम संज्ञक है अतः उसमें कुछ विशेषता है।

सर्व + सि = सर्वः, सर्व + औ = सर्वौ।

सर्व + जस् है—'जसि सर्वनाम्नः' यह सूत्र अनुवृत्ति में चला आ रहा है।

यहाँ सूत्र लगा जः सर्व इः अकारांत सर्वनाम से परे जस् को 'इ' हो जाता है॥१५२॥

सर्व + इ—संधि होकर = सर्वे बना।

सम्बोधन में—हे सर्व, हे सर्वौ, हे सर्वे। द्वितीया, तृतीया में भी अन्तर नहीं है।

सर्व + ङे है।

---

१. जस्—शब्दस्य प्रथमैकवचनम्।

स्मै सर्वनाम्नः ॥१५३॥

अकारान्तात्सर्वनाम्नः परो ङे स्मै भवति। सर्वस्मै। सर्वाभ्यां। सर्वेभ्यः॥ ङसौ।

ङसिः स्मात्॥१५४॥

अकारान्तात्सर्वनाम्नः परो ङसि स्माद् भवति। सर्वस्मात्। सर्वाभ्याम्। सर्वेभ्यः। सर्वस्य। सर्वयोः।

सुरामि सर्वतः॥१५५॥

सर्वनाम्नः परः सुरागमो भवत्यामि परे। धुटि एत्वम्। नामिकरपरेत्यादिना षत्वम्। सर्वेषाम्। ङौ।

ङिः स्मिन्॥१५६॥

अकारान्तात्सर्वनाम्नः परो ङिः स्मिन् भवति। सर्वस्मिन्। सर्वयोः। सर्वेषु।। नीतकः—सर्व, सर्वौ, सर्वे। हे सर्व, हे सर्वौ, हे सर्वे। सर्वम्, सर्वौ, सर्वान्। सर्वेण, सर्वाभ्याम्, सर्वैः। सर्वस्मै, सर्वाभ्याम्, सर्वेभ्यः। सर्वस्मात्, सर्वाभ्याम्, सर्वेभ्यः। सर्वस्य, सर्वयोः, सर्वेषाम्। सर्वस्मिन्, सर्वयोः, सर्वेषु। किं तत्सर्वनाम्। सर्व विश्व उभ उभय अन्य अन्यतर इतर इतम कतर कतम यतर यतम ततर ततम एकतर एकतम (एते डतरडतमप्रत्ययान्ताः। वृत्[1]।) त्व नेम सम सिम पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर ([1]वृत्।) त्यद् तद् यद् अदस् इदम् एतद् किम् एक द्वि (वृत्[1]) युष्मद् अस्मद् भवत् इति सर्वादि। अल्पशब्दस्य तु भेदः। अल्पः। अल्पौ। जसि।

अकारांत सर्वनाम से परे ङे को 'स्मै' हो जाता है ॥१५३॥

सब सर्वस्मै बना। सर्वाभ्याम्, सर्वेभ्यः।

सर्व + ङसि—

ङसि को स्मात् होता है ॥१५४॥

अकारांत सर्वनाम से परे ङसि को स्मात् हो जाता है। तो सर्वस्मात् ..... सर्वयोः।

सर्व + आम्

सर्वनाम से परे आम् विभक्ति के आने पर 'सु' का आगम होता है ॥१५५॥

'धुटि बहुत्वे त्वे' से ए होकर सर्वे + साम् बना "नामिकरपरः" इत्यादि से स् को ष् होकर सर्वेषाम् बन गया।

सर्व + ङि

ङि को स्मिन् होता है ॥१५६॥

अकारांत सर्वनाम से परे ङि को स्मिन् आदेश हो जाता है। तो सर्वस्मिन् बना।

अब इसका पूरा रूप देखिये—

सर्वः	सर्वौ	सर्वे	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
हे सर्व।	हे सर्वौ।	हे सर्वे।	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
सर्वम्	सर्वौ	सर्वान्	सर्वस्य	सर्वयोः	सर्वेषाम्
सर्वेण	सर्वाभ्याम्	सर्वैः	सर्वस्मिन्	सर्वयोः	सर्वेषु

ये सर्वनाम कौन-कौन हैं ?

सर्व, विश्व, उभ, उभय, अन्य, अन्यतर, इतर, इतम्, कतर, कतम, यतर, यतम, ततर, ततम एकतर, एकतम। इनमें अन्यतर से लेकर एकतम तक शब्द उतर, उतम प्रत्यय से बने हैं। त्व, नेम, अम्, सिम,

अल्पादेर्वा ॥१५७॥

अल्पादेर्गणात्परो जस् सर्व इर्भवति वा। अल्पे, अल्पाः। अन्यत्र पुरुषशब्दवत्। कोऽल्पादिर्गणः। अल्प प्रथम चरम त्रितय द्वितय द्वय त्रय (ऐते तयअयप्रत्ययान्ताः) कतिपय नेम अर्द्ध पूर्व पर अवर दक्षिण उत्तर अपर अधर एव अन्तर (वृत्[1]) इति अल्पादिः। पूर्वशब्दस्य तु भेदः। पूर्वः। पूर्वौ। पूर्वे। पूर्वाः। हे पूर्व। हे पूर्वौ। हे पूर्वे, हे पूर्वाः। पूर्वम्। पूर्वौ। पूर्वान्। पूर्वेण। पूर्वाभ्याम्। पूर्वैः। पूर्वस्मै। पूर्वाभ्याम्। पूर्वेभ्यः। ङसिङ्योः

विभाष्येते पूर्वादेः ॥१५८॥

पूर्वादिर्गणात्परयोर्ङसिङ्योः स्मात्स्मिनौ विभाष्येते[2]। पूर्वस्मात्, पूर्वात्, पूर्वाभ्याम्। पूर्वेभ्यः। पूर्वस्य। पूर्वयोः। पूर्वेषाम्। ङौ तथैव विकल्पः। पूर्वस्मिन्, पूर्वे। पूर्वयोः। पूर्वेषु। कः पूर्वादिः। प्रागेवोक्तः। इत्यकारान्ताः। आकारान्तः पुल्लिङ्गः क्षीरपाशब्दः। ततः स्याद्युत्पत्तिः। सौ। क्षीरपाः। क्षीरपौ क्षीरपाः। सम्बुद्धावविशेषः। क्षीरपाम्। क्षीरपौ। शसादौ तु विशेषः।

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अंतर, त्यद्, तद्, अदस्, इदम्, एतद्, किम् एक द्वि युष्मद् अस्मद् भवत्। ये सब सर्वनाम कहलाते हैं।

अल्प शब्द में कुछ भेद हैं— अल्पः, अल्पौ—अल्प + जस् है।

अल्प आदि गण से परे जस् को 'इ' विकल्प से होता है ॥१५७॥

अल्पे बना और एक बार 'जसि' सूत्र से अकार को दीर्घ होकर और संधि की एवं स् को विसर्ग होकर अल्पाः बना। बाकी सभी रूप पुरुष के समान हैं।

अल्पादि गण में कौन-कौन-से आते हैं ?

अल्प, प्रथम, चरम, त्रितय, द्वितय, द्वय, त्रय ये चार रूप तय और अय प्रत्यय से बनते हैं। कतिपय, नेम, अर्द्ध, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व और अंतर ये अल्पादि गण हैं।

पूर्व शब्द में भी भेद हैं।

इसमें भी जस् में दो रूप बनते हैं। ये पूर्वादि शब्द सर्वनाम में हैं। जिनमें अंतर है उनके रूप—

पूर्व + ङसि, पूर्व + ङि

पूर्व आदि गण से परे ङसि और ङि को विकल्प से स्मात् और स्मिन् आदेश होता है ॥१५८॥ पूर्वस्मात्, पूर्वात्, पूर्वस्मिन् पूर्वे।

पूर्वः	पूर्वौ	पूर्वे, पूर्वाः	पूर्वस्मै	पूर्वाभ्याम्	पूर्वेभ्यः
हे पूर्व !	हे पूर्वौ !	हे पूर्वे, पूर्वाः !	पूर्वस्मात्, पूर्वात्	पूर्वाभ्याम्	पूर्वेभ्यः
पूर्वम्	पूर्वौ	पूर्वान्	पूर्वस्य	पूर्वयोः	पूर्वेषाम्
पूर्वेण	पूर्वाभ्याम्	पूर्वैः	पूर्वस्मिन्, पूर्वे	पूर्वयोः	पूर्वेषु

पूर्वादिगण क्या है ? पहले ही बता दिया है अर्थात् पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व और अंतर।

इस प्रकार से अकारांत शब्दों का प्रकरण हुआ। अब आकारांत पुल्लिग शब्दों मे क्षीरपा शब्द आता है। और क्षीरपा से परे सि आदि विभक्तियाँ आती हैं।

क्षीरपा + सि = क्षीरपाः, क्षीरपा + औ = क्षीरपौ, क्षीरपा + जस् = क्षीरपाः। संबोधन में भी ये ही रूप बनेंगे। शस् आदि विभक्ति के आने पर कुछ विशेषता है। क्षीरपा + शस्।

---

१. समाप्तिद्योतको वृच्छब्द इति॥ २. 'ङसि स्मात्' 'ङि स्मिन्' इति सूत्रद्वयमनुवर्त्तते।

पञ्चादौ घुट् ॥१५९॥

स्यादीनामादौ पञ्चवचनानि घुट्संज्ञानि भवन्ति।

आधातोरघुट्स्वरे ॥१६०॥

धातोराकारस्य लोपो भवति अघुट्स्वरे परे। धातोरिति किम्। शन्तृङन्तक्विबन्तौ धातुत्वं न त्यजत इति। एतदुपलक्षणम्। उपलक्षणं किं? स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणं। तेन विजन्तमपि धातुत्वं न जहाति। क्षीरपः। क्षीरपा। क्षीरपाभ्याम्। क्षीरपाभिः। क्षीरपे। क्षीरपाभ्याम्। क्षीरपाभ्यः। क्षीरपः। क्षीरपाभ्याम्। क्षीरपाभ्यः। क्षीरपः। क्षीरपोः। क्षीरपाम्। क्षीरपि। क्षीरपोः। क्षीरपासु। एवं सोमपा सीधुपा कौलालपा सौवीरपा मण्डपा अग्रेगा विवस्वा अब्जजा उदधिका [1]हाहा पुरोगादयः। इत्याकारान्ताः। इकारान्तः पुल्लिङ्गे मुनिशब्दः। ततः स्याद्युत्पत्तिः। सौ। मुनिः। द्वित्वे।

इदुदग्निः ॥१६१॥

सि आदि विभक्तियों में आदि की पाँच विभक्तियाँ 'घुट' संज्ञक हैं ॥१५९॥

इस सूत्र से सि औ जस् अम् औ को घुट संज्ञा हो गई। बाकी सब अघुट् हैं। इन अघुट् में शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् ये नव विभक्तियाँ स्वर वाली हैं।

एवं भ्याम् भिस् भ्याम् भ्यस् भ्याम् भ्यस् और सुप् ये ७ विभक्तियाँ व्यंजन वाली हैं।

अघुट् स्वर वाली विभक्तियों के आने पर धातु के आकार का लोप हो जाता है ॥१६०॥

यहाँ धातु के आकार ऐसा क्यों कहा ? यहाँ क्षीरं पिबतीति क्षीरपा इस प्रकार से क्षीर शब्द से पा धातु आकर कृदंत में क्विप् प्रत्यय हुआ है और क्विप् का सर्वापहारी लोप हो गया है, फिर भी शतृङ् प्रत्यय जिसके अंत में है एवं क्विप् जिनमें अंत में है ऐसे शब्द लिंग संज्ञक हो गये हैं फिर भी अपने धातुपने को नहीं छोड़ते हैं। यह कथन यहाँ उपलक्षण मात्र है। उपलक्षण किसे कहते हैं ? अपने और अपने सदृश को ग्रहण करने वाले को उपलक्षण कहते हैं। उससे 'क्विच्' प्रत्यय भी जिनके अंत में है ऐसे शब्द भी धातुपने को नहीं छोड़ते हैं ऐसा समझना चाहिए। अब यहाँ क्षीरपा + अस् में क्षीरपा के आ का लोप होकर क्षीरप् + अस् = क्षीरपः बन गया।

क्षीरपा + टा, क्षीरप् + आ = क्षीरपा, क्षीरपाभ्याम्, क्षीरपा + ङे, क्षीरप् + = क्षीरपे।

क्षीरपा + ङसि = क्षीरपः, क्षीरपा + ङस् = क्षीरपः, क्षीरपा + ओस् = क्षीरपोः, क्षीरपा + आम् = क्षीरपाम्, क्षीरपा + ङि = क्षीरपि इत्यादि व्यंजन वाली विभक्तियों के आने पर कुछ भी अंतर नहीं होता है।

क्षीरपाः	क्षीरपौ	क्षीरपाः	क्षीरपे	क्षीरपाभ्याम्	क्षीरपाभ्यः
हे क्षीरपाः !	हे क्षीरपौ !	हे क्षीरपाः !	क्षीरपः	क्षीरपाभ्याम्	क्षीरपाभ्यः
क्षीरपाम्	क्षीरपौ	क्षीरपः	क्षीरपः	क्षीरपोः	क्षीरपाम्
क्षीरपा	क्षीरपाभ्याम्	क्षीरपाभिः	क्षीरपि	क्षीरपोः	क्षीरपासु

इसी प्रकार से आकारांत सोमपा, सीधुपा, कौलालपा, सौवीरपा, मंडपा, अग्रेगा, विवस्वा अब्जजा उदधिका, हाहा, पुरोगा आदि शब्द क्षीरपावत् ही चलते हैं।

इस प्रकार से आकारांत शब्दों के रूप हुए। अब इकारांत मुनि शब्द से सि आदि विभक्तियाँ आती हैं।

मुनि + सि = मुनिः। द्विवचन में—मुनि + औ

इकारांत और उकारांत लिंग को अग्नि संज्ञा हो जाती है ॥१६१॥

---

१. जहातीति हाहा इति व्युत्पत्तिपक्षे, न तु गन्धर्ववाचीति पक्षे।

इकारान्तमुकारान्तञ्च लिङ्गं अग्निसंज्ञं भवति । तपरकरणमसन्देहार्थं ।

औकारः पूर्वं ॥१६२ ॥

अग्निसंज्ञकात्परं औकारः पूर्वस्वररूपमापद्यते । सन्धिः । मुनी । जसि ।

इरेदुरोज्जसि ॥१६३ ॥

अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति जसि परे । मुनयः ।

सम्बुद्धौ च ॥१६४ ॥

अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति सम्बुद्धौ परतः । प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायात् । हे मुने । हे मुनी । हे मुनयः ।

अग्नेरमोऽकारः ॥१६५ ॥

अग्निसंज्ञकात्परस्य अमोऽकारो लोपमापद्यते । मुनिम् । मुनी । शसादौ ।

शसोऽकारः सश्च नोऽस्त्रियाम् ॥१६६ ॥

अग्निसंज्ञकात्परस्य शसोऽकारः पूर्वस्वररूपमापद्यते सर्वत्र सस्य च नो भवत्यस्त्रियाम् । मुनीन् ।

सूत्र में इत् उत् में त् का प्रयोग क्यों किया है ? इस तकार का प्रयोग संदेह को दूर करने के लिए किया गया है । इ और उ से इवर्ण उवर्ण भी लिये जाते हैं और तकार से केवल ह्रस्व इकार और उकार ही लिए जाते हैं । अतः ह्रस्व इकारांत उकारांत ही अग्नि संज्ञक है ।

अग्नि संज्ञक से परे औ विभक्ति पूर्व स्वर रूप हो जाती है ॥१६२ ॥

मुनि + इ संधि होकर मुनी बन गया । मुनि + जस् ।

जस् के आने पर अग्नि संज्ञक इ को ए और उ को 'ओ' हो जाता है ॥१६३ ॥

मुन् ए + अस् । 'ए अय्' से संधि होकर मुनयः बन गया ।

संबोधन में मुनि + सि—'ह्रस्व नदी' इत्यादि सूत्र से सि का लोप हो गया ।

संबुद्धि संज्ञक सि से परे इ को ए और उ को ओ हो जाता है ॥१६४ ॥

हे मुने ! बना ।

मुनि + अम्

अग्नि संज्ञक से परे अम् के अकार का लोप हो जाता है ॥१६५ ॥

मुनिम् मुनी ।

मुनि + शस्

शस् के अकार को पूर्व स्वर रूप और अस्त्रीलिंग में स् को न् हो जाता है ॥१६६ ॥

अग्नि संज्ञक से परे शस् का 'अ' पूर्व स्वर रूप हो जाता है और स्त्रीलिंग को छोड़कर पुल्लिंग और नपुंसकलिंग में श् को न् हो जाता है । तो

मुनि + इन् = मुनीन् बन गया ।

मुनि + टा

अस्त्रियां टा ना ॥१६७॥

अग्निसंज्ञकात्परस्य टा ना भवत्यस्त्रियाम्। मुनिना। मुनिभ्यां। मुनिभिः। ङयि।

ङे ॥१६८॥

अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति ङयि परे। मुनये। मुनिभ्यां। मुनिभ्यः।

ङसिङसोरलोपश्च ॥१६९॥

अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति ङसिङसोः परतः तयोरकारश्च लोप्यो भवति। मुनेः। मुनिभ्याम्। मुनिभ्यः। मुनेः। मुन्योः। आमि नुरागमः।

दीर्घमामि सनौ ॥१७०॥ -१५२

नाम्यन्तं लिङ्गं दीर्घमापद्यते सनावामि परे। मुनीनाम्।

ङिरौ सपूर्वः ॥१७१॥

अग्निसंज्ञकात्परो ङिः पूर्वस्वरेण सह और्भवति। मुनौ। मुन्योः। मुनिषु। एवमग्नि गिरि रवि ऋषि यति कवि विधि राशि शीतरश्मि शालि दानवारि दैत्यारि सौरि सूरि विघ्नारि हेमाद्रि अद्रि हरि सारि अहि शकुनि पाकशासनि धूमयोनि पद्मयोनि अपांपति अतिथि ग्रन्थि पदाति मैत्रि बलि ध्वनि पाणि कपि अलि मणि जलधि अब्धि पयोधि निधि उपाधि नीरधि व्याधि शेवध्यादयः॥ द्विशब्दस्य तु भेदः। तस्य द्व्यर्थवाचित्वात् द्विवचनमेव भवति। द्वि औ अति स्थिते।

अग्नि संज्ञक से परे स्त्रीलिंग के सिवाय बाकी में टा विभक्ति को 'ना' आदेश हो जाता है ॥१६७॥

तो मुनिना बना। मुनि + भ्याम् = मुनिभ्याम्। मुनि + भिस् = मुनिभिः।

मुनि + ङे

अग्नि संज्ञक से परे ङे विभक्ति के आने पर इ को ए और उ को ओ हो जाता है ॥१६८॥

मुन् ए + ए 'ए अय्' सूत्र से संधि होकर मुनय् + ए = मुनये बना।

मुनि + ङसि, मुनि + ङस्

ङसि ङस् विभक्ति के आने पर अग्नि संज्ञक इ को ए और उ को ओ हो जाता है और ङसि ङस् के अकार का लोप हो जाता है ॥१६९॥

तब मुने + स्। स् को विसर्ग होकर मुनेः बन गया। मुनि + ओस् 'इवर्णे यम् सवर्णे' इस—४४वें सूत्र से संधि होकर मुन्योस्, स् का विसर्ग होकर मुन्योः बना।

मुनि + आम् "आमि च नुः" सूत्र से नु का आगम होकर मुनि + नाम् बना पुनः स् न् सहित आम् विभक्ति के आने पर नाम्यंत लिंग दीर्घ हो जाता है ॥१७०॥

तो मुनीनाम् बना।

मुनि + ङि

अग्नि संज्ञक से परे 'ङि' विभक्ति पूर्व स्वर के साथ ही 'औ' हो जाती है ॥१७१॥

मुन् इ + ङि मुन् औ = मुनौ बन गया। पुनः मुन्योः और नामिकरपरः इत्यादि सूत्र से नामि से परे स् को 'ष्' करके मुनिषु बन गया।

त्यदादीनामविभक्तौ ॥१७२॥

त्यदादीनामन्तः अकारो भवति विभक्तौ परतः। सन्धिः। द्वौ। द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः॥ त्रिशब्दस्य तु भेदः। तस्य बह्वर्थवाचित्वात् बहुवचनमेव भवति। त्रयः। हे त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रिभ्यः। आमि।

त्रेस्त्रयश्च ॥१७३॥

त्रिशब्दस्य त्रयादेशो भवति नुरागमश्चामि परे। त्रयाणाम्। त्रिषु। कतिशब्दस्य तु भेदः। तस्यापि बहुवचनमेव भवति।

कतेश्च जस्शसोर्लुक् ॥१७४॥

मुनिः	मुनी	मुनयः	मुनये	मुनिभ्याम्	मुनिभ्यः
हे मुने।	हे मुनी!	हे मुनयः।	मुनेः	मुनिभ्याम्	मुनिभ्यः
मुनिम्	मुनी	मुनीन्	मुनेः	मुन्योः	मुनीनाम्
मुनिना	मुनिभ्याम्	मुनिभिः	मुनौ	मुन्योः	मुनिषु

इसी प्रकार से अग्नि, गिरि, रवि आदि उपर्युक्त शेवधिपर्यन्त इकारांत शब्द मुनिवत् ही चलते हैं।

द्विशब्द में कुछ भेद हैं और वह द्विवचन में ही चलता है। अतः—

द्वि + औ है।

त्यद् आदि शब्दों के अन्त व्यंजन या स्वर को अकार हो जाता है, विभक्ति के आने पर ॥१७२॥

तब द्वि को द्व होकर द्व + औ संधि होकर = द्वौ बन गया। द्वि + भ्याम् है। सर्वत्र द्वि को द्व किया जाता है। पुनः "अकारो दीर्घ घोषवति" सूत्र से दीर्घ होकर द्वाभ्याम् ३ बन गया। द्वि + ओस् में भी द्व + ओस् 'ओसि च' सूत्र से ए होकर संधि होकर द्वयोः २ बन गया।

तो—

द्वौ। द्वौ। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः।

त्रिशब्द में भी कुछ भेद हैं तीन संख्या बहु अर्थवाची ही है अतः विभक्ति भी बहुवचन की ही आती है तो त्रि + जस् है—सूत्र से अग्नि संज्ञा होकर 'इरेदुरोज्जसि'—सूत्र से ए होकर संधि होकर त्रयः बना। त्रि + शस् है मुनिवत् सब सूत्र लगकर त्रीन् बना।

त्रिभिः इत्यादि।

त्रि + आम्। आमि च नुः से नु का आगम होकर—

नु और आम् विभक्ति से परे 'त्रि' को त्रय आदेश हो जाता है ॥१७३॥

त्रय + नाम् दीर्घमामिसनौ से दीर्घ होकर न् को ण् होकर त्रयाणाम् बन जाता है। त्रि + सु स् को ष् होकर त्रिषु बन गया।

त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रिभ्यः। त्रयाणाम्। त्रिषु।

कति शब्द में भेद है यह कति शब्द भी बहुवचन में ही चलता है।

कति अर्थात् कितने।

कति + जस्

संख्यावाची शब्द से परे षकारांत नकारांत से परे और कति शब्द से परे जस् शस् विभक्ति को लुक् हो जाता है ॥१७४॥

संख्यायाः ष्णान्तायाः कतेश्च परयोर्जस्शसोर्लुग्भवति । (सर्वविधिभ्यो लोपविधिर्बलवान्) प्रत्ययलोपे प्रत्ययलक्षणमिति प्राप्ते सति ।

लुग्लोपे न प्रत्ययकृतम् ॥१७५ ॥

लुगिति लोपे सति प्रत्ययलोपे परे यत्कृतं कार्य्यं प्रकृतेस्तन्न भवति । इरेदुरोज्जसीत्येत्वं न भवति । कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु । सखिशब्दस्य तु भेदः । सावनन्तः इति वर्त्तते ।

सख्युश्च ॥१७६ ॥

सख्युरन्तोऽन् भवति असम्बुद्धौ सौ परे ।

घुटि चासम्बुद्धौ ॥१७७ ॥

नान्तस्य चोपधाया दीर्घो भवति असम्बुद्धौ घुटि परे ।

व्यञ्जनाच्च ॥१७८ ॥

व्यञ्जनाच्च परः सिर्लोपमाप्नुते ।

लिङ्गान्तनकारस्य ॥१७९ ॥

लिङ्गान्तनकारस्य लोपो भवति विरामे व्यञ्जनादौ च । सखा ।

[सभी विधि में लोप विधि बलवान् है]

यहाँ "प्रत्यय लोपे प्रत्यय लक्षणं" इस सूत्र से कुछ कार्य जिसमें गुण शस् में दीर्घ प्राप्त था उसे बाधित करने के लिए सूत्र लगता है ।

लुक् इस शब्द से प्रत्यय के लोप करने पर प्रत्यय के निमित्त से प्रकृति का जो कार्य होता था वह नहीं होगा ॥१७५ ॥

जैसे 'इसेदुरोज्जसि' सूत्र से यहाँ इ को ए प्राप्त था वह नहीं होगा क्योंकि लुक् शब्द से जस् शस् का लोप किया गया है । अतः जस् शस् का लोप होकर कति + जस् = कति ही रहा ।

कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु ।

सखि शब्द में कुछ भेद हैं ।

'सावनंत' यह सूत्र अनुवृत्ति में चला आ रहा है ।

सखि + सि है ।

संबोधन से रहित 'सि' विभक्ति के आने पर सखि शब्द के अंत 'इ' को अन् आदेश हो जाता है ॥१७६ ॥

तब सखन् + सि हो गया ।

असंबुद्धि घुट सि विभक्ति के आने पर नकार की उपधा को दीर्घ हो जाता है ॥१७७ ॥

तब सखान् + सि

व्यंजन से परे सि विभक्ति का लोप हो जाता है ॥१७८ ॥

विराम और व्यंजन के आने पर लिंगांत नकार का लोप हो जाता है ॥१७९ ॥

अतः सखा बना ।

सखि + औ है ।

घुटि त्वैः ॥१८० ॥

सख्युरन्तः ऐर्भवति असंबुद्धौ घुटि परे। सखायौ। सखायः। संबुद्धौ मुनिशब्दवत्। हे सखे। हे सखायौ। हे सखायः। सखायम्॥ सखायौ। शसि मुनिशब्दवत्। सखीन्। टादौ।

न सखिष्टादावग्निः ॥१८१ ॥

सखिशब्दष्टादौ स्वरे परे नाग्निर्भवति। सख्या। सखिभ्याम्। सखिभिः। सख्ये। सखिभ्याम्। सखिभ्यः॥

ङसिङसोरुमः ॥१८२ ॥

सखिपतिभ्यां परयोर्ङसिङसोरकारः उमापद्यते। सख्युः। सखिभ्याम्। सखिभ्यः। सख्युः। सख्योः। सखीनाम्॥

सखिपत्योर्ङिः ॥१८३ ॥

सखिपतिभ्यां परो ङिरेव और्भवति। पुनर्ङिग्रहणं किमर्थं। सपूर्वस्वरनिवृत्त्यर्थं॥ सख्यौ। सख्योः। सखिषु। एवं सुसखि अतिसखि असखि प्रभृतयः। पतिशब्दस्य तु भेदः। पतिः। पती। पतयः। हे पते। हे पती। हे पतयः। पतिम्। पती। पतीन्। टादौ।

घुट् विभक्ति के आने पर सखि शब्द के इ को 'ऐ' हो जाता है ॥१८० ॥

सखि के अंत इ को ऐ हो जाता है असंबुद्धि स्वर वाली घुट् विभक्ति के आने पर। तब सखै + औ 'ऐ आय्' से संधि होकर सखायौ, सखायः बना। संबोधन में मुनि शब्द के समान इ को ए होकर हे सखे बना।

सखि + शस् मुनिवत् अ को पूर्व स्वर और स् को न् होकर। संधि होकर सखीन् बन गया।

सखि + टा

टा आदि स्वर वाली विभक्तियों के आने पर सखि शब्द को अग्नि संज्ञा नहीं होती है ॥१८१ ॥

तब "इवर्णे यम सवर्णे" इत्यादि सूत्र से संधि होकर 'सख्या' बना। सखि + ङे = सख्ये बना।

सखि + ङसि सखि + ङस्

सखि और पति से परे ङसि और ङस् के अकार को उकार हो जाता है ॥१८२ ॥

तब सखि + उस् संधि होकर सख्युः बना। सखि + ङि।

सखि और पति से परे ङि को 'औ' हो जाता है ॥१८३ ॥

सूत्र में पुनः ङि शब्द क्यों ग्रहण किया ?

सूत्र में पूर्व स्वर सहित ङि को औ होता था। यहाँ मात्र ङि को ही औ होता है इस बात को स्पष्ट करने के लिए ही यहाँ पुनः 'ङि' शब्द को ग्रहण किया है।

सखि + औ = सख्यौ बना।

सखा	सखायौ	सखायः	सख्ये	सखिभ्याम्	सखिभ्यः
हे सखे !	हे सखायौ !	हे सखायः !	सख्युः	सखिभ्याम्	सखिभ्यः
सखायम्	सखायौ	सखीन्	सख्युः	सख्योः	सखीनाम्
सख्या	सखिभ्याम्	सखिभिः	सख्यौ	सख्योः	सखिषु

पति शब्द में टा आदि विभक्ति के आने पर कुछ भेद है।

पति + टा

पतिरसमासे ॥१८४॥

पतिशब्दोऽसमासे टादौ स्वरे परे नाग्निर्भवति। पत्या। पतिभ्याम्। पतिभिः। पत्ये। पतिभ्याम्। पतिभ्यः। पत्युः। पतिभ्याम्। पतिभ्यः। पत्युः। पत्योः। पतीनाम्। पत्यौ। पत्योः। पतिषु। भूपत्यादिशब्दानां समासत्वान्मुनिशब्दवत्। पन्थिशब्दस्य तु भेदः। पन्थि स् इति स्थिते। अम्शसोरा इति वर्त्तते।

पन्थिमन्थिऋभुक्षीणां सौ ॥१८५॥

पन्थ्यादीनामन्त आकारो भवति सौ परे। पन्थाः।

अनन्तो घुटि ॥१८६॥

पन्थ्यादीनामन्तोऽन् भवति घुटि परे। पन्थानौ। पन्थानः। सम्बोधनेऽपि तद्वत्। हे पन्थाः। हे पन्थानौ। हे पन्थानः। अग्नेरमोकार इति प्राप्ते। अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान्। अल्पाश्रितमन्तरङ्गम्। बह्वाश्रितं बहिरङ्गम्। पन्थानम्। पन्थानौ।

समान से रहित पति शब्द को टा आदि स्वर वाली विभक्ति के आने पर अग्नि संज्ञा नहीं होती है ॥१८४॥

अर्थात् घुट् विभक्ति में पति को अग्नि संज्ञा होकर मुनिवत् रूप बने हैं पुनः—

संधि होकर पत्या, पति + ङे = पत्ये बना।

पति + ङसि।

पूर्वोक्त १८२ सूत्र से ङसि ङस् के अ को उ होकर पत्युः बन गया।

पतिः	पती	पतयः	पत्ये	पतिभ्याम्	पतिभ्यः
हे पते !	हे पती !	हे पतयः !	पत्युः	पतिभ्याम्	पतिभ्यः
पतिम्	पती	पतीन्	पत्युः	पत्योः	पतीनाम्
पत्या	पतिभ्याम्	पतिभिः	पत्यौ	पत्योः	पतिषु

सूत्र में असमासे क्यों कहा ?

यहाँ पति शब्द अकेला है तो उपर्युक्त प्रकार से चलेगा और यदि भू, धन आदि शब्दों का पति के साथ समास हो जाए तो भूपति, धनपति आदि शब्द मुनि के समान चलते हैं।

पन्थि शब्द में कुछ भेद है।

पन्थि + सि

'अम् शसोरा' यह सूत्र अनुवृत्ति में चला आ रहा है।

पन्थि आदि शब्दों के अंत 'इ' को 'आ' हो जाता है सि विभक्ति के आने पर ॥१८५॥

पंथा + सि, स् का विसर्ग होकर पन्थाः बना।

पन्थि + औ।

पन्थि आदि शब्दों के अन्त को 'अन्' हो जाता है घुट् स्वर विभक्ति के आने पर ॥१८६॥

तब पन्थन् + औ बना 'घुटि च संबुद्धौ' १७७वें सूत्र से न् की उपधा को दीर्घ होकर पन्थानौ बना। संबोधन में भी इसी प्रकार से है।

अघुट्स्वरे लोपम् ॥१८७॥

पन्थ्यादीनामन्तो लोपमापद्यते अघुट्स्वरे परे।

व्यञ्जने चैषां निः ॥१८८॥

पन्थ्यादीनां नकारो लोपमापद्यते व्यञ्जने चाघुट्स्वरे परे। पथः। पथा। पथिभ्याम्। पथिभिः। पथे। पथिभ्याम्। पथिभ्यः। पथः। पथिभ्याम्। पथिभ्यः। पथः। पथोः। पथाम्। पथि। पथोः। पथिषु। एवं मन्थि ऋभुक्षि शब्दौ। इति इकारान्ताः। ईकारान्तः पुल्लिङ्गे यवक्री शब्दः। ततः स्याद्युत्पत्तिः। सौ— यवक्रीः। स्वरादौ। आधातोरिति वर्तमाने।

ईदूतोरियुवौ स्वरे ॥१८९॥

पन्थान् + अम् "अम्नेरमोकारः" इस सूत्र से अम् के अकार का लोप प्राप्त था, किंतु (अंतरंग और बहिरंग में अंतरंग विधि बलवान् होती है) इस नियम से यहाँ अंतरंग विधि बलवान् हो गई। अतः 'अ' का लोप नहीं हुआ। यहाँ अल्प के आश्रित को अंतरंग और बहुत के आश्रित को बहिरंग कहते हैं। अतः पन्थानम् बन गया।

पन्थि + शस् है।

अघुट् स्वर विभक्ति के आने पर पन्थि आदि के अंत 'इ' का लोप हो जाता है ॥१८७॥

पन्थ् + अस् रहा।

व्यंजन और अघुट् स्वर वाली विभक्तियों के आने पर पन्थ् आदि के नकार का लोप हो जाता है ॥१८८॥

पथ् + अस् विसर्ग होकर पथः बना।

पन्थि + भ्याम् १८८वें सूत्र से न का लोप होकर पथिभ्याम् बना।

पन्थि + टा १८७वें सूत्र से 'इ' का लोप एवं १८८वें सूत्र से 'न' का लोप होकर पथा बना।

पन्थाः	पन्थानौ	पन्थानः	पथे	पथिभ्याम्	पथिभिः
हे पन्थाः !	हे पन्थानौ !	हे पन्थानः !	पथः	पथिभ्याम्	पथिभ्यः
पन्थानम्	पन्थानौ	पथः	पथः	पथोः	पथाम्
पथा	पथिभ्याम्	पथिभिः	पथि	पथोः	पथिषु

इसी प्रकार से मन्थि और ऋभुक्षि के रूप चलते हैं जैसे—

मन्थाः	मन्थानौ	मन्थानः
ऋभुषाः	ऋभुक्षाणौ	ऋभुक्षाणः

इस प्रकार से इकारांत शब्द पूर्ण हुए। अब दीर्घ ईकारांत शब्द चलेंगे।

यवक्री + सि = यवक्रीः।

यवक्री + औ है।

'आधातोः' यह सूत्र अनुवृत्ति में चला आ रहा है।

स्वर वाली विभक्ति के आने पर धातु से ईत्, ऊत् को इय् उव् आदेश हो जाता है ॥१८९॥

धातोरीदूतोरियुवौ भवतो विभक्तिस्वरे परे। पुनः स्वरग्रहणं किमर्थम्। अघुट्स्वरनिवृत्त्यर्थम्। यवक्रियौ। यवक्रियः। सम्बोधनेऽपि तद्वत्। यवक्रियम्। यवक्रियौ। यवक्रियः। यवक्रिया। यवक्रीभ्याम्। यवक्रीभिः। इत्यादि। एवं सुश्रीनीप्रभृतयः। सेनानीशब्दस्य तु भेदः। सौ—सेनानीः। स्वरादावीदूतोरिति प्राप्ते।

अनेकाक्षरयोस्त्वसंयोगाद् य्वौ ॥१९०॥

अनेकाक्षरयोर्लिङ्गयोरसंयोगात्परयोरीदूताव्यौं भवतो विभक्तिस्वरे परे। सेनान्यौ। सेनान्यः। सम्बोधनेऽपि तद्वत्। सेनान्यम्। सेनान्यौ। सेनान्यः। सेनान्या। सेनानीभ्याम्। सेनानीभिः। सेनान्ये। सेनानीभ्याम्। सेनानीभ्यः। सेनानीभ्याम्। सेनानीभ्यः। सेनान्यः। सेनान्योः। सेनान्याम्॥ अनेकाक्षरयोरिति किं। नियौ। नियः। लुवौ। लुवः। असंयोगादिति किं॥ यवक्रियौ। कवप्रुवौ। डौ।

नियो ङिराम् ॥१९१॥

नियः परो ङिराम् भवति। सेनान्याम्। सेनान्योः। सेनानीषु। एवमग्रणीग्रामणीप्रभृतयः। सुधीशब्दस्य तु भेदः। सौ—सुधीः। स्वरादावनेकाक्षरयोरिति यत्वे प्राप्ते। ईदूतोरियुवौ स्वरे इति वर्तते।

यहाँ सूत्र में स्वर शब्द को पुनः क्यों ग्रहण किया है ? अघुट् स्वर की निवृत्ति के लिए पुनः स्वर का ग्रहण किया है क्योंकि घुट् अघुट् दोनों ही विभक्तियों के स्वरों में यह सूत्र लागू होता है।

यवक्री + औ—यवक्र् इय् + औ = यवक्रियौ। यवक्रियः बना। संबोधन में भी इसी प्रकार से है।

यवक्रीः	यवक्रियौ	यवक्रियः	यवक्रिये	यवक्रीभ्याम्	यवक्रीभ्यः
हे यवक्रीः !	हे यवक्रियौ !	हे यवक्रियः !	यवक्रियः	यवक्रीभ्याम्	यवक्रीभ्यः
यवक्रियम्	यवक्रियौ	यवक्रियः	यवक्रियः	यवक्रियोः	यवक्रियाम्
यवक्रिया	यवक्रीभ्याम्	यवक्रीभिः	यवक्रियि	यवक्रियोः	यवक्रीषु

इसी प्रकार से सुश्री और नी शब्द के रूप चलेंगे।

सेनानी शब्द में कुछ भेद है—

सेनानी + सि = सेनानीः

सेनानी + औ

यहाँ पूर्व सूत्र से ई, ऊ को इय् उव् प्राप्त था किंतु उसे बाधित कर आगे का सूत्र लगता है—

यदि अनेक अक्षर वाले ईकारांत, ऊकारांत शब्द हैं और संयुक्ताक्षर वाले नहीं हैं तब ई, ऊ, को य् व् आदेश होता है स्वर वाली विभक्ति के आने पर ॥१९०॥

सेनान् ई + औ—

सेनान्य् + औ सेनान्यौ बना।

संबोधन में भी इसी प्रकार है।

अनेक अक्षर वाले हों ऐसा क्यों कहा ? तो नी + औ में नियौ, ल् + औ = लुवौ बनेगा। संयुक्ताक्षर न हो ऐसा क्यों कहा ? यवक्री में संयुक्त अक्षर है अतः यवक्रियौ बनेगा। कटप्रू + औ = कटप्रुवौ बनेगा।

सेनानी + ङि

नी से परे ङि को आम् आदेश हो जाता है ॥१९१॥

सेनानी + आम् = सेनान्याम् बना।

सुधीः ॥१९२॥

सुधीशब्द इयं प्राप्नोति विभक्तिस्वरे परे। सुधियौ। सुधियः। सम्बोधनेऽपि तद्वत्। सुधियम्। सुधियौ। सुधियः। सुधिया। सुधीभ्याम्। सुधीभिः। सुधिये। सुधीभ्याम्। सुधीभ्यः। सुधियः। सुधीभ्याम्। सुधीभ्यः। सुधियः। सुधियोः। सुधियाम्। सुधियि। सुधियोः। सुधीषु॥ इति ईकारान्ताः। उकारान्तः पुल्लिङ्गे भानुशब्दः॥ स च मुनिशब्दवत्। अयं भेदः—उत ओत्वमवादेशश्च। भानुः। भानू। भानवः। हे भानो। हे भानू। हे भानवः। भानुम्। भानू। भानून्। भानुना। भानुभ्याम्। भानुभिः। भानवे। भानुभ्याम्। भानुभ्यः। भानोः। भान्वोः। भानूनाम्। भानौ भान्वोः। भानुषु। एवमृतु मेरु गुरु तरु धातु सेतु बाहु वायु बहुप्रभृतयः। इत्युकारान्ताः। ऊकारान्तः पुल्लिङ्गः लघ्वू शब्दः। स च यवक्रीशब्दवत्। उवादेशोऽत्र भेदः। कटप्रूः। कटप्रुवौ। कटप्रुवः। सम्बोधनेऽपि तद्वत्। कटप्रुवम्। कटप्रुवौ। कटप्रुवः। कटप्रुवा। कटप्रूभ्याम्। कटप्रूभिः। इत्यादि। खलपू शरलू काण्डलू प्रभृतीनां सेनानीशब्दवत्। वत्वं भेदः। प्रतिभूशब्दस्य तु भेदः। सौप्रतिभूः। स्वरादौ—

सेनानीः	सेनान्यौ	सेनान्यः	सेनान्ये	सेनानीभ्याम्	सेनानीभ्यः
हे सेनानीः !	हे सेनान्यौ !	हे सेनान्यः !	सेनान्यः	सेनानीभ्याम्	सेनानीभ्यः
सेनान्यम्	सेनान्यौ	सेनान्यः	सेनान्यः	सेनान्योः	सेनान्याम्
सेनान्या	सेनानीभ्याम्	सेनानीभिः	सेनान्याम्	सेनान्योः	सेनानीषु

इसी प्रकार से ग्रामणी और अग्रणी शब्द चलेंगे।

सुधी + सि = सुधीः।

सुधी + औ उपर्युक्त १९०वें सूत्र से अनेक अक्षर होने से स्वर वाली विभक्ति के आने पर ई को य् प्राप्त था कि उसे बाधित करके आगे का सूत्र लगता है—

सुधी शब्द के ई को इय् आदेश होता है ॥१९२॥

स्वर वाली विभक्ति के आने पर।

सुधियौ बना। संबोधन में तथैव है।

सुधीः	सुधियौ	सुधियः	सुधिये	सुधीभ्याम्	सुधीभ्यः
हे सुधीः !	हे सुधियौ !	हे सुधियः !	सुधियः	सुधीभ्याम्	सुधीभ्यः
सुधियम्	सुधियौ	सुधियः	सुधियः	सुधियोः	सुधियाम्
सुधिया	सुधीभ्याम्	सुधीभिः	सुधियि	सुधियोः	सुधीषु

इस प्रकार से ईकारान्त शब्द पूर्ण हुए। अब उकारांत भानु शब्द आता है।

भानु + सि = भानुः बना।

मुनि के समान 'इदुदग्निः' इस १६१वें सूत्र से अग्नि संज्ञा हो गई, यह पूरा रूप मुनि के समान चलेगा अंतर इतना ही है कि उसमें 'इ' को 'ए' हुआ था और उसमें 'उ' को 'ओ होगा। और 'ओ' को अव् आदेश होगा। सूत्र सभी वे ही लगेंगे। यथा—

भानुः	भानू	भानवः	भानवे	भानुभ्याम्	भानुभ्यः
हे भानो !	हे भानू !	हे भानवः !	भानोः	भानुभ्याम्	भानुभ्यः
भानुम्	भानू	भानून्	भानोः	भान्वोः	भानूनाम्
भानुना	भानुभ्याम्	भानुभिः	भानौ	भान्वोः	भानुषु

इसी प्रकार से ऋतु, मेरु, गुरु, धातु, सेतु, बाहु, वायु, बहु आदि रूप चलेंगे।

भूरुवर्षाभूरपुनर्भूः ॥१९३॥

भूरुवं प्राप्नोति विभक्तिस्वरे परे वर्षाभूपुनर्भ्वौ वर्जयित्वा। प्रतिभुवौ। प्रतिभुवः। सम्बोधनेऽपि तद्वत्। एवं स्वयंभू मित्रभू आत्मभू अग्निभू मनोभू प्रभृतयः। वर्षाभू पुनर्भू सेनानीवत्। वत्वं भेदः। इत्यूकारान्ताः। ऋकारान्तः पुल्लिङ्गः पितृशब्दः। सौ—

ऊकारांत शब्द पूर्ण हुए।

अब ऊकारांत शब्द चलेंगे।

कटभू + सि है

यह यवक्री के समान चलेगा अन्तर इतना ही है कि यहाँ 'ऊ' को उव् हो जाएगा।

कटभूः	कटभ्रुवौ	कटभ्रुवः	कटभ्रुवे	कटभूभ्याम्	कटभूभ्यः
हे कटभूः !	हे कटभ्रुवौ !	हे कटभ्रुवः !	कटभ्रुवः	कटभूभ्याम्	कटभूभ्यः
कटभ्रुवम्	कटभ्रुवौ	कटभ्रुवः	कटभ्रुवः	कटभ्रुवोः	कटभ्रुवाम्
कटभ्रुवा	कटभूभ्याम्	कटभूभिः	कटभ्रुवि	कटभ्रुवोः	कटभूषु

आगे खलपू, शरलू, काण्डलू शब्द सेनानी के समान चलेंगे। मात्र यहाँ 'ऊ' को 'उव्' न होकर व् हो जाएगा। यथा—

खलपूः	खलप्वौ	खलप्वः	खलप्वे	खलपूभ्याम्	खलपूभ्यः
हे खलपूः !	हे खलप्वौ !	हे खलप्वः !	खलप्वः	खलपूभ्याम्	खलपूभ्यः
खलप्वम्	खलप्वौ	खलप्वः	खलप्वः	खलप्वोः	खलप्वाम्
खलप्वा	खलपूभ्याम्	खलपूभिः	खलप्वि	खलप्वोः	खलपूषु

प्रतिभू शब्द में कुछ भेद है।

प्रतिभू + सिः + प्रतिभूः, प्रतिभू + औ है।

वर्षाभूः और पुनर्भूः को छोड़कर स्वर वाली विभक्ति के आने पर भू को उव् आदेश हो जाता है ॥१९३॥

प्रतिभुव् + औ = प्रतिभुवौ बना।

संबोधन में भी इसी प्रकार है। यथा—

स्वयंभूः	स्वयंभुवौ	स्वयंभुवः	स्वयंभुवे	स्वयंभूभ्याम्	स्वयंभूभ्यः
हे स्वयंभूः !	हे स्वयंभुवौ !	हे स्वयंभुवः !	स्वयंभुवः	स्वयंभूभ्याम्	स्वयंभूभ्यः
स्वयंभुवम्	स्वयंभुवौ	स्वयंभुवः	स्वयंभुवः	स्वयंभुवोः	स्वयंभुवाम्
स्वयंभुवा	स्वयंभूभ्याम्	स्वयंभूभिः	स्वयंभुवि	स्वयंभुवोः	स्वयंभूषु

इसी प्रकार से मित्र भू आदि उपर्युक्त मनोभू पर्यन्त रूप चलेंगे।

वर्षाभू पुनर्भू छोड़कर सूत्र में ऐसा क्यों कहा ? इन दोनों के रूप सेनानी के समान चलेंगे।

अर्थात् ऊ को व् होकर वर्षाभ्वौ आदि रूप बनेंगे।

यथा— वर्षाभूः (मेंढक)

वर्षाभूः	वर्षाभ्वौ	वर्षाभ्वः	वर्षाभ्वे	वर्षाभूभ्याम्	वर्षाभूभ्यः
हे वर्षाभूः !	हे वर्षाभ्वौ !	हे वर्षाभ्वः !	वर्षाभ्वः	वर्षाभूभ्याम्	वर्षाभूभ्यः
वर्षाभ्वम्	वर्षाभ्वौ	वर्षाभ्वः	वर्षाभ्वः	वर्षाभ्वोः	वर्षाभ्वाम्
वर्षाभ्वा	वर्षाभूभ्याम्	वर्षाभूभिः	वर्षाभ्वि	वर्षाभ्वोः	वर्षाभूषु

आ सौ सिलोपश्च ॥१९४॥

ऋदन्तस्य लिङ्गस्य आ भवति सौ परे सिलोपश्च। पिता।

घुटि च ॥१९५॥

ऋदन्तस्य अर् भवति घुटि परे। पितरौ। पितरः। सम्बुद्धौ च।

आ च न सम्बुद्धौ ॥१९६॥

ऋदन्तस्य आर् आ च न भवति सम्बुद्धौ परतः। अपि तु घुटि चेत्यर्भवति। हे पितः। हे पितरौ। हे पितरः। पितरम्। पितरौ।

अग्निवच्छसि ॥१९७॥

ऋदन्तस्य अग्निवत्कार्य्यं भवति शसि परे। पितॄन्। पित्रा। पितृभ्याम्। पितृभिः। पित्रे। पितृभ्याम्। पितृभ्यः। ङसिङसोः।

ऋदन्तात्सपूर्वः ॥१९८॥

इस प्रकार से ऊकारांत शब्द पूर्ण हुए।

अब ऋकारांत शब्द चलेंगे।

पितृ + सि—

सि के आने पर लिंगात ऋकार को 'आ' होकर 'सि' का लोप हो जाता है ॥१९४॥

अतः पिता बना।

पितृ + औ

घुट् स्वर के आने पर ऋकार को अर् हो जाता है ॥१९५॥

पित् अर् + औ = पितरौ, पितरः

संबोधन में पितृ + सि—

संबोधन में सि के आने पर ऋकार को आर् एवं आ नहीं होता है ॥१९६॥

अपि च 'घुटि च' इस १९५वें सूत्र से अर् हो जाता है तो पितर् + स् ए 'व्यंजनाच्च' सूत्र से व्यंजन से परे सि का लोप होकर "रेफसोर्विसर्जनीयः" से रकार को विसर्ग हो गया। तो हे पितः ! बना। द्विवचन, बहुवचन पूर्ववत् हैं।

पितृ + शस्

शस् के आने पर ऋदंत को अग्निवत् कार्य हो जाता है ॥१९७॥

अर्थात् अग्नि संज्ञा होकर 'शसोऽकारः सश्चनोऽस्त्रियाम्' १६६वें सूत्र से अकार को पूर्व स्वर रूप एवं स् को न् हो गया तो।

पितृ + ऋन् संधि होकर पितॄन् बन गया।

पितृ + टा 'रमृवर्णः' ४६वें सूत्र से ऋ को र् होकर पित्रा बना। व्यंजन वाली विभक्ति में कुछ भी नहीं होगा तो पितृ + भ्याम् = पितृभ्याम्।

पितृ + ङसि, पितृ + ङस्

ऋकार से परे ङसि ङस् को अकार पूर्व स्वर ऋ के साथ 'उ' हो जाता है ॥१९८॥

ऋदन्तात्परयोर्ङसिङसोरकारः पूर्वस्वरेण सह उमापद्यते। पितुः। पितृभ्याम्। पितृभ्यः। पितुः। पित्रोः। पितॄणाम्।

अङौ ॥१९९॥

ऋदन्तस्य अर् भवति ङौ परे। पितरि। पित्रोः। पितृषु। एवं भ्रातृ जामातृ सवितृ प्रभृतयः। कर्तृशब्दस्य तु भेदः। सौ—कर्ता घुटि।

धातोस्तृशब्दस्यार् ॥२००॥

धातोर्विहितस्य तृशब्दस्य ऋत आर्भवति घुटि परे। कर्तारौ। कर्तारः। हे कर्तः। हे कर्तारौ। हे कर्तारः। कर्तारम्। कर्तारौ। कर्तॄन्। अन्यत्र पितृशब्दवत्। धातोर्विहितस्य किं ? मातरौ। मातरः। यती प्रयत्ने। यतेः ऋत् दीर्घश्च उणादिप्रत्ययः। तृशब्दस्येति किं ? ननान्दरौ। ननान्दरः। एवं धातृ भर्तृ ज्ञातृ वेतृ श्रोतृ नेतृ पक्तृ भोक्तृ पक्तृ प्रभृतयः। क्रोष्टृशब्दस्य तु भेदः। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। सम्बुद्धौ।

और स् को विसर्ग होकर पित् + उस् = पितुः बना। पितृ + ओस्—संधि होकर पित्रोः।
पितृ + आम् नु का आगम, पूर्व स्वर को दीर्घ, एवं न् को ण् होकर पितॄणाम् बना।
पितृ + ङि

ङि के आने पर ऋ को अर् हो जाता है ॥१९९॥

पितर् + इ = पितरि + पित्रोः, पितृषु।

पिता	पितरौ	पितरः	पित्रे	पितृभ्याम्	पितृभ्यः
हे पितः !	हे पितरौ !	हे पितरः !	पितुः	पितृभ्याम्	पितृभ्यः
पितरम्	पितरौ	पितॄन्	पितुः	पित्रोः	पितॄणाम्
पित्रा	पितृभ्याम्	पितृभिः	पितरि	पित्रोः	पितृषु

इसी प्रकार से भ्रातृ, जामातृ और सवितृ के रूप चलते हैं।
कर्तृ शब्द में कुछ भेद है।
कर्तृ + सि "आसौ सिलोपश्च" सूत्र से कर्ता बना कर्तृ + औ धातु में कहे गये 'तृ' शब्द के ऋ को आर् हो जाता है घुट् स्वर के आने पर ॥२००॥
कर्त् आर् + औ कर्तारौ, कर्तारः।
संबोधन में पूर्ववत्—हे कर्तः इत्यादि। रेफ से आक्रांत वर्ण को कहीं-कहीं द्वित्व होने से कर्त्ता बन जाता है।
शस् से सुप् तक बाकी सब रूप पितृवत् चलते हैं।
यहाँ सूत्र में 'धातु से तृ' प्रत्यय ऐसा क्यों कहा ?
यती धातु प्रयत्न अर्थ में है उणादि प्रत्यय के गण में यत् के य को दीर्घ और ऋ प्रत्यय हुआ है तो यहाँ धातु से तृ प्रत्यय नहीं है अतः आर् न होकर पितृवत् अर् ही हुआ तो यातरौ बना। तृ शब्द को ऋ का आर् हो ऐसा क्यों कहा ? तो ननान्दृ शब्द है इसमें तृ नहीं है अतः इसमें दीर्घ आर् न होकर अर् ही होगा।
तब ननान्दरौ बनेगा। इस कर्ता के समान ही घुट् स्वर में आर् होकर ही ऊपर मूल में लिखे धातृ से लेकर वक्तृ आदि रूप चलते हैं।

क्रोष्टुः ऋत उत्सम्बुद्धौ शसि व्यञ्जने नपुंसके च ॥२०१॥

क्रोष्टृशब्दस्य ऋत उर्भवति। सम्बुद्धौ शसि व्यञ्जने नपुंसके च परे। अग्निसंज्ञां विधाय भानुवत्कुर्यात्। हे क्रोष्टो। हे क्रोष्टारौ। हे क्रोष्टारः। क्रोष्टारम्। क्रोष्टारौ। क्रोष्टून्।

टादौ स्वरे वा ॥२०२॥

क्रोष्टृशब्दस्य ऋत उर्वा भवति टादौ स्वरे परे। क्रोष्ट्रा, क्रोष्टुना। क्रोष्टुभ्याम्। क्रोष्टुभिः। क्रोष्टे, क्रोष्ट्वे। क्रोष्टुभ्याम्। क्रोष्टुभ्यः। क्रोष्टुः, क्रोष्टोः। क्रोष्टुभ्याम्। क्रोष्टुभ्यः। क्रोष्टुः, क्रोष्टोः। क्रोष्टोः। क्रोष्ट्वोः। क्रोष्टॄणाम्, क्रोष्टूनाम्। क्रोष्टरि, क्रोष्टौ। क्रोष्टोः, क्रोष्ट्वोः। क्रोष्टुषु। स्वसृशब्दस्य तु भेदः। सौ—स्वसा। घुटि।

स्वस्रादीनां च ॥२०३॥

जैसे—

कर्त्ता	कर्त्तारौ	कर्त्तारः	कर्त्रे	कर्तृभ्याम	कर्तृभ्यः
हे कर्त्तः !	हे कर्त्तारौ !	हे कर्त्तारः !	कर्तुः	कर्तृभ्याम्	कर्तृभ्यः
कर्त्तारम्	कर्त्तारौ	कर्तॄन्	कर्तुः	कर्त्रोः	कर्तॄणाम्
कर्त्रा	कर्तृभ्याम्	कर्तृभिः	कर्त्तरि	कर्त्रोः	कर्तृषु

क्रोष्टृ (शृगाल) शब्द में कुछ भेद है।

क्रोष्टृ + सि—कर्तृवत् क्रोष्टा क्रोष्टारौ क्रोष्टारः संबोधन में—क्रोष्टृ + सि—

क्रोष्टृ शब्द के ऋकार को संबुद्धि संज्ञकसि, शस् व्यंजन वाली विभक्ति एवं नपुंसकलिंग के आने पर उकार हो जाता है ॥२०१॥

जब 'उ' हो जाता है तब अग्नि संज्ञा करके भानु के समान रूप चलाना अतः क्रोष्टु + सि = हे क्रोष्टो ! क्रोष्टृ + शस् उकार होकर क्रोष्टु + शस् अ को उ एवं स् को न् होकर क्रोष्टून् बना।

क्रोष्टृ + टा

टा आदि स्वर वाली विभक्ति के आने पर क्रोष्टृ शब्द के ऋ को उ विकल्प से होता है ॥२०२॥

'रमृवर्णः' से संधि होकर क्रोष्ट्रा बना ऋ को उ होकर अग्नि संज्ञा में क्रोष्टुना बना।

यह सर्वत्र ध्यान रखना कि 'उ' होने के बाद अग्नि संज्ञा होकर भानुवत् रूप बनते हैं। अन्यथा पितृवत् बनते हैं। व्यंजन वाली विभक्ति में भी क्रोष्टु + भ्याम् = क्रोष्टुभ्याम् बना।

देखिए—

क्रोष्टा	क्रोष्टारौ	क्रोष्टारः	क्रोष्टे, क्रोष्ट्वे	क्रोष्टुभ्याम्	क्रोष्टुभ्यः
हे क्रोष्टो !	हे क्रोष्टारौ !	हे क्रोष्टारः !	क्रोष्टुः, क्रोष्टोः	क्रोष्टुभ्याम्	क्रोष्टुभ्यः
क्रोष्टारम्	क्रोष्टारौ	क्रोष्टून्	क्रोष्टुः, क्रोष्टोः	क्रोष्टोः, क्रोष्ट्वोः	क्रोष्टॄणाम्, क्रोष्टूनाम्
क्रोष्ट्रा, क्रोष्टुना	क्रोष्टुभ्याम्	क्रोष्टुभिः	क्रोष्टरि, क्रोष्टौ	क्रोष्टोः, क्रोष्ट्वोः	क्रोष्टुषु

स्वसृ शब्द में कुछ भेद है—

स्वसृ + सि = 'आसौ सिलोपश्च' सूत्र से ऋ को आ और सि का लोप होकर स्वसा बना।

स्वसृ + औ—

घुट् स्वर के आने पर स्वसृ आदि शब्दों के ऋ को आर् हो जाता है ॥२०३॥

स्वस्रादीनां च ऋत आर्धधातुके घुटि परे। स्वसारौ। स्वसारः। हे स्वसः। इत्यादि। अन्यत्र पितृशब्दवत्। के स्वस्रादयः ?

स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च।
होता पोता प्रशास्ता चेत्यष्टौ स्वस्रादयः स्मृताः ॥१॥

नृशब्दस्य तु भेदः। नृशब्दस्यामि विशेषः। ना। नरौ। नरः। हे नः। हे नरौ। हे नरः। नरम्। नरौ। नॄन्। ना। नृभ्याम्। नृभिः। ने। नृभ्याम्। नृभ्यः। नुः। नृभ्याम्। नृभ्यः। नुः। नोः। न नामि दीर्घमिति वर्तते।

नृ वा ॥२०४॥

नृशब्दो वा दीर्घं प्राप्नोति सनावामि परे। नृणाम्, नॄणाम्। नरि। नोः। नृषु॥ इति ऋदन्ताः। ऋकारलृकारलॄकारकारान्ता अप्रसिद्धाः। ऐकारान्तः। पुल्लिङ्गे रैशब्दः। आत्वं व्यञ्जनादौ इति वर्तते।

रैः ॥२०५॥

स्वस् आर् + औ = स्वसारौ स्वसारः।

हे स्वसः, स्वसृ + शस् में स् को न् नहीं होगा क्योंकि 'शसोऽकारः सश्चनोऽस्त्रियाम्' सूत्र में स्त्रीलिंग में स् को न् का निषेध किया है और यह स्वसावचन का वाचक स्त्रीलिंग है।

अतः स् को विसर्ग होकर स्वसृः बनेगा। बाकी शब्द पितृवत् चलेंगे।

सूत्र में स्वस्रादि शब्द है तो आदि से कौन कौन लेना ?

श्लोकार्थ—स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ ये आठ शब्द आदि शब्द से लिए जाते हैं॥

इनके रूप भी स्वसृ के समान ही चलते हैं। अंतर यही है कि ये शब्द पुल्लिंग हैं अतः स को न् होकर पितृन् शब्द के समान रूप बनते हैं। जैसे नप्तृन्, नेष्टृन् इत्यादि।

नृ शब्द में आम् विभक्ति के आने पर ही अंतर है बाकी सब रूप पितृ के समान ही हैं।

नृ + आम्

"न नामि दीर्घ" यह सूत्र अनुवृत्ति से आ रहा है।

आम् के आने पर नृ शब्द के ऋ को दीर्घ विकल्प से होता है॥२०४॥

नृ + नु आम् = नृणाम्, दीर्घ होकर, नॄणाम् बना।

ना	नरौ	नरः	ने	नृभ्याम्	नृभ्यः
हे नः !	हे नरौ	हे नरः	नुः	नृभ्याम्	नृभ्यः
नरम्	नरौ	नॄन्	नुः	नोः	नृणाम्, नॄणाम्
ना	नृभ्याम्	नृभिः	नरि	नोः	नृषु

इस प्रकार से ऋकारांत शब्द हुये दीर्घ ऋकारान्त, लृकारांत और लॄकारांत और एकारांत शब्द अप्रसिद्ध हैं।

अब ऐकारांत पुल्लिंग "रै" शब्द है।

रै + सि

"आत्वं व्यंजनादौ" यह सूत्र अनुवृत्ति में चला आ रहा है।

व्यंजन वाली विभक्ति के आने पर रै शब्द आकारांत हो जाता है॥२०५॥

रैशब्दस्य आद् भवति व्यञ्जनादौ परतः। राः। रायौ। रायः। हे राः। हे रायौ। हे रायः। रायम्। रायौ। रायः। राया। राभ्याम्। राभिः। राये। राभ्याम्। राभ्यः। रायः। राभ्याम्। राभ्यः। रायः। रायोः। रायाम्। रायि। रायोः। रासु। इत्यैकारान्तः॥ ओकारान्तः पुल्लिङ्गो गो शब्दः।

गोरौ घुटि॥२०६॥

गोशब्दस्यान्त और्भवति घुटि परे। गौः। गावौ। गावः। हे गौः। हे गावौ। हे गावः।

अम्शसोरा॥२०७॥

गोशब्दस्यान्त आ भवति अम्शसोः परतः। गाम्। गावौ। गाः। गवा। गोभ्याम्। गोभिः। गवे। गोभ्याम्। गोभ्यः। ङसिङसोरलोपश्चेति वर्तते।

गोश्च॥२०८॥

गोशब्दात्परयोर्ङसिङसोरकारो लोपमाप्नुते। गोः। गोभ्याम्। गोभ्यः। गोः। गवोः। गवाम्। गवि। गवोः। गोषु। इत्योकारान्तः। औकारान्तः पुल्लिङ्गो ग्लौशब्दः। ग्लौः। ग्लावौ। ग्लावः। सम्बोधनेऽपि तद्वत्। ग्लावम्। ग्लावौ। ग्लावः ग्लावा। ग्लौभ्याम्। ग्लौभिः। इत्यादि। इत्यौकारान्तः।

इति स्वरान्ताः पुल्लिङ्गाः ❑

रा + स्—विसर्ग होकर रः, रै + औ—'ऐ आय्' से आय् रायौ, रायः बन जाता है। सर्वत्र व्यंजनवाली विभक्ति के आने पर आकार होकर राभ्याम्, राभिः आदि बनता है।

ऐकारांत शब्द हुये। अब ओकारांत पुल्लिग गो शब्द है।

गो + सि

गो शब्द के अंत के ओ को औ हो जाता है घुट् विभक्ति के परे रहने पर॥२०६॥

गौ + सि = गौः, गौ + औ 'औ आव' सूत्र से आव् होकर गावौ, गावः बना। संबोधन में भी इसी प्रकार है।

गो + अम्, गो + औ, गो + शस्।

अम् और शस् के आने पर गो शब्द के अन्त के ओ को 'आ' हो जाता है॥२०७॥

गा + अम् = गाम्, गावौ, गा + अस् = गावः।

गो + टा 'ओ अव' से संधि होकर गवा बना। गो + भ्याम् = गोभ्याम्, गोभिः। गो + ङे = गवे। गो + ङसि, गो + ङस्।

गो शब्द से परे ङसि और ङस् के अकार का लोप हो जाता है॥२०८॥

गो + स् विसर्ग होकर गोः बना।

गो + ओस् 'ओ अव' से संधि होकर गवोः बना।

गौः	गावौ	गावः।	गवे	गोभ्याम्	गोभ्यः।
हे गौः	हे गावौ	हे गावः।	गोः	गोभ्याम्	गोभ्यः।
गाम्	गावौ	गाः।	गोः	गवोः	गवाम्।
गवा	गोभ्याम्	गोभिः।	गवि	गवोः	गोषु।

इस प्रकार ओकारांत शब्द हुआ। अब औकारांत ग्लौ शब्द है।

ग्लौ + सि = ग्लौः, ग्लौ + औ = ग्लावौ। ग्लौ + अस् = ग्लावः। ग्लौ + भ्याम् = ग्लौभ्याम्। इसी प्रकार से औकारांत शब्द हुए।

॥इस प्रकार से स्वरांत पुल्लिग प्रकरण पूर्ण हुआ॥ ❑

अथ स्वरान्ताः स्त्रीलिङ्गा उच्यन्ते

अकारान्तः स्त्रीलिङ्गोऽप्रसिद्धः । आकारान्तः स्त्रीलिङ्गे रम्भाशब्दः । सौ ।

आ श्रद्धा ॥२०९॥

आकारान्तः स्व्याख्यः श्रद्धासंज्ञो भवति ।

श्रद्धायाः सिर्लोपम् ॥२१०॥

श्रद्धायाः परः सिर्लोपमापद्यते । रम्भा ।

औरिम् ॥२११॥

श्रद्धायाः पर औरिमापद्यते । रम्भे । रम्भाः ।

सम्बुद्धौ च ॥२१२॥

श्रद्धाया एत्वं भवति सम्बुद्धौ परे । हे रम्भे । हे रम्भे । हे रम्भाः । रम्भां रम्भे । रम्भाः ।

टौसोरे ॥२१३॥

श्रद्धाया एत्वं भवति टौसोः परतः । रम्भया । रम्भाभ्याम् । रम्भाभिः । ङवत्सु ।

ङवन्ति यैयास्यास्याम् ॥२१४॥

अथ स्वरांत स्त्रीलिंग प्रकरण

अब स्वरांत स्त्रीलिंग प्रकरण कहा जाता है ।

अकारांत स्त्रीलिंग अप्रसिद्ध है । आकारांत स्त्रीलिंग 'रम्भा' शब्द है ।

रम्भा + सि

आकारांत स्त्रीलिंग शब्दों की श्रद्धा संज्ञा हो जाती है ॥२०९॥

श्रद्धा संज्ञक से परे सि का लोप हो जाता है ॥२१०॥

अतः रम्भा बना ।

रम्भा + औ

श्रद्धा संज्ञक से परे औ विभक्ति को 'इ' आदेश हो जाता है ॥२११॥

रम्भा + इ 'अवर्णे इवर्णे ए' से संधि होकर रम्भे बना । जस् में रम्भाः बना । संबोधन में—

रम्भा + सि ।

संबुद्धि संज्ञक सि के आने पर श्रद्धा संज्ञक आ को 'ए' हो जाता है ॥२१२॥

और 'श्रद्धायाः सिर्लोपम्' से सि का लोप होकर—हे रम्भे ! बना । हे रम्भे ! हे रम्भाः !

रम्भा + टा

टा और ओस् के परे श्रद्धा संज्ञक को 'ए' हो जाता है ॥२१३॥

रम्भे + आ 'ए अय' से संधि होकर रम्भया बना । रम्भाभ्याम्, रम्भाभिः ।

रम्भा + ङे, रम्भा + ङसि, रम्भा + ङस्, रम्भा + ङि ।

श्रद्धा संज्ञक से ङवंति अर्थात् ङे, ङसि, ङस्, ङि के आने पर क्रम से यै, यास्, यास्, याम् आदेश हो जाता है ॥२१४॥

श्रद्धाया: पराणि डवन्ति वचनानि यै यास् यास् याम् भवन्ति यथासंख्यम् । रम्भाभ्याम् । रम्भाभ्य: । रम्भाया: । रम्भाभ्याम् । रम्भाभ्य: । रम्भाया: । रम्भयो: । रम्भाणाम् । रम्भायाम् । रम्भयो: । रम्भासु । एवं शाला माला दोला भार्या कान्ता अङ्गना वनिता जाया माया प्रभृतय: । सर्वनाम्नस्त्रिलिङ्गत्वात्स्त्रीलिङ्गे ।

स्त्रियामादा ॥२१५ ॥

स्त्रियां वर्तमानादकारान्तादाप्रत्ययो भवति विभक्तिपरे । सर्वा । सर्वे । सर्वा: । हे सर्वे । हे सर्वे । हे सर्वा: । सर्वाम् । सर्वे । सर्वा: । सर्वया । सर्वाभ्याम् । सर्वाभि: । डवत्सु ।

सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च ॥२१६ ॥

सर्वनाम्न: श्रद्धाया: पराणि डवन्ति वचनानि यै यास् याम् भवन्ति यथासंख्यं सह सुना ह्रस्वपूर्वाश्च । सर्वस्यै । सर्वाभ्याम् । सर्वाभ्य: । सर्वस्या: । सर्वाभ्याम् । सर्वाभ्य: । सर्वस्या: । सर्वयो: । आमि । सुरामि सर्वत: । सर्वासाम् । सर्वस्याम् । सर्वयो: । सर्वासु । एवं विश्वादीनामेकशब्दपर्यन्तानां रूपं ज्ञेयम् । अल्पादीनां तु सप्तानां रम्माशब्दवत् । अल्प प्रथग चरम तय अय कतिपय अर्य एते सप्त । द्वितीयाशब्दस्य तु भेद: । द्वितीया । द्वितीये । द्वितीया: । हे द्वितीये । हे द्वितीये । हे द्वितीया: । द्वितीयाम् । द्वितीये । द्वितीया: । द्वितीयया: । द्वितीयाभ्याम् । द्वितीयाभि: । डवत्सु ।

रम्भा + यै = रम्भायै, रम्भाया:, रम्भाया:, रम्भाभ्याम् । रम्भा + ओस् 'टौसोरे' सूत्र से आ को ए होकर संधि होकर रम्भयो: बना ।

रम्भा	रम्भे	रम्भा:	रम्भायै	रम्भाभ्याम्	रम्भाभ्य:
हे रम्भे !	हे रम्भे !	हे रम्भा: !	रम्भाया:	रम्भाभ्याम्	रम्भाभ्य:
रम्भाम्	रम्भे	रम्भा:	रम्भाया:	रम्भयो:	रम्भाणाम्
रम्भया	रम्भाभ्याम्	रम्भाभि:	रम्भायाम्	रम्भयो:	रम्भासु

इस प्रकार से ऊपर लिखे हुआ शाला आदि शब्द चलते हैं ।

सर्वनाम तीनों लिंगों में चलते हैं अत: स्त्रीलिंग में 'सर्व' शब्द आया ।

स्त्रीलिंग में वर्तमान अकारांत शब्द को 'आ' प्रत्यय हो जाता है विभक्ति के आने पर ॥२१५ ॥

सर्व + आ = सर्वा + सि—श्रद्धा संज्ञा करके 'श्रद्धाया: सिर्लोपम्' से सि का लोप होकर सर्वा बना ।

ङ्वान्—ङे, ङसि, ङस्, ङि इन चार विभक्तियों को ङवान् कहते हैं इनके आने पर कुछ अंतर है ।

सर्वा + ङे, सर्वा + ङसि, सर्वा + ङस्, सर्वा + ङि ।

सर्वनाम श्रद्धासंज्ञक से परे जो ङवान् वचन को यै, यास्, यास्, याम् आदेश हुआ है उसमें क्रम से विभक्ति के पूर्व में सकार एवं पूर्व स्वर को ह्रस्व आदेश हो जाता है ॥२१६ ॥

सर्व + स्यै = सर्वस्यै, सर्वस्या:, सर्वस्या:, सर्वस्याम् ।

सर्वा + आम् 'सुरामि सर्वत:' १५५वें सूत्र से सु का आगम होकर सर्वासाम् बना ।

सर्वा	सर्वे	सर्वा:	सर्वस्यै	सर्वाभ्याम	सर्वाभ्य:
हे सर्वे !	हे सर्वे !	हे सर्वा: !	सर्वस्या:	सर्वाभ्याम्	सर्वाभ्य:
सर्वाम्	सर्वे	सर्वा:	सर्वस्या:	सर्वयो:	सर्वासाम्
सर्वया	सर्वाभ्याम्	सर्वाभि:	सर्वस्याम्	सर्वयो:	सर्वासु

इसी प्रकार से विश्वा, उभा, उभया, अन्या, अन्यतरा, इतरा, इतमा, कतरा, कतमा, यतरा, यतमा, ततरा, ततमा, एकतरा, एकतमा, त्वा, नेमा, समा, सिमा, पूर्वा, परा, अवरा, दक्षिणा, उत्तरा, अपरा, अधरा, स्वा, अंतरा, त्या, ता, या इत्यादि एक पर्यंत रूप सर्वा के समान ही चलेंगे ।

द्वितीयातृतीयाभ्यां वा ॥२१७॥

द्वितीयातृतीयाभ्यां पराणि ङवन्ति वचनानि यै यास् यास् याम् भवन्ति यथासंख्यं सह सुना ह्रस्वपूर्वाश्च वा। द्वितीयस्यै, द्वितीयायै। द्वितीयाभ्याम्। द्वितीयाभ्यः। द्वितीयस्याः, द्वितीयायाः। द्वितीयाभ्याम्, द्वितीयाभ्यः। द्वितीयस्याः द्वितीयायाः। द्वितीययोः। सर्वादौ अपठितत्वात् न सुरागमः। द्वितीयानाम्। द्वितीयस्याम्, द्वितीयायाम्। द्वितीययोः। द्वितीयासु। एवं तृतीयाशब्दोऽपि। अन्यत्र रम्भाशब्दवत्। जराशब्दस्य तु भेदः। व्यञ्जने रम्भाशब्दवत्।

जरा जरः स्वरे वा ॥२१८॥

जराशब्दो जरस् वा भवति विभक्तिस्वरे परे। जरे, जरसौ। जराः, जरसः। हे जरे। हे जरे, हे जरसौ। हे जराः, हे जरसः। जरां, जरसं। जरे, जरसौ। जराः, जरसः। जरसा, जरया। जराभ्याम्। जराभिः। जरायै, जरसे। जराभ्याम्। जराभ्यः। जरायाः, जरसः। जराभ्यां, जराभ्यः। जरायाः, जरसः। जरयोः, जरसोः। जराणाम्, जरसाम्। जरायां, जरसि। जरयोः, जरसोः। जरासु।

ये सभी शब्द अकारांत हैं इनमें 'स्त्रियामादा' इस २१५वें सूत्र से स्त्रीलिंग बनाने के लिये 'आ' प्रत्यय करना होता है। सर्वत्र अकारांत को स्त्रीलिंग में 'अद' प्रत्यय करना ही होगा।

अल्पा, प्रथमा, चरमा, कतिपया शब्द और जिसमें तय, अय प्रत्यय लगे हैं ऐसे शब्द रम्भा के समान चलते हैं।

द्वितीया शब्द में कुछ भेद हैं।

द्वितीया + सि = द्वितीया इत्यादि। द्वितीया + ङे

द्वितीया और तृतीया से परे ङ वान् को क्रम से यै, यास्, यास्, याम् विकल्प से होता है ॥२१७॥

अर्थात् एक बार स् सहित यै, यास्, यास्, याम् होकर पूर्व को ह्रस्व हो जाता है अतः इन चार विभक्तियों के दो रूप बनते हैं यथा द्वितीया + ङे = द्वितीयायै, द्वितीयस्यै, द्वितीयायाः, द्वितीयस्याः इत्यादि। ये द्वितीया, तृतीया शब्द सर्वादि गण में कहे नहीं गये हैं। अतः आम् के आने पर सु का आगम न होकर नु का आगम हुआ। तब द्वितीयानाम् बना। शेष सभी रूप रंभा के समान हैं।

द्वितीया	द्वितीये	द्वितीयाः	द्वितीयायै, द्वितीयस्यै	द्वितीयाभ्याम्	द्वितीयाभ्यः
हे द्वितीये।	हे द्वितीये !	हे द्वितीयाः।	द्वितीयायाः, द्वितीयस्याः	द्वितीयाभ्याम्	द्वितीयाभ्यः
द्वितीयाम्	द्वितीये	द्वितीयाः	द्वितीयायाः, द्वितीयस्याः	द्वितीययोः	द्वितीयानाम्
द्वितीयया	द्वितीयाभ्याम्	द्वितीयाभिः	द्वितीयायाम्, द्वितीयस्याम्	द्वितीययोः	द्वितीयासु

जरा शब्द में स्वर के आने पर भेद हैं व्यंजन में रम्भावत् ही है।

जरा + सि = जरा, जरा + औ

स्वर वाली विभक्ति के आने पर जरा शब्द को जरस् आदेश विकल्प से हो जाता है ॥२१८॥

अर्थात् एक बार रंभावत् जरे बना। दूसरी बार जरस् + औ = जरसौ जरा + जस् = जराः, जरसः बना।

जरा	जरे, जरसौ	जराः, जरसः	जरायै, जरसे	जराभ्याम्	जरासभ्यः
हे जरे !	हे जरे !, हे जरसौ !	हे जराः !, हे जरसः !	जरायाः, जरसः	जराभ्याम्	जरासभ्यः
जराम्, जरसम्	जरे, जरसौ	जराः, जरसः	जरायाः, जरसः	जरयोः, जरसोः	जराणाम्, जरसाम्
जरया, जरसा	जराभ्याम्	जराभिः	जरायाम्, जरसि	जरयोः, जरसोः	जरासु

ह्रस्वोऽम्बार्थानाम् ॥२१९ ॥

अम्बार्थानां द्विस्वराणां श्रद्धासंज्ञकानां सम्बुद्धौ ह्रस्वो भवति । हे अम्ब । हे अक्क । हे अल्ल । हे अत्त । एवमादयोऽम्बार्थाः । अन्यत्र रम्भाशब्दवत् ।

न बहुस्वराणाम् ॥२२० ॥

बहुस्वराणामम्बार्थानां श्रद्धासंज्ञकानां ह्रस्वो न भवति सम्बुद्धौ सौ परे । हे अम्बाडे । हे अम्बाले । हे अम्बिके । इत्याकारान्ताः । इकारान्तः स्त्रीलिङ्गो रुचिशब्दः । रुचिः । रुची । रुचयः । हे रुचे । हे रुची । हे रुचयः । रुचिम् । रुची । स्त्रीलिङ्गत्वात्सस्य नत्वाभावः । रुचीः । तृतीयैकवचनेऽपि तस्मान्नत्वाभावः । रुच्या । रुचिभ्याम् । रुचिभिः । ङ्यत्सु ।

ह्रस्वश्च ङ्यति ॥२२१ ॥

स्त्र्याख्यावियुवौ स्थानिनौ च ह्रस्वश्च ङ्यति परे नदीसंज्ञौ वा भवतः । यत्र नदीसंज्ञा तत्र ।

माता अर्थ के वाचक दो स्वर वाले श्रद्धासंज्ञक शब्दों को संबुद्धि में ह्रस्व हो जाता है ॥२१९ ॥

हे अम्बा + सि = हे अम्ब ! हे अक्क ! हे अल्ल ! हे अतः ! सम्बोधन में माता अर्थ के वाचक शब्दों में ही यह नियम है । बाकी सभी विभक्तियों में इनके रूप रम्भावत् चलेंगे । जैसे—

अम्बा	अम्बे	अम्बाः	अम्बायैः	अम्बाभ्याम्	अम्बाभ्यः
हे अम्ब !	हे अम्बे !	हे अम्बाः !	अम्बायाः	अम्बाभ्याम्	अम्बाभ्यः
अम्बाम्	अम्बे	अम्बाः	अम्वायाः	अम्बयोः	अम्बानाम्
अम्बया	अम्बाभ्याम्	अम्बाभिः	अम्बायाम्	अम्बयोः	अम्बासु

बहुत स्वर वाले माता के वाचक, श्रद्धा संज्ञक शब्दों को संबोधन में ह्रस्व नहीं होता है ॥२२० ॥

जैसे—अम्बाडा + सि = हे अम्बाडे ! हे अम्बाले ! हे अम्बिके ! इस प्रकार से आकारांत शब्द हुये ।

अब इकारान्त स्त्रीलिंग रुचि शब्द है ।

रुचि + सि = रुचिः, रुचि + औ 'औरिम्' इस २११वें सूत्र से 'इ' होकर रुची । रुचि + जस् अग्नि संज्ञा करके 'इरेदुरोज्जसि' सूत्र से ए होकर रुचयः बना ।

रुचि + शस् स्त्रीलिंग में स् को न् नहीं होने से विसर्ग होकर रुचीः बना । अर्थात् 'शसोऽकारः सश्च नोऽस्त्रियाम्' इस १६६वें सूत्र से शस् के अकार को पूर्व स्वर रूप होकर स् को विसर्ग हुआ और समान सवर्ण को दीर्घ होकर रुचीः बना ।

रुचि + टा, टा के ट् का अनुबंध लोप होकर रुचि + आ 'अस्त्रियां टा ना' इस १६७वें सूत्र से स्त्रीलिंग में टा को ना का निषेध होने से संधि हो गई तो रुच्या बना । रुचि + भ्याम् = रुचिभ्याम् ।

रुचि + ङे आदि चारों वचन हैं ।

ङे आदि विभक्ति के आने पर स्त्रीलिंग में वाची इय् उव् स्थानीय और ह्रस्व इकारान्त उकारान्त स्त्रीलिंग वाचक शब्द वह विकल्प से नदीसंज्ञक भी हो जाते हैं ॥२२१ ॥

अर्थात् आगे आने वाले २२६वें सूत्र से दीर्घ ई ऊ को स्त्रीलिंग में नदी संज्ञा होती है ।

नद्या ऐआसासाम् ॥२२२ ॥

नदीसंज्ञकात्परेषाणि ङवन्ति वचनानि ऐ आस् आस् आम् भवन्ति यथासंख्यम् । नदीसंज्ञाभावे मुनिशब्दवत् । रुच्यै, रुचये । रुचीभ्याम् । रुचिभ्य: । रुच्या:, रुचे: । रुचिभ्याम् । रुचिभ्य: । रुच्या:, रुचे: । रुच्यो: । रुचीनाम् । रुच्याम्, रुचौ । रुच्यो: । रुचिषु । एवं बुद्धि वृद्धि कीर्ति कान्ति कृति युक्ति श्रेणि पङ्क्ति प्रभृतय: । द्विशब्दस्य तु भेद: । त्यदादित्वात् अ आदेश आ प्रत्ययश्च । द्वे । हे द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयो: । द्वयो: । त्रिशब्दस्य तु भेद: ।

त्रिचतुरो: स्त्रियां तिसृचतसृ विभक्तौ ॥२२३ ॥

स्त्रियां वर्तमानयोस्त्रिचत्वार्शब्दयो: तिसृ चतसृ आदेशौ भवत: विभक्तौ परत: । धुटि चेत्यरि प्राप्ते बाधकबाधनार्थोऽयं योग: ।

तौ रं स्वरे ॥२२४ ॥

नदी संज्ञक से परे ङे आदि के आने पर क्रम से चारों को ऐ, आस्, आस्, आम् आदेश होते हैं ॥२२२ ॥

और जब नदी संज्ञा नहीं हुई तब मुनि शब्द के समान रूप चलेंगे । ङे आदि चार विभक्तियों में ही दो-दो रूप हैं ।

रुचि + ङे = मुनिवत् में 'ङे' इस सूत्र से इ को ए होकर संधि हुई तो रुचये, नदीसंज्ञक में ऐ होकर रुचि + ऐ = रुच्यै बना तथैव रुचि + ङसि अग्नि संज्ञक मे 'ङसिङसोरलोपश्च' १६९वें सूत्र से इ को अ का लोप होकर रुचे: बना । और नदी संज्ञा होकर ङसि को आस् आदेश होकर रुच्या: बना ।

रुचि + ङि—अग्नि संज्ञा में रुचौ, नदी संज्ञा में रुच्याम् ।

रुचि:	रुची	रुचय:	रुच्यै, रुचये	रुचिभ्याम्	रुचिभ्य:
हे रुचे !	हे रुची !	हे रुचय: !	रुचे:, रुच्या:	रुचिभ्याम्	रुचिभ्य:
रुचिम्	रुची	रुची:	रुचे:, रुच्या:	रुच्यो:	रुचीनाम्
रुच्या	रुचिभ्याम्	रुचिभि:	रुचौ, रुच्याम्	रुच्यो:	रुचिषु

इसी प्रकार से ऊपर लिखे हुये बुद्धि, वृद्धि, आदि रूप चलते हैं । द्वि शब्द में कुछ भेद हैं—

द्वि + औ

'त्यदादीनाम् विभक्तौ' इस १७२वें सूत्र से 'अ' आदेश होकर 'द्व' 'स्त्रियामादा' सूत्र से आ होकर द्वा बना 'औरिम्' से औ को 'इ' होकर द्वे बना । द्वा + भ्याम् = द्वाभ्याम् ।

द्वा + ओस् 'टौ सो रे' २१३वें सूत्र से ए होकर द्वयो: बना ।

त्रि शब्द में कुछ भेद हैं । त्रि + जस्

स्त्रीलिंग में वर्तमान त्रि और चत्वार् शब्द विभक्ति के आने पर तिसृ, चतसृ आदेश हो जाता है ॥२२३ ।

तिसृ + अस्

यहाँ 'धुटि च' १९५वें सूत्र से ऋ को अर् प्राप्त था किंतु इसे बाधित करने के लिये आगे के सूत्र का योग है ।

स्वर वाली विभक्ति के आने पर तिसृ, चतसृ के ऋ को र् आदेश हो जाता है ॥२२४ ॥

तौ तिसृ चतसृ आदेशौ रं प्राप्नुतो विभक्तौ स्वरे परे। तिस्रः। हे तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। तिसृभ्यः।

न नामि दीर्घम् ॥२२५॥

तौ तिसृ चतसृ आदेशौ दीर्घत्वं न प्राप्नुवतः सनावामि परे। तिसृणाम्। तिसृषु। इति इकारान्तः। ईकारान्तः स्त्रीलिङ्गो नदीशब्दः।

ईदूतो स्त्र्याख्यौ नदी ॥२२६॥

स्त्र्याख्यावीदूतौ नदीसंज्ञौ भवतः।

ईकारान्तात्सिः ॥२२७॥

नदीसंज्ञकादीकारान्तात्परः सिर्लोपमापद्यते। नदीसंज्ञादन्तग्रहणाधिक्यान्नदाद्यञ्जीत्यादिना विहितादीकारात्परः सिर्ल्लोपमापद्यते। नदी। नद्यौ। नद्यः।

संबुद्धौ ह्रस्वः ॥२२८॥

नद्याः संबुद्धौ ह्रस्वो भवति। हे नदि। हे नद्यौ। हे नद्यः।

अम्शसोरादिर्लोपम् ॥२२९॥

नदीसंज्ञकात्परयोः अम्शसोरादिर्लोपमापद्यते। नदीम्। नद्यौ। नदीः। नद्या। नदीभ्याम्। नदीभिः। ङ्यत्सु। नद्या ऐआसासामित्यादयः। नद्यै। नदीभ्याम्। नदीभ्यः। नद्याः। नदीभ्याम्। नदीभ्यः। नद्याः। नद्योः। नदीनाम्। नद्याम्। नद्योः। नदीषु। एवं गौरी गान्धारी वाणी भारती गायत्री सावित्री सरस्वती गोमती गोमिनी भामिनि क्राष्ट्री महिषी मही एलवी सौरभेयी प्रभृतयः॥

तिसृ + अस् = तिस्रः, चतस्रः। तिसृ + शस् = तिस्रः। तिसृ + भिः = तिसृभिः। तिसृ + आम् नु का आगम न् को ण् हुआ।

सु नु आम् विभक्ति के आने पर तिसृ, चतसृ आदेश ऋ को दीर्घ नहीं हुआ ॥२२५॥

तो तिसृणाम् बना।

इस प्रकार से इकारांत शब्द हुये।

अब ईकारांत स्त्रीलिंग नदी शब्द है।

स्त्रीलिंग के ईकारांत और ऊकारांत शब्दों को 'नदी' यह संज्ञा हो जाती है ॥२२६॥

नदी + सि

नदी संज्ञक ईकारांत से परे 'सि' का लोप हो जाता है ॥२२७॥

नदी संज्ञक से और अंत ग्रहण की अधिकता से 'नदाद्यञ्जी' इत्यादि सूत्र से किये गये ईकार प्रत्यय से परे सि का लोप हो जाता है।

नदी, नदी + औ 'इवर्णो यमसवर्णे' इत्यादि सूत्र से संधि होकर नद्यौ बना। सम्बोधन में नदी + सि

संबुद्धि सि के आने पर नदी संज्ञक को ह्रस्व हो जाता है ॥२२८॥

पुनः 'ह्रस्व नदी श्रद्धाभ्यः सिर्लोपम्' सूत्र से नदी संज्ञक से संबोधन में सि का लोप हो गया। हे नदि ! हे नद्यौ ! हे नद्यः !

नदी + अम्, नदी + शस्

नदी संज्ञक से परे अम् और शस् के आदि के 'अ' का लोप हो जाता है ॥२२९॥

नदीम्, नदीः। नदी + टा संधि होकर नद्या बना। नदीभ्याम्, नदीभिः नदी + ङे आदि चार विभक्तियाँ हैं।

मही मन्दाकिनी गौरी सखी भागीरथी नदी।
पुरी नारी पुरन्ध्री च सैरन्ध्री सुरसुन्दरी ॥१॥
मृगी वनचरी देवी शर्वरी वरवर्णिनी।
सिंही हैमवती धात्री धरित्रीत्येवमादयः ॥२॥

स्त्रीशब्दस्य तु भेदः। सौ—

स्त्री नदीवत् ॥२३०॥

स्त्रीशब्दो नदीवद्भवति विभक्तौ परतः। स्त्रीशब्दस्य पृथक्नदीसंज्ञाकरणं किमर्थं ? ह्रस्वश्च ङ्वति वा इति सूत्रोक्तविकल्पनिषेधार्थम्। स्त्री।

स्त्री च ॥२३१॥

स्त्रीशब्दौ धातुवद्भवति विभक्तिस्वरे परे। स्त्रियौ। स्त्रियः। हे स्त्रि। हे स्त्रियौ। हे स्त्रियः।

वाम्शसोः ॥२३२॥

'नद्या ऐ आसासाम्' इस २२२वें सूत्र से ङे को ऐ ङसि को आस्, ङस् को आस् और ङि को आम् आदेश हो जाता है पुनः 'इवर्णो यमसवर्णे' इत्यादि से संधि होकर नद्यै, नद्याः, नद्याः, नद्याम् बना।

नदी	नद्यौ	नद्यः	नद्यै	नदीभ्याम्	नदीभ्यः
हे नदि !	हे नद्यौ !	हे नद्यः !	नद्याः	नदीभ्याम्	नदीभ्यः
नदीम्	नद्यौ	नदीः	नद्याः	नद्योः	नदीनाम्
नद्या	नदीभ्याम्	नदीभिः	नद्याम्	नद्योः	नदीषु

इसी प्रकार से गौरी, गांधारी आदि शब्दों के रूप चलेंगे।

श्लोकार्थ—मही, मंदाकिनी, गौरी, सखी, भागीरथी, नदी, पुरी, नारी, पुरन्ध्री, सैरन्ध्री, सुरसुन्दरी, मृगी, वनेचरी, देवी, शर्वरी, वरवर्णिनी, सिंही, हैमवती, धात्री, धरित्री इन शब्दों को आदि में लेकर बहुत से शब्द हैं जो नदीसंज्ञक हैं और नदीवत् चलते हैं ॥१-२॥

स्त्री शब्द में कुछ भेद है।

स्त्री + सि

विभक्तियों के आने पर स्त्री शब्द नदीवत् हो जाता है ॥२३०॥

स्त्री शब्द को नदी संज्ञा पृथक् रूप से क्यों की ? 'ह्रस्वश्च ङ्वति वा' २२१वें सूत्र में कहे गये विकल्प का निषेध करने के लिये। स्त्री + सि—सि का लोप होकर स्त्री।

स्त्री + औ

स्वर वाली विभक्ति के आने पर स्त्री शब्द धातुवत् हो जाता है ॥२३१॥

स्त्री शब्द को धातुवत् कर लेने के बाद 'ईदूतोरियुवौ स्वरे' इस १८९वें सूत्र से धातु के ईकार ऊकार को इय् उव् आदेश हो जाता है। अतः स्त्रिय् + औ = स्त्रियौ, स्त्रियः बन गया।

संबोधन में ह्रस्व होकर हे स्त्रि ! आदि।

स्त्री + अम्, स्त्री + शस्

अम् शस् विभक्ति के आने पर स्त्री शब्द धातुवत् विकल्प से होता है ॥२३२॥

स्त्रीशब्दो वा धातुवद्भवति अम्शसोः परतः । स्त्रीम्, स्त्रियम् । स्त्रियौ । स्त्रीः, स्त्रियः । स्त्रिया । स्त्रीभ्याम् । स्त्रीभिः । स्त्रियै । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्रियाः । स्त्रीभ्याम् । स्त्रीभ्यः । स्त्रियाः । स्त्रियोः । स्त्रीणाम् । स्त्रियां । स्त्रियोः । स्त्रीषु ॥ श्रीशब्दस्य तु भेदः । श्रीः । ईदूतोरियुवौ स्वरे इति स्वरादावियादेशः । श्रियौ । श्रियः । अनित्यनदीत्वात्संबुद्धौ ह्रस्वो नास्ति । हे श्रीः । हे श्रियौ । हे श्रियः । श्रियम् । श्रियौ । श्रियः । श्रिया । श्रीभ्याम् । श्रीभिः । ङवत्सु—नद्या ऐआसासाम् । पञ्चादीदूतोरियुवौ स्वरे । नदीपक्षे ऐआसादयः । श्रियै, श्रिये । श्रीभ्याम् । श्रीभ्यः । श्रियाः, श्रियः । श्रीभ्याम् । श्रीभ्यः । श्रियाः, श्रियः । श्रियोः । आमि ।

स्त्याख्यावियुवौ वामि ॥२३३ ॥

स्त्याख्यावियुवस्थानिनौ आमि परे वा नदीसंज्ञौ भवतः । सिद्धे सत्यारम्भो नियमाय । किं नदीवत्कार्यं आमि च नुः इति नुरागमः । अन्यत्र "ईदूतोरियुवौ स्वरे" इति इय् उव् । श्रीणाम्, श्रियाम् । श्रियाम्, श्रियि । श्रियोः । श्रीषु । लक्ष्मीशब्दस्य तु भेदः । लक्ष दर्शनाङ्कनयोः ।

धातुवत् होने से स्त्रियम् और स्त्रियः बना तथा नदीसंज्ञक में 'अम् शसोरादिर्लोपम्' से 'अ' का लोप होकर स्त्रीम्, स्त्रीः बना । स्त्री + टा = स्त्रिया । स्त्री + ङे, ङसि आदि । 'ह्रस्वश्च ङवति' इस सूत्र से ङे आदि के आने पर विकल्प से नदी संज्ञा होती थी किन्तु इस विकल्प को ही बाधित करने के लिये 'स्त्री नदीवत्' यह २३०वाँ सूत्र लगा था अतः यहाँ विकल्प का निषेध होने से स्त्री शब्द में ङे आदि के आने पर धातुवत् कार्य होकर इय् भी हुआ और नदी संज्ञा होने से विभक्तियों को ऐ आस् आस् आम् भी हुआ तो स्त्रिय् + ऐ = स्त्रियै स्त्रिय् + आस् = स्त्रियाः, स्त्रियाः, स्त्रियाम् बन गया । सर्वत्र स्वर वाली विभक्ति के आने पर ई को इय् हुआ है ।

स्त्री	स्त्रियौ	स्त्रियः	स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः
हे स्त्रि !	हे स्त्रियौ !	हे स्त्रियः !	स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः
स्त्रीम्, स्त्रियम्	स्त्रियौ	स्त्रीः, स्त्रियः	स्त्रियाः	स्त्रियोः	स्त्रीणाम्
स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः	स्त्रियाम्	स्त्रियोः	स्त्रीषु

श्री शब्द में कुछ भेद हैं ।

श्री + सि = श्रीः

श्री + औ 'ईदूतोरियुवौ स्वरे' इस सूत्र से इय् आदेश होकर श्रियौ, श्रियः आदि । संबोधन में —श्री + सि श्री शब्द की नदी संज्ञा अनित्य है; अतः संबोधन में ह्रस्व नहीं होगा अतः हे श्रीः ! बना ।

श्री + ङे, ङसि आदि ।

नदी संज्ञा होने पर ऐ, आस्, आस्, आम् आदेश होकर इय् आदेश हो जाता है । तब 'श्रियै' और जब नदी संज्ञा नहीं हुई इय् होकर श्रिये बना ।

श्री + आम्

आम् विभक्ति के आने पर स्त्रीलिंग में इय् उव् स्थानीय शब्दों की नदी संज्ञा विकल्प से होती है ॥२३३ ॥

किसी कार्य के सिद्ध होने पर भी जो पुनः सूत्र का आरंभ होता है वह नियम के लिये होता है । नदीवत् कार्य क्या है ? 'आमि च नुः' इस सूत्र से नु का आगम होकर न् को ण् होकर श्रीणाम् बना, अन्यत्र इय् आगम होकर श्रियाम् बना । श्री + ङि नदी संज्ञा होने पर श्रियाम्, अन्यत्र श्रियि बनेगा ।

श्रीः	श्रियौ	श्रियः	श्रियै, श्रिये	श्रीभ्याम्	श्रीभ्यः
हे श्रीः !	हे श्रियौ !	हे श्रियः !	श्रियाः, श्रियः	श्रीभ्याम्	श्रीभ्यः
श्रियम्	श्रियौ	श्रियः	श्रियाः, श्रियः	श्रियोः	श्रीणाम्, श्रियाम्
श्रिया	श्रीभ्याम्	श्रीभिः	श्रियाम्, श्रियि	श्रियोः	श्रीषु ।

लक्षेरीमोऽन्तश्च ॥२३४॥

लक्षधातोरीप्रत्ययो भवति मोऽन्तश्च ॥ ईकारोऽन्ते यस्य लिङ्गस्येति वचनात् ईकारान्तात्सिरिति सेर्लोपो न भवति।

अवीलक्ष्मीतरीतन्त्री-ह्रीधीश्रीणामुणादितः।
अपि स्त्रीलिङ्गजातीनां सिलोपो न कदाचन ॥१॥

लक्ष्मीः। लक्ष्म्यौ। लक्ष्म्यः। अन्यत्र नदीशब्दवत्। इति ईकारान्ताः। उकारान्तः स्त्रीलिङ्गश्चक्षुशब्दः। स च रुचिशब्दवत्। विशेषस्तु उत ओत्वमवादेशश्च। चक्षुः। चक्षू। चक्षवः। हे चक्षो। हे चक्षू। हे चक्षवः। चक्षुम्। चक्षू। चक्षूः। चक्ष्वा। चक्षुभ्याम्। चक्षुभिः। ह्रस्वश्च ङवतीति वा नदीवद्भावादैआसादयः। पक्षे भानुशब्दवत्। चक्ष्वै, चक्षवे। चक्षुभ्याम्। चक्षुभ्यः। चक्ष्वाः, चक्षोः। चक्षुभ्याम्। चक्षुभ्यः। चक्ष्वाः, चक्षोः। चक्ष्वोः। चक्षूणाम्। चक्ष्वाम्, चक्षौ। चक्ष्वोः। चक्षुषु। एवं उडु तनु प्रियङ्गु स्नायु ऊरु करेणु धेनुप्रभृतयः। इत्युकारान्ताः॥ ऊकारान्तः स्त्रीलिङ्गो वधूशब्दः। सौ—अनीकारान्तत्वात् ईकारान्तात्सिरिति सेर्लोपो न भवति। वधूः। वध्वौ। वध्वः। संबुद्धौ ह्रस्वः। हे वधु। हे वध्वौ। हे वध्वः। अन्यत्र नदीवत्। एवं अलाबू कच्छू यवागू चमू तण्डू कमण्डलू कद्रू कण्डू कासूप्रभृतयः भ्रूशब्दस्य तु भेदः। सौ-भ्रूः।

लक्ष्मी शब्द में कुछ भेद है।

'लक्ष' धातु देखने और गिनती करने अर्थ में है।

लक्ष धातु से 'ई' प्रत्यय होकर अंत में म् का आगम हो जाता है ॥२३४॥

इस नियम से लक्ष्मी बना।

ईकारांत शब्द से सि विभक्ति के आने पर 'ईकारांतात्सिः' इस सूत्र से सि का लोप होता था सो नहीं हुआ है अतः लक्ष्मीः बना।

श्लोकार्थ—अवी, लक्ष्मी, तरी, तन्त्री, ह्री, धी, श्री शब्दों में उणादि गण के स्त्रीलिंग वाची शब्दों में कदाचित् भी सि का लोप नहीं होता है।

लक्ष्मीः	लक्ष्म्यौ	लक्ष्म्यः	लक्ष्म्यै	लक्ष्मीभ्यां	लक्ष्मीभ्यः
हे लक्ष्मि !	हे लक्ष्म्यौ !	हे लक्ष्म्यः !	लक्ष्म्याः	लक्ष्मीभ्याम्	लक्ष्मीभ्यः
लक्ष्मीम्	लक्ष्म्यौ	लक्ष्मीः	लक्ष्म्याः	लक्ष्म्योः	लक्ष्मीणाम्
लक्ष्म्या	लक्ष्मीभ्यां	लक्ष्मीभिः	लक्ष्म्याम्	लक्ष्म्योः	लक्ष्मीषु

र ष के बाद पवर्ग का अन्तर होने पर भी न को ण होता है।

ईकारांत शब्द पूर्ण हुये।

अब उकारांत स्त्रीलिंग चक्षु शब्द है।

चक्षु + सि। चक्षुः, चक्षू, चक्षवः।

यह शब्द रुचि शब्द के समान चलेगा। विशेष इतना है कि 'उ' को 'ओ' और 'ओ' को पुनः अव् आदेश हो जाता है अतः हे चक्षो ! बनेगा।

चक्षु + ङे, ङसि आदि 'ह्रस्वश्च ङवति' सूत्र से नदी संज्ञावत् कार्य करने से ऐ आस् आस् आम् हो जाता है अन्यथा भानु शब्दवत् रूप चलता है।

चक्षुः	चक्षू	चक्षवः	चक्ष्वै, चक्षवे	चक्षुभ्याम्	चक्षुभ्यः
हे चक्षो !	हे चक्षू !	हे चक्षवः	चक्ष्वाः, चक्षोः	चक्षुभ्याम्	चक्षुभ्यः
चक्षुम्	चक्षू	चक्षूः	चक्ष्वाः, चक्षोः	चक्ष्वोः	चक्षूनाम्
चक्ष्वा	चक्षुभ्याम्	चक्षुभिः	चक्ष्वाम्, चक्षौ	चक्ष्वोः	चक्षुषु

भूर्धातुवत् ॥२३५ ॥

भूशब्दो धातुवद्भवति विभक्तिस्वरे परे । भुवौ । भुवः । सम्बोधनेऽप्यनित्यनदीत्वात् संबुद्धौ ह्रस्वो नास्ति । अन्यत्र नदीवत् । हे भूः । हे भुवौ । हे भुवः । भुवम् । भुवौ भुवः । भुवा । भूभ्याम् । भूभिः । भुवे, भुवै । भूभ्याम् । भूभ्यः । भुवाः, भुवः । भूभ्याम् । भूभ्यः । भुवाः, भुवः । भुवोः । भूणाम् । भुवि, भुवाम् । भुवोः । भूषु ॥ इत्यूकारान्ताः ॥ ऋकारान्तः स्त्रीलिङ्गो मातृशब्दः । माता । मातारौ । मातरः । हे मातः । हे मातरौ । हे मातरः । मातरम् । मातरौ । मातॄः । स्त्रीलिङ्गत्वात्सस्य नत्वाभावः । इत्यादि । अन्यत्र पितृशब्दवत् । एवं दुहितृ ननान्दृप्रभृतयः । स्वस्रादीनां च पूर्ववत् । स्वस्रादयः के ?

इसी प्रकार से उडु, तनु, प्रियंगु, स्नायु, ऊरू, करेणु, धेनु आदि शब्द चलते हैं । इस प्रकार उकारांत शब्द हुये ।

ऊकारांत स्त्रीलिंग वधू शब्द है ।

वधू + सि, ईकारांत न होने से 'ईकारांतात्सिः' इस सूत्र से सि का लोप न होने से वधूः बना । संबोधन में ह्रस्व होकर हे वधु ! अन्यत्र नदीवत् ।

वधूः	वध्वौ	वध्वः	वध्वै	वधूभ्याम्	वधूभ्यः
हे वधु !	हे वध्वौ !	हे वध्वः !	वध्वाः	वधूभ्याम्	वधूभ्यः
वधूम्	वध्वौ	वधूः	वध्वाः	वध्वोः	वधूनाम्
वध्वा	वधूभ्याम्	वधूभिः	वध्वाम्	वध्वोः	वधूषु

इसी प्रकार से अलाबू आदि शब्द चलेंगे ।

भू + सि = भूः । भू + औ

स्वर वाली विभक्ति के आने पर भू शब्द धातुवत् हो जाता है ॥२३५ ॥

भुवौ, भुवः । भू शब्द की भी नदी संज्ञा अनित्य है अतः संबोधन में ह्रस्व नहीं होता है अतः हे भूः ! हे भुवौ ! हे भुवः ! नदी संज्ञा के पक्ष में ङे आदि विभक्ति को क्रमशः ऐ आस् आस् आम् होकर ऊ को उव् होगा । अतः

भूः	भुवौ	भुवः	भुवै, भुवे	भूभ्याम्	भूभ्यः
हे भूः ।	हे भुवौ !	हे भुवः !	भुवाः, भुवः	भूभ्याम्	भूभ्यः
भुवम्	भुवौ	भुवः	भुवाः, भुवः	भुवोः	भुवाम्, भूणाम्
भुवा	भूभ्याम्	भूभिः	भुवाम्, भुवि	भुवोः	भूषु

इस प्रकार से उकारांत शब्द हो गये । ऋकारांत स्त्रीलिंग मातृ शब्द है ।

मातृ + सि 'आसौ सिर्लोपश्च' इस सूत्र से ऋ को आ होकर सि का लोप हो गया तो माता बना । यह शब्द पितृ शब्द के समान ही चलता है केवल शस् में स् को न् नहीं होता है अतः मातॄः बना ।

माता	मातरौ	मातरः	मात्रे	मातृभ्याम्	मातृभ्यः
हे मातः !	हे मातरौ !	हे मातरः !	मातुः	मातृभ्याम्	मातृभ्यः
मातरम्	मातरौ	मातॄः	मातुः	मात्रोः	मातॄणाम्
मात्रा	मातृभ्याम्	मातृभिः	मातरि	मात्रोः	मातृषु

इसी प्रकार से दुहितृ, ननान्दृ आदि शब्द चलते हैं । स्वसृ आदि शब्द भी पूर्ववत् चलते हैं । स्वसृ आदि शब्द भी पूर्ववत् चलते हैं । स्वसृ आदि में आदि शब्द से कितने रूप आवेंगे ?

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा।
याता मातेति सप्तैते स्वस्रादिष्वव्यगीषत ॥१॥

शसादौ मातृशब्दवत्। इति ऋकारान्ताः। ऋकार लृकार ॡकार एकारान्ता अप्रसिद्धाः। ऐकारान्तः स्त्रीलिङ्गे सुरैशब्दः। स च रैशब्दवत्। सुराः सुरायौ सुरायः। सम्बोधनेऽपि तद्वत्। सुरायम् सुरायौ सुरायः। सुराया सुराभ्याम् सुराभिः। सुराये सुराभ्याम् सुराभ्यः। सुरायः सुराभ्याम् सुराभ्यः। सुरायः सुरायोः सुरायाम्। सुरायि सुरायोः सुरासु। इत्यैकारान्ताः। ओकारान्तः स्त्रीलिङ्गे गोशब्दः। स च पूर्ववत्। औकारान्तः स्त्रीलिङ्गे नौशब्दः। स च ग्लौशब्दवत्। इत्यौकारान्ताः।

इति स्वरान्ताः स्त्रीलिङ्गाः ❑

अथ स्वरान्ता नपुंसकलिङ्गा उच्यन्ते

अकारान्तो नपुंसकलिङ्गः कुलशब्दः। सौ—

अकारादसम्बुद्धौ मुश्च ॥२३६॥

अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोर्लोपो भवति मुरागमश्चासम्बुद्धौ। कुलं।

श्लोकार्थ—स्वसृ, तिसृ, चतसृ, ननान्दृ, दुहितृ, यातृ, मातृ ये सात शब्द यहाँ आदि शब्द से लिये गये हैं।

इनमें भी शस् विभक्ति में मातृ शब्दवत् रूप बनते हैं। इस प्रकार से ऋकारांत शब्द हुए।

ऋकारांत, ॡकारांत और लृकारांत और एकारांत शब्द अप्रसिद्ध हैं। अब ऐकारांत स्त्रीलिंग 'सुरै' शब्द है।

सुरै + सि है। 'रैः' इस सूत्र से व्यंजनवाली विभक्ति के आने पर ऐ को आ हो जाता है तब 'राः' बना।

सुराः	सुरायौ	सुरायः	सुराये	सुराभ्याम्	सुराभ्यः
हे सुराः !	हे सुरायौ !	हे सुरायः !	सुरायः	सुराभ्याम्	सुराभ्यः
सुरायम्	सुरायौ	सुरायः	सुरायः	सुरायोः	सुरायाम्
सुराया	सुराभ्याम्	सुराभिः	सुरायि	सुरायोः	सुरासु

इस प्रकार से ऐकारांत शब्द हुए। अब ओकारांत यो शब्द है जो कि पूर्ववत् चलता है। औकारांत स्त्रीलिंग 'नौ' शब्द है। यह ग्लौ शब्दवत् चलता है। इस प्रकार से औकारांत शब्द हुये।

स्वरांत स्त्रीलिंग प्रकरण पूर्ण हुआ। ❑

अब स्वरांत नपुंसकलिंग प्रकरण कहा जाता है।

अकारांत नपुंसकलिंग कुल शब्द है।

कुल + सि, कुल + अम्

अकारांत नपुंसकलिंग से परे संबुद्धि को छोड़कर सि, अम् विभक्ति का लोप हो जाता है और मु का आगम हो जाता है ॥२३६॥

एक को हटाकर उसी स्थान पर दूसरे प्रत्यय के आने पर उसे आदेश कहते हैं एवं पृथक् रूप से किसी प्रत्यय के आने को आगम कहते हैं। आदेश शत्रुवत् माना गया है एवं आगम मित्रवत् माना गया है।

कुल + मु 'उ' का अनुबंध लोप होकर कुलम् बना।

कुल + औ

औरीम् ॥२३७॥

नपुंसकलिङ्गात्परः औरीमापद्यते । कुले ।

जस्शसौ नपुंसके ॥२३८॥

जस्शसौ नपुंसकलिङ्गे घुट्संज्ञौ भवतः ।

जस्शसोः शिः ॥२३९॥

सर्वनपुंसकलिङ्गात्परयोर्जस्शसोः शिर्भवति । शकारः सर्वादिशार्थः ।

घुट्स्वराद्घुटि नुः ॥२४०॥

घुटः पूर्वः स्वरात्परश्च नपुंसकलिङ्गे घुटि परे नुरागमो भवति । घुटि चासम्बुद्धौ इति दीर्घः । कुलानि । हे कुल । हे कुले । हे कुलानि । पुनरपि । कुलम् । कुले । कुलानि । कुलेन । कुलाभ्याम् । कुलैः । अतः परं पुरुषशब्दवत् ॥ एवं दान धन धान्य मित्र वस्त्र वसन वदन नयन पुण्य पाप सुख दुःखादयः । सर्वनाम्नः प्रथमाद्वितीययोः कुलशब्दवत् । सर्वम् । सर्वे । सर्वाणि । पुनरपि । अन्यत्र पुंलिङ्गवत् । अन्यशब्दस्य तु भेदः ।

नपुंसक लिंग से परे औ को 'ई' हो जाता है ॥२३७॥

कुल + ई = कुले बना। कुल + जस्, कुल + शस्

नपुंसक लिंग में जस् शस् को घुट संज्ञा हो जाती है ॥२३८॥

नपुंसक लिंग से परे जस् शस् को शि आदेश हो जाता है ॥२३९॥

यहाँ शकार सर्वादेश के लिये है अर्थात् श् का अनुबन्ध लोप हो जाता है एवं श के निमित्त से यह आदेश संपूर्ण विभक्ति को हो जाता है उसके एक अंश को नहीं अतः—

कुल + इ

पूर्व के घुट् से परे नपुंसक लिंग की घुट् विभक्ति के आने पर 'नु' का आगम हो जाता है ॥२४०॥

तब कुल न् इ हुआ पुनः 'घुटि चासंबुद्धौ' इस १७७वें सूत्र से अ को दीर्घ होकर कुलानि बना। संबोधन में कुल + सि 'ह्रस्वनदीश्रद्धाभ्यः' इत्यादि सूत्र से सि का लोप होकर हे कुल ! बना। आगे पुरुषवत् समझना।

कुलम्	कुले	कुलानि	कुलाय	कुलाभ्याम्	कुलेभ्यः
हे कुल !	हे कुले !	हे कुलानि !	कुलात्	कुलाभ्याम्	कुलेभ्यः
कुलम्	कुले	कुलानि	कुलस्य	कुलयोः	कुलानाम्
कुलेन	कुलाभ्याम्	कुलैः	कुले	कुलयोः	कुलेषु

इसी प्रकार से दान आदि उपर्युक्त शब्द नपुंसकलिंग में चलते हैं।

सर्वनाम संज्ञक शब्दों में भी प्रथमा द्वितीया विभक्ति में कुल शब्द के समान एवं तृतीया से सभी पुल्लिंग सर्वनाम के ही समान समझना। जैसे—

सर्वम्	सर्वे	सर्वाणि	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
हे सर्व !	हे सर्वे !	हे सर्वाणि !	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
सर्वम्	सर्वे	सर्वाणि	सर्वस्य	सर्वयोः	सर्वेषाम्
सर्वेण	सर्वाभ्याम्	सर्वैः	सर्वस्मिन्	सर्वयोः	सर्वेषु

अन्य शब्द में कुछ भेद है।

अन्य + सि, अन्य + अम्

अन्यादेस्तु तुः ॥२४१॥

अन्यादेर्नपुंसकलिङ्गात्परयोः स्यमोर्लोपो भवति तुरागमश्च। द्वितीयस्तुशब्दः किमर्थम् ? असम्बुद्ध्यधिकारनिवृत्त्यर्थम्।

वा विरामे ॥२४२॥

विरामे धुटां प्रथमस्तृतीयो वा भवति। अन्यत्, अन्यद्। अन्ये। अन्यानि। हे अन्यद्, हे अन्यत्। हे अन्ये। हे अन्यानि॥ शेषं पुंवत्। एवमेकतरं वर्जयित्वान्यतरप्रभृतयः।

नैकतरस्य ॥२४३॥

एकतरशब्दस्य नपुंसकलिङ्गे तुरागमो न भवति। एकतरम्। एकतरे। एकतराणि। हे एकतर। हे एकतरे। हे एकतराणि। पुनरपि। अन्यत्र सर्वशब्दवत्। इत्यकारान्ताः। आकारान्तो नपुंसकलिंगः सोमपाशब्दः।

स्वरे ह्रस्वो[1] नपुंसके ॥२४४॥

नपुंसक लिंग में अन्य आदि से परे सि और अम् का लोप होकर 'तु' का आगम हो जाता है ॥२४१॥

उ का अनुबन्ध लोप होकर अन्यत् बना। सूत्र में दूसरा तु शब्द किसलिये है ? असम्बुद्धि अधिकार की निवृत्ति के लिये है।

विराम में धुट् को तृतीय अक्षर विकल्प से होता है ॥२४२॥

अन्यत्, अन्यद्	अन्ये	अन्यानि	अन्यस्मै	अन्याभ्याम्	अन्येभ्यः
हे अन्यत् !, हे अन्यद् !	हे अन्ये !	अन्यानि !	अन्यस्मात्, द्	अन्याभ्याम्	अन्येभ्यः
अन्यत्, अन्यद्	अन्ये	अन्यानि	अन्यस्य	अन्ययोः	अन्येषाम्
अन्येन	अन्याभ्याम्	अन्यैः	अन्यस्मिन्	अन्ययोः	अन्येषु

इस प्रकार से एकतर को छोड़कर अन्यतर आदि शब्द चलते हैं। एकतर + सि, एकतर + अम्

एकतर शब्द से परे सि, अम् विभक्ति के आने पर तु का आगम नहीं होता है ॥२४३॥

अतः मु का आगम होकर एकतरम् एकतरे एकतराणि।

अकारांत शब्द हुये। अब आकारांत नपुंसकलिंग 'सोमपा' शब्द है। नपुंसक लिंग में वर्तमान स्वर ह्रस्व हो जाता है ॥२४४॥

अतः सोमप + सि है।

'अकारादसंबुद्धौ मुश्च' २३६वें सूत्र से अकारांत नपुंसक लिंग से परे 'सि, अम्' का लोप होकर 'मु' का आगम हो गया तब सोमपम् बना।

सोमपम्	सोमपे	सोमपानि	सोमपाय	सोमपाभ्याम्	सोमपेभ्यः
हे सोमप !	हे सोमपे !	हे सोमपानि !	सोमपात्, द्	सोमपाभ्याम्	सोमपेभ्यः
सोमपम्	सोमपे	सोमपानि	सोमपस्य	सोमपयोः	सोमपानाम्
सोमपेन	सोमपाभ्याम्	सोमपैः	सोमपे	सोमपयोः	सोमपेषु

---

१. पर्जन्यवल्लक्षणप्रवृत्तया ह्रस्वस्यापि ह्रस्वः। काण्डे कुण्ड्ये काण्डीभूतं कुलमित्यत्र नपुंसके इति लिङ्गोपादानात्र भवति। युगवरत्राय युगवरत्रार्थमित्यत्रासिद्धं बहिरङ्गमन्तरङ्गे इति न भवति॥

नपुंसकलिङ्गे वर्तमानः स्वरो ह्रस्वो भवति। सोमपम्। सोमपे। सोमपानि। हे सोमप। हे सोमपे! हे सोमपानि। पुनरपि। सोमपं। सोमपे। सोमपानि। शेषं पुल्लिङ्गवत्। इत्याकारान्ताः। इकारान्तो नपुंसकलिङ्गो वारिशब्दः। सौ—

नपुंसकात्स्यमोर्लोपो न च तदुक्तं ॥२४५॥

नपुंसकात्परयोः स्यमोर्लोपो भवति तदुक्तं कार्यं न भवति। वारि।

नामिनः स्वरे ॥२४६॥

नाम्यन्तान्नपुंसकलिङ्गादुत्तरयोः भवति स्वरे परे। औरीमिति ईत्वं णत्वञ्च। वारिणी। जसि पूर्ववत्। नुरागमः। सामान्यविशेषयोर्विशेषो विधिर्बलवान् इति न्यायात्। उक्तञ्च।

सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥१॥

धुट्स्वराद्घुटि नुः इत्यनेन सूत्रेण नुरागमो भवतीत्यर्थः॥

इन्हन्पूषार्यम्णां शौ च ॥२४७॥

इन् हन् पूषन् अर्यमन् इत्येतेषामुपधाया दीर्घो भवति नपुंसकलिङ्गे जस्शसोरादेशे शौ चासम्बुद्धौ सौ च परे। वारीणि।

इस प्रकार से आकारांत शब्द हुये। अब इकारांत नपुंसक लिंग वारि शब्द है।

वारि + सि, वारि + अम्

नामि है अन्त में जिनके ऐसे शब्दों में नपुंसकलिंग से परे सि, अम् का लोप होकर 'नु' तु का आगम नहीं होता है ॥२४५॥

अतः वारि, वारि बना। वारि + औ

नाम्यंत नपुंसक लिंग से परे नु का आगम हो जाता है स्वर वाली विभक्ति के आने पर ॥२४६॥

अतः 'औरीम्' सूत्र से औ को 'ई' एवं रषृवर्णेभ्यः इत्यादि सूत्र के निमित्त से न् को ण् होकर वारिणी बना।

जस् विभक्ति के आने पर पूर्ववत् जस् को 'इ' और नु का आगम तथा 'घुटि चासंबुद्धौ' से दीर्घ प्राप्त था। यद्यपि यहाँ 'नामिनः स्वरे' सूत्र से नु का आगम हो सकता था फिर भी सामान्य और विशेष में विशेष विधि बलवान होती है इस न्याय से 'धुट् स्वराद् घुटि नः' २४०वें सूत्र से जस्, शस् के आने पर नु का आगम हुआ है। इसी बात को श्लोक में भी कहा है—

श्लोकार्थ—सामान्य शास्त्र की अपेक्षा से निश्चित ही विशेष शास्त्र बलवान् होता है अथवा प्रायः करके व्याकरण में पर सूत्र की अपेक्षा पूर्व सूत्र बाधित हो जाया करते हैं।

इन् हन् पूषन् अर्यमन् इन शब्दों की उपधा को दीर्घ हो जाता है नपुंसक लिंग में जस् शस् को शि आदेश होने पर एवं असंबुद्धि सि के आने पर ॥२४७॥

अतः 'वारि न् इ' इसमें न् की उपधा को दीर्घ हो गया पश्चात् 'रषृवर्णेभ्यः' इत्यादि सूत्र से न् को ण् होकर वारीणि बना।

संबोधन में वारि + सि

नाम्यन्तचतुरां वा[1] ॥२४८॥

नाम्यन्तस्य नपुंसकलिंगस्य चत्वार् शब्दस्य च यदुक्तं कार्यं तद् वा भवति सम्बुद्धौ परे। प्रत्ययलोपे प्रत्ययलक्षणं न यांति इति न्यायात् हे वारि, हे वारे। हे वारिणी। हे वारीणि। पुनरपिवारि। वारिणी। वारीणि। वारिणा। वारिभ्याम्। वारिभिः। वारिणे। वारिभ्याम्। वारिभ्यः। वारिणः। इत्यादि। आमि। 'नामिनः स्वरे' प्राप्ते सति सामान्यविशेषयोर्विशेषो विधिर्बलवान् इति न्यायात् आमि च नुरिति नुरागमो भवति। दीर्घमामि सनौ। वारीणाम्। वारिणि। वारिणोः। वारिषु॥ अस्थि दधि सक्थि अक्षिशब्दानां प्रथमाद्वितीययोर्वारिशब्दवत्। अस्थि। अस्थिनी। अस्थीनि। पुनरपि-अस्थि। अस्थिनी। अस्थीनि। टादौ—

अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ ॥२४९॥

नपुंसकलिंगानामस्थ्यादीनामन्तोऽन् भवति टादौ स्वरे परे।

अवर्णसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ[2] ॥२५०॥

नपुंसक लिंग में नाम्यन्त और चत्वार् शब्द से परे जो कार्य कहा गया है वह विकल्प से होता है ॥२४८॥

सम्बोधन में—अतः सि का लोप होकर हे वारि बना इसमें सि प्रत्यय का लोप होने से प्रत्यय लक्षण कोई कार्य नहीं होता है इस न्याय से एक बार हे वारि ! पुनः 'संबुद्धौ च' सूत्र से इ को ए हो गया।

वारि + आम् 'नामिनः स्वरे' से नु का आगम प्राप्त था किन्तु सामान्य और विशेष में विशेष विधि ही बलवान् होती है। इस न्याय से 'आमि च नुः' सूत्र से नु का आगम होकर 'दीर्घ होकर वारीणाम्' बना।

वारि	वारिणी	वारीणि	वारिणे	वारिभ्याम्	वारिभ्यः
हे वारि, वारे !	हे वारिणी !	हे वारीणि !	वारिणः	वारिभ्याम्	वारिभ्यः
वारि	वारिणी	वारीणि	वारिणः	वारिणोः	वारीणाम्
वारिणा	वारिभ्याम्	वारिभिः	वारिणि	वारिणोः	वारिषु

आगे अस्थि, सक्थि और अक्षि शब्दों में प्रथमा और द्वितीया विभक्तियों में वारि शब्द के समान है टा आदि विभक्तियों में कुछ भेद है।

टा आदि स्वर वाली विभक्ति के आने पर नपुंसक लिंग में अस्थि आदि के अन्तिम 'इ' को अन् आदेश हो जाता है ॥२४९॥

अतः अस्थन् + आ है।

जिसमें व, म संयुक्त नहीं है ऐसे अस्थन् आदि के अकार का लोप हो जाता है अघुट स्वर के आने पर और अलुप्तवत् होता है। पूर्ववर्ण की विधि होने पर ॥२५०॥

---

१. तदुक्तं च कार्यं किं ? हे वारे इत्यत्र "संबुद्धौ च" इति सूत्रेण एत्वं विकल्पेन भवति॥

२. संयोगादेर्धुट इति सस्य लोपो भवति तस्मात्कारणात् अलुप्तवदिति वचनं।

अवमसंयोगात्परस्य अनोऽकारस्य लोपो भवति अघुटि स्वरे परे स चालुप्तवद्भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये। अस्थ्ना । अस्थिभ्याम्। अस्थिभिः। अस्थ्ने। अस्थिभ्याम्। अस्थिभ्यः। अस्थ्नः। अस्थिभ्याम्। अस्थिभ्यः। अस्थ्नः। अस्थ्नोः। अस्थ्नाम्।

ईङ्योर्वा ॥२५१॥

अवमसंयोगात्परस्य अनोऽकारस्य लोपो भवति वा ईङ्योः नपुंसकलिंगे औकारादेशे ईकारे सप्तम्येकवचने परतः स चालुप्तवद्भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये। अस्थ्नि, अस्थनि। अस्थ्नोः। अस्थिषु। एवं दधि सक्थि अक्षिशब्दाः। शुचिशब्दस्य प्रथमाद्वितीययोर्वारिशब्दवत्। शुचि। शुचिनी। शुचीनि। सम्बुद्धावविशेषः। पुनरपि—शुचि। शुचिनी। शुचीनि।

टादौ भाषितपुंस्कं पुंवद्वा[१] ॥२५२॥

नाम्यन्तं भाषितपुंस्कं नपुंसकलिङ्गं टादौ स्वरे वा पुंवद्भवति।

अस्थन् + आ = अस्थ्ना, अस्थिभ्याम् आदि।

अस्थन् + ङि

ई और ङि के आने पर अन् के अकार का लोप विकल्प से होता है ॥२५१॥

जिसमें व, म संयुक्त नहीं है ऐसे शब्दों से परे औ के ई आदेश वाली ङि विभक्ति के आने पर अन् के अकार का लोप विकल्प से होता है। तब अस्थन् + इ = अस्थ्नि, अस्थनि।

अस्थि	अस्थिनी	अस्थीनि	अस्थ्ने	अस्थिभ्याम्	अस्थिभ्यः
हे अस्थे। हे अस्थि।	हे अस्थिनी!	हे अस्थीनि!	अस्थ्नः	अस्थिभ्याम्	अस्थिभ्यः
अस्थि	अस्थिनी	अस्थीनि	अस्थ्नः	अस्थ्नोः	अस्थ्नाम्
अस्थ्ना	अस्थिभ्याम्	अस्थिभिः	अस्थ्नि, अस्थनि	अस्थ्नोः	अस्थिषु

इसी प्रकार से दधि, सक्थि और अक्षि शब्दों के रूप चलते हैं। यथा—

अक्षि	अक्षिणी	अक्षीणि	अक्ष्णे	अक्षिभ्याम्	अक्षिभ्यः
हे अक्षे, हे अक्षि।	हे अक्षिणी!	हे अक्षीणि!	अक्ष्णः	अक्षिभ्याम्	अक्षिभ्यः
अक्षि	अक्षिणी	अक्षीणि	अक्ष्णः	अक्ष्णोः	अक्ष्णाम्
अक्ष्णा	अक्षिभ्याम्	अक्षिभिः	अक्षिण, अक्षणि	अक्ष्णोः	अक्षिषु

शुचि शब्द के रूप प्रथमा द्वितीया में अक्षिवत् ही चलेंगे। टा आदि विभक्ति के आने पर शुचि शब्द के रूपों में कुछ भेद है।

शुचि + आ

टा आदि स्वर वाली विभक्ति के आने पर नाम्यंत भाषितपुंस्क शब्द, नपुंसक लिंग में विकल्प से पुरुष लिंगवत् हो जाते हैं ॥२५२॥

भाषित पुंस्क किसे कहते हैं ?

---

१. एक एव हि यः शब्दलिंगेषु वर्त्तते। एकमेवार्थमाख्याति तद्धि भाषितपुंसकं।

यन्निमित्तमुपादाय पुंसि लिङ्गे प्रवर्त्तते।
क्लीबवृत्तौ तदेव स्यात्तद्धि भाषितपुंसकम् ॥१॥
शुचि भूमिगतं तोयं शुचिर्नारी पतिव्रता।
शुचिर्धर्मपरो राजा ब्रह्मचारी सदा शुचिः ॥२॥

शुच्या, शुचिना। शुचिभ्यां। शुचिभिः। शुचिने, शुचये। शुचिभ्याम्। शुचिभ्यः। इत्यादि॥ द्विशब्दस्य तु भेदः। त्यदाद्यत्वं औरीमिति ईत्वं च। द्वे। हे द्वे। द्वे। द्वाभ्याम्। द्वाभ्याम्। द्वाभ्याम्। द्वयोः। द्वयोः। त्रिशब्दस्य जस्शसोर्वारिशब्दवत्। त्रीणि। त्रीणि। त्रिभिः। अन्यत्र पुंलिङ्गवत् इति इकारान्ताः। ईकारान्तो नपुंसकलिङ्गो ग्रामणीशब्दः। तस्य स्वरो ह्रस्वो नपुंसके इति ह्रस्वत्वे शुचिशब्दवत्। टादौ भाषितपुंस्कं पुंवद्भावो भवति विकल्पेन। ग्रामणि। ग्रामणिनी। ग्रामणीनि। पुनरपि-ग्रामणि। ग्रामणिनी। ग्रामणीनि। ग्रामणिना। अनेकाक्षरयोस्त्वसंयोगाद् व्यौ इति यत्वम्। ग्रामण्या। ग्रामणिभ्याम्। ग्रामणिभिः। ग्रामणिने। ग्रामणिभ्याम्। ग्रामणिभ्यः। इत्यादि। आमिनुरागमः। दीर्घमामि सनौ इति दीर्घः। ग्रामणीनाम्। पुंवद्भावे। ग्रामण्याम्। ग्रामणिनि। पुंवति—नियो ङिराम् इति आम्। यत्वं पूर्ववत्। ग्रामण्याम्। ग्रामणिनोः, ग्रामण्योः। ग्रामणिषु। सम्बोधने-नाम्यन्तचतुरां वा। हे ग्रामणे, हे ग्रामणि। हे ग्रामणिनी। हे ग्रामणीनि। एवमग्रणी सेनानीप्रभृतयः॥ इति ईकारान्ता। उकारान्तो नपुंसकलिङ्गो वस्तुशब्दः। स च वारिशब्दवत्। वस्तु। वस्तुनी। वस्तूनि। सम्बोधने—हे वस्तु, हे वस्तो। हे वस्तुनी। हे वस्तूनि। पुनरपि। टादौ स्वरे परे नित्यं नपुंसकं। आमि परे-आमि च नुः। दीर्घमामि सनौ इति दीर्घः। वस्तूनां। वस्तुनि। वस्तुनोः। वस्तुषु। मृदुशब्दस्य प्रथमाद्वितीययोर्वारिशब्दवत्। मृदु।

श्लोकार्थ—जो शब्द जिस निमित्त को लेकर के पुरुष लिंग में प्रवृत्ति करता है और वही नपुंसक लिंग में भी चल जाता है उसे भाषित पुंस्क कहते हैं॥

अर्थात् जो शब्द स्वयं में पुल्लिग हैं, किन्तु निमित्त से नपुंसक लिंग में भी चल जाता है वह भाषित पुंस्क है। उदाहरण के लिए देखिये।

श्लोकार्थ—भूमिगत जल पवित्र है, पतिव्रता स्त्री पवित्र है, धर्म में तत्पर राजा पवित्र है एवं ब्रह्मचारी जन सदा पवित्र हैं॥

इस श्लोक में एक शुचि शब्द तीन के निमित्त या विशेषण से तीन लिंगों में बदल गया। जैसे—तोय शब्द नपुंसक का विशेषण 'शुचि' शब्द नपुंसक लिंग हो गया। पतिव्रता नारी का विशेषण 'शुचिः' शब्द स्त्रीलिंग हो गया और राजा का विशेषण 'शुचिः' शब्द पुल्लिग में चल गया है।

शुचि + टा एक बार पुल्लिगवत् में 'अस्त्रियां टा ना' सूत्र से 'ना' हुआ दूसरी बार 'नामिनः स्वरे' से न् होकर शुचिना बना।

शुचि + ङे पुल्लिग में 'ङे' सूत्र से इ को ए होकर शुचये अन्यथा शुचिने बना।

शुचि	शुचिनी	शुचीनि	शुचये, शुचिने	शुचिभ्याम्	शुचिभ्यः
हे शुचे, शुचि !	हे शुचिनी !	हे शुचीनि !	शुचेः, शुचिनः	शुचिभ्याम्	शुचिभ्यः
शुचि	शुचिनी	शुचीनि	शुचेः, शुचिनः	शुच्योः, शुचिनोः	शुचीनाम्
शुचिना	शुचिभ्याम्	शुचिभिः	शुचौ, शुचिनि	शुच्योः, शुचिनोः	शुचिषु

---

१. अत्र। त्रिषु लिंगेषु वर्तते। एकमेवार्थमाख्याति तद्धि भाषितपुंसकं। इति पाठोस्ति। उत्तरपद्यस्योदाहरणैरयमेव समीचीनो भाति।

मृदुनी । मृदूनि । पुनरपि । टादौ स्वरे परे भाषित-पुंस्कं पुंवद्वा इति विकल्पेन पुंवद्भावः । शुचिवत् । मृदुना २ । मृदुभ्यां । मृदुभिः । इत्यादि । एवं पटु लघु गुरु प्रभृतयः । इत्युकारान्ताः । ऊकारान्तो नपुंसकलिङ्गः खलपूशब्दः । तस्य स्वरो ह्रस्वो नपुंसके इति ह्रस्वत्वे सेनानीशब्दवत् । खलपु । खलपुनी । खलपूनि । पुनरपि । टादौ भाषितपुंस्कमिति विकल्पेन यत्र पुंवद्भावस्तत्र सेनानीशब्दवत् । खलपुना, खलप्वा । खलपूभ्यां । खलपूभिः । इत्यादि । एवं सरलू । काण्डलू प्रभृतयः । इत्यूकारान्ता । ऋकारान्तो नपुंसकलिङ्गः कर्तृशब्दः । तस्य प्रथमाद्वितीययोर्वारिशब्दवत् । कर्तृ । कर्तृणी । कर्तृणि । पुनरपि । टादौ पुंवद्भावात्पुल्लिङ्ग-

---

द्वि + औ

'त्यदादीनाम् विभक्तौ' इस १७२वें सूत्र से 'अ' प्रत्यय होकर द्व 'औरीम्' से ई होकर संधि होकर द्वे बना।

द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ।

त्रि शब्द जस् शस् में वारि शब्दवत् है।

यथा—त्रि + जस्, त्रि + शस् 'जश्शसोः शिः' इस सूत्र से 'शि' आदेश होकर 'धुट् स्वराद् घुटि नुः' इस २४०वें सूत्र से नु का आगम 'इन् हन् पूषार्यम्णां शौच' इस २४७वें सूत्र से दीर्घ न् को ण् होकर त्रीणि बना।

त्रीणि । त्रीणि । त्रिभिः । त्रिभ्यः । त्रिभ्यः । त्रयाणाम् । त्रिषु ।

इस प्रकार से इकारांत नपुंसक लिंग हुये। अब ईकारांत नपुंसक लिंग में ग्रामणी शब्द है—

ग्रामणी + सि

'स्वरो ह्रस्वो नपुंसके' इस २४४वें सूत्र से ह्रस्व होकर ग्रामणि + सि है।

'नपुंसकात्स्यमोर्लोपो न च तदुक्तं' इस २४५वें सूत्र से ह्रस्व होकर सि अम् का लोप होकर और कुछ कार्य नहीं होने से 'ग्रामणि' शब्द बना। टा आदि विभक्ति के आने पर 'टादौ भाषितपुंस्कंपुंवद्वा' इस २५२वें सूत्र से विकल्प से पुंवत् होने से एक बार वारिवत् एक बार 'अनेकाक्षरयोस्त्वसंयोगाद्व्यौ' १९०वें सूत्र से ई को य् होकर रूप चलेंगे। आम् विभक्ति के आने पर 'आमि च नुः' से नु का आगम 'दीर्घमामिसनौ' से दीर्घ होकर 'ग्रामणीनाम्' पुंवद् भाव में ग्रामण्याम् बना। ग्रामणि + डि में ग्रामणिनि पुल्लिग में 'नियोडिराम्' १९१वें सूत्र से आम् होकर ग्रामण्याम् बना।

संबोधन में 'नाम्यंतचतुरां वा' से हे ग्रामणि, हे ग्रामणे ! बना।

ग्रामणि	ग्रामणिनी	ग्रामणीनि
हे ग्रामणि !, हे ग्रामणे !	हे ग्रामणिनी !	हे ग्रामणीनि !
ग्रामणि	ग्रामणिनी	ग्रामणीनि
ग्रामणिना, ग्रामण्या	ग्रामणिभ्याम्	ग्रामणिभिः
ग्रामणिने, ग्रामण्ये	ग्रामणिभ्याम्	ग्रामणिभ्यः
ग्रामणिनः, ग्रामण्यः	ग्रामणिभ्याम्	ग्रामणिभ्यः
ग्रामणिनः, ग्रामण्यः	ग्रामणिनोः, ग्रामण्योः	ग्रामणीनाम्, ग्रामण्याम्
ग्रामणिनि, ग्रामण्याम्	ग्रामणिनोः, ग्रामण्योः	ग्रामणिषु

इसी प्रकार से अग्रणी, सेनानी शब्द के रूप चलेंगे।

इस प्रकार ईकारांत नपुंसक लिंग शब्द हुये अब उकारांत नपुंसक लिंग वस्तु शब्द है वह वारि शब्द के समान चलता है। यह वस्तु टा आदि स्वर वाली विभक्तियों के आने पर 'आमि च नुः' से नु का आगम होकर 'दीर्घमामिसनौ' से दीर्घ होकर वस्तूनाम् बनता है। यथा—

वद्वा । कर्त्रा, कर्तृणा । कर्तृभ्यां । कर्तृभिः । कर्त्रे, कर्तृणे । कर्तृभ्यां । कर्तृभ्यः । कर्तुः, कर्तृणः । कर्तृभ्यां । कर्तृभ्यः । कर्तुः, कर्तृणः । कर्तृभ्यां । कर्तृभ्यः । कर्तुः, कर्तृणः । कर्त्रोः, कर्तृणोः । आमि परे नुरागमः । कर्तृणाम् । कर्तृणि, कर्तरि । कर्त्रोः कर्तृणोः । कर्तृषु । सम्बोधने—हे कर्तृ, हे कर्तः । हे कर्तृणी । हे कर्तृणि । बहुक्रोष्टृशब्दस्य तु भेदः । क्रोष्टुः ऋत उत्सम्बुद्धौ इत्यादिना उर्भवति । शसि व्यञ्जने नपुंसके च इति ऋत उकारः । बहुक्रोष्टु । बहुक्रोष्टूनी । बहुक्रोष्टूनि । पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पेन पुंवद्भावः अयमेकविकल्पः ।

वस्तु	वस्तुनी	वस्तूनि	वस्तुने	वस्तुभ्याम्	वस्तुभ्यः
हे वस्तु ! हे वस्तो ।	हे वस्तुनी ।	हे वस्तूनि !	वस्तुनः	वस्तुभ्याम्	वस्तुभ्यः
वस्तु	वस्तुनी	वस्तूनि	वस्तुनः	वस्तुनोः	वस्तूनाम्
वस्तुना	वस्तुभ्याम्	वस्तुभिः	वस्तुनि	वस्तुनोः	वस्तुषु

'मृदु' शब्द प्रथमा द्वितीया में वारि शब्द के समान चलता है एवं टा आदि स्वर वाली विभक्तियों के आने पर "टादौ भाषित पुंस्कं पुंवद्वा" २५२वें सूत्र से विकल्प से पुल्लिग में चल जाता है। तब पुल्लिग में शुचिवत् हो जाता है। यथा—

मृदु	मृदुनी	मृदूनि	मृदुने, मृदवे	मृदुभ्याम्	मृदुभ्यः
हे मृदु ! हे मृदो ।	हे मृदुनी !	हे मृदूनि !	मृदुनः, मृदोः	मृदुभ्याम्	मृदुभ्यः
मृदु	मृदुनी	मृदूनि	मृदुनः, मृदोः	मृदुनोः, मृद्वोः	मृदूनाम्
मृदुना, मृदुना	मृदुभ्याम्	मृदुभिः	मृदुनि, मृदौ	मृदुनोः, मृद्वोः	मृदुषु

इसी प्रकार से लघु गुरु आदि शब्दों के रूप चलते हैं। उकारांत शब्द पूर्ण हुये। अब ऊकारांत नपुंसक लिंग में खलपू शब्द है।

खलपू + सि 'स्वरो ह्रस्वे नपुंसके' सूत्र से ह्रस्व होकर सेनानी के समान चलेगा। टा आदि स्वरवाली विभक्तियों के आने पर भाषित पुंस्क होने से विकल्प से पुंवद् हो जावेगा।

खलपु	खलपुनी	खलपूनि
हे खलपु ! हे खलपो !	हे खलपुनी ।	हे खलपूनि !
खलपु	खलपुनी	खलपूनि
खलपुना, खलप्वा	खलपुभ्याम्	खलपुभिः
खलपुने, खलप्वे	खलपुभ्याम्	खलपुभ्यः
खलपुनः, खलप्वः	खलपुभ्याम्	खलपुभ्यः
खलपुनः, खलप्वः	खलपुनोः, खलप्वोः	खलपूनाम्, खलप्वाम्
खलपुनि, खलप्वि	खलपुनोः, खलप्वोः	खलपुषु

इसी प्रकार से सस्लू, काण्डलू आदि शब्द नपुंसक लिंग में चलते हैं।

ऊकारांत शब्द हुये। अब ऋकारांत नपुंसक लिंग कर्तृ शब्द है। यह शब्द प्रथमा, द्वितीया में वारि शब्दवत् चलता है और टा आदि स्वर वाली विभक्तियों के आने पर पुंवद्भाव होने से विकल्प से पुल्लिग में भी चलता है।

कर्तृ	कर्तृणी	कर्तृणि	कर्त्रे, कर्तृणे	कर्तृभ्याम्	कर्तृभ्यः
हे कर्तृ !, हे कर्तः !	हे कर्तृणी !	हे कर्तृणि ।	कर्तुः, कर्तृणः	कर्तृभ्याम्	कर्तृभ्यः
कर्तृ	कर्तृणी	कर्तृणि	कर्तुः, कर्तृणः	कर्त्रोः, कर्तृणोः	कर्तृणाम्
कर्त्रा, कर्तृणा	कर्तृभ्याम्	कर्तृभिः	कर्तरि, कर्तृणि	कर्त्रोः, कर्तृणोः	कर्तृषु

[x]टादौ स्वरे वा ॥२०२॥

क्रोष्टृशब्दस्य ऋत उर्वा भवति टादौ स्वरे परे। इति द्वितीयविकल्पः। इति उभयविकल्पे त्रैरूप्यं। बहुक्रोष्टुना, बहुक्रोष्ट्वा, बहुक्रोष्ट्रा। बहुक्रोष्टुभ्यां। बहुक्रोष्टुभिः। इत्यादि। सम्बोधने। हे बहुक्रोष्टु, हे बहुक्रोष्टो। हे बहुक्रोष्टुनी। हे बहुक्रोष्टूनि। इत्यादि। ऋकार लृकार ॡकारान्ता एकारान्ताश्चाप्रसिद्धाः॥ ऐकारान्ता नपुंसकलिङ्गे अतिरैशब्दः। तस्य ह्रस्वत्वे—

सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ॥२५३॥

सन्ध्यक्षराणां ह्रस्वादेशे सति इदुतौ भवतः। तपरकरणमसन्देहार्थं। इति एकारस्यैकारस्य च ह्रस्व इकारः। ओकारस्यौकारस्य च ह्रस्व उकारः। अतिरि। नामिनः स्वरे इति नुरागमः। अतिरिणी। अतिरीणि। पुनरपि। टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पेन पुंवद्भावः। यत्र पुंवद्भावस्तत्र सुरैशब्दवत्। अतिरिणा, अतिराया। व्यञ्जनादौ प्रत्यये परे रैरिति आत्वं। कुतः ? एकदेशविकृतमनन्यवत् इति न्यायात्। अतिराभ्यां। अतिराभिः। अतिरिणे, अतिराये। अतिराभ्यां। अतिराभ्यः। इत्यादि। इति ऐकारान्ताः। ओकारान्तो नपुंसकलिङ्गश्चित्रगोशब्दः। तत्र ओकारस्य ह्रस्व उकारः। मृदुशब्दवत्। चित्रगु।

बहु क्रोष्टृ शब्द है।

"क्रोष्टुः ऋत उत् संबुद्धौ शसि व्यञ्जने नपुंसके च" इस २०१वें सूत्र से नपुंसक लिंग में, क्रोष्टृ के ऋकार को उकार हो जाता है अतः

बहु क्रोष्टु बहुक्रोष्टुनी बहुक्रोष्टूनि

"टादौ भाषितपुंस्कं पुंवद्वा" इस २५२वें सूत्र से टा आदि स्वर वाली विभक्ति के आने पर विकल्प से पुंवद्भाव हुआ। इस एक विकल्प से पुंवद्भाव हुआ। इस एक विकल्प से दो रूप बनेंगे। पुनः

[x]टा आदि स्वरवाली विभक्ति के आने पर क्रोष्टृ शब्द के ऋकार को विकल्प से उकार हो जाता है ॥२०२॥

यह दूसरा विकल्प हुआ। इस प्रकार से दो विकल्प से तीन रूप बनेंगे अर्थात् एक बार उकारांत शब्द को पुल्लिंगवत् करने से भानु के समान रूप चलेंगे। दूसरी बार 'खलपु' के समान, तीसरी बार पितृवत् रूप चलेंगे। यथा—

ऋकारान्त, लृकारांत, ॡकारांत एवं एकारांत शब्द अप्रसिद्ध हैं।

ऐकारांत नपुंसक लिंग अतिरै शब्द है।

'स्वरो ह्रस्वो नपुंसके' इस २४४वें सूत्र से ह्रस्व प्राप्त था—

संध्यक्षर को ह्रस्व आदेश करने पर ह्रस्व इकार और उकार हो जाता है ॥२५३॥

इत् उत् में त् शब्द से ह्रस्व ही लेना। इसमें सन्देह को दूर करने के लिये ही त् शब्द है इसलिये ए ऐ को ह्रस्व इकार और ओ और को ह्रस्व उकार हो गया। अतः अतिरि बना। यह अतिरि शब्द वारिवत् चलेगा। अतः 'नामिनः स्वरे' से नु का आगम हो जावेगा और टा आदि विभक्ति के आने पर "टादौ स्वरे भाषितपुंस्कं पुंवद्वा" इस सूत्र से विकल्प से पुंवद् भाव होने से 'रै' शब्दवत् रूप चलेंगे।

व्यंजन वाली विभक्ति के आने पर 'रै' सूत्र से आकार हो जाता है। प्रश्न यह होता है कि जब अतिरि शब्द में 'रै' नहीं है तब यह सूत्र कैसे लगा ? तो "एकदेशविकृतमनन्यवत्" इस न्याय से एक देश विकृत होने से कुछ अन्तर नहीं पड़ता है अतः—

---

x यह सूत्र पहले आ चुका है।

चित्रगुणी । चित्रगूणि । पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पः । चित्रगुणा, चित्रगवा इत्यादि । इति ओकारान्ताः । औकारान्तो नपुंसकलिङ्गोऽतिनौशब्दः । तत्रापि औकारस्य ह्रस्व उकारः । तस्य प्रथमाद्वितीययोर्वारिशब्दवत् । अतिनु । अतिनुनी । अतिनूनि । पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पः । अतिनुना, अतिनावा । इत्यादि । इत्यौकारान्ताः ॥

इति स्वरान्ता नपुंसकलिङ्गाः ❑

अतिरि	अतिरिणी	अतिरीणि
हे अतिरि !	हे अतिरिणी !	हे अतिरीणि !
अतिरि	अतिरिणी	अतिरीणि
अतिरिणा, अतिरायां	अतिराभ्याम्	अतिराभिः
अतिरिणे, अतिराये	अतिराभ्याम्	अतिराभ्यः
अतिरिणः, अतिरायः	अतिराभ्याम्	अतिराभ्यः
अतिरिणः, अतिरायः	अतिरिणोः, अतिरायोः	अतिरीणाम्, अतिरायाम्
अतिरिणि, अतिरायि	अतिरिणोः, अतिरायोः	अतिरासु

ऐकारांत शब्द हुये अब ओकारांत चित्र गो शब्द है । उपर्युक्त सूत्र २५३वें से ओकार को ह्रस्व उकार होकर चित्र गु बना इसके रूप मृदु शब्दवत् चलेंगे । टा आदि विभक्तियों में 'भाषित पुंस्कं' होने से विकल्प से पुंवत् होने से चित्रगवा बन जाता है ।

चित्रगु	चित्रगुणी	चित्रगूणि
हे चित्रगु ! हे चित्रगो !	हे चित्रगुणी ।	हे चित्रगूणि !
चित्रगु	चित्रगुणी	चित्रगूणि
चित्रगुणा, चित्रगवा	चित्रगुभ्याम्	चित्रगुभिः
चित्रगुणे, चित्रगवे	चित्रगुभ्याम्	चित्रगुभ्यः
चित्रगुणः, चित्रगोः	चित्रगुभ्याम्	चित्रगुभ्यः
चित्रगुणः, चित्रगोः	चित्रगुणोः, चित्रगवोः	चित्रगूणाम्, चित्रगवाम्
चित्रगुणि, चित्रगवि	चित्रगुणोः, चित्रगवोः	चित्रगुषु

इस प्रकार से ओकारांत शब्द हुये । अब औकारांत नपुंसक लिंग अतिनौ शब्द है । सूत्र २५३वें से औ को ह्रस्व होकर उकार हो जाता है अतः 'अतिनु' बना आगे भाषित पुंस्कं होने से विकल्प से पुंवद् होने से दो रूप बनेंगे ।

अतिनु	अतिनुनी	अतिनूनि
हे अतिनु, अतिनो !	हे अतिनुनी ।	हे अतिनूनि !
अतिनु	अतिनुनी	अतिनूनि
अतिनुना, अतिनावा	अतिनुभ्याम्	अतिनुभिः
अतिनुने, अतिनावे	अतिनुभ्याम्	अतिनुभ्यः
अतिनुनः, अतिनावः	अतिनुभ्याम्	अतिनुभ्यः
अतिनुनः, अतिनावः	अतिनुनोः, अतिनावोः	अतिनूनाम्, अतिनावाम्
अतिनुनि, अतिनावि	अतिनुनोः, अतिनावोः	अतिनुषु

इस प्रकार से औकारांत शब्द हुये ।

स्वरांत नपुंसकलिंग प्रकरण समाप्त हुआ । ❑

---

१. अत्र अग्रे च अतिनावादिषु मतान्तरमन्यतो दृष्टव्यम् ।

अथ व्यञ्जनान्ताः पुल्लिङ्गशब्दा यथाक्रमेणोच्यन्ते

कवर्गान्ताः पुल्लिङ्गशब्दा अप्रसिद्धाः। चकारान्तः पुल्लिङ्गः सुवाच्शब्दः। सौ—व्यञ्जनाच्चेति सिलोपः। दादेर्हस्य ग इत्यनुवर्तते।

चवर्गदृगादीनां च ॥२५४॥

चवर्गान्तस्य दृश् इत्येवमादीनां च गो भवति विरामे व्यञ्जनादौ च।

पदान्ते धुटां प्रथमः ॥७६॥

पदान्ते वर्तमानानां धुटां वर्णानां प्रथमो भवति अघोषे। प्रथम इत्यनुवर्तते।

वा विरामे ॥२४२॥

विरामे धुटां प्रथमस्तृतीयश्च वा भवति। सुवाक् सुवाग्, सुवाचौ। सुवाचः। एवं सम्बुद्धौ। सुवाचं। सुवाचौ। सुवाचः। सुवाचा। सुवाग्भ्यां। सुवाग्भिः। सुवाचे। सुवाग्भ्यां। सुवाग्भ्यः। सुवाचः। सुवाचोः। सुवाचां। सुवाचि। सुवाचोः। सुषि। गत्वं।

अघोषे प्रथमः ॥२५५॥

अघोषे परे धुटां प्रथमो भवति। इति कत्वं। नामिकरेत्यादिना सस्य षत्वं।

कषयोगे क्षः ॥२५६॥

अथ व्यंजनांत शब्दों में क्रम से प्रथम व्यञ्जनांत पुल्लिग शब्द चलेंगे।

कवर्गांत पुल्लिग शब्द अप्रसिद्ध है।

चकारांत पुल्लिग सुवाच् शब्द है। सुवाच् + सि 'व्यञ्जनाच्च' १७८वें सूत्र से सि का लोप हो गया 'दादेर्हस्यगः' यह सूत्र अनुवृत्ति में चला आ रहा है।

चवर्गान्त और दृश् के अंत को विराम या व्यंजन वाली विभक्ति के आने पर ग् हो जाता है ॥२५४॥

सुवाच् = सुवाग् बना।

पद के अन्त में धुट् को प्रथम अक्षर हो जाता है[1] ॥७६॥

'अघोषे प्रथमः' यह सूत्र अनुवृत्ति में चला आ रहा है।

विराम् में धुट् को प्रथम अथवा तृतीय अक्षर हो जाता है[2] ॥२४२॥

इस सूत्र से सुवाक् + सुप्

'चवर्गदृगादीनां च' इस २५४वें सूत्र से च् को ग् हुआ पुनः—

अघोष के आने पर धुट् को प्रथम अक्षर होता है ॥२५५॥

इस सूत्र से क् हो गया 'नामिकरपरः' इत्यादि १५०वें सूत्र से क् से स् को ष् हो गया तब सुवाक् + षु रहा।

ककार और षकार का योग होने पर क्ष हो जाता है ॥२५६॥

---

१. यह सूत्र पहले आ चुका है। २. यह सूत्र पहले आ चुका है।

ककारषकारयोर्योगे क्षो भवति सुवाक्षु।

कवर्गप्रथमः शषसेषु द्वितीयो वा ॥२५७॥

कवर्गप्रथमस्य द्वितीयो भवति शषसेषु परतो वा। सुवाक्ष्सु। प्रत्यञ्चशब्दस्य तु भेदः। चवर्गदृगादीनां चेत्यत्र चवर्गग्रहणबलादञ्च युज् क्रुञां प्रागेव गत्वं।

मनोरनुस्वारो धुटि ॥२५८॥

अनन्त्ययोर्मकारनकारयोरनुस्वारो भवति धुटि परे।

वर्गे वर्गान्तः ॥२५९॥

अनुस्वारो वर्गे परे वर्गान्तो भवति।

संयोगान्तस्य लोपः ॥२६०॥

पदस्य संयोगान्तस्य लोपो भवति विरामे व्यञ्जनादौ च। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ।

व्यञ्जनान्नोऽनुषङ्गः ॥२६१॥

इससे सुवाक्षु बना।

श् ष् स् के आने पर क वर्ग का प्रथम अक्षर विकल्प से द्वितीय अक्षर हो जाता है ॥२५७॥

अतः सुवाक्ष्सु बन गया।

सुवाक्, सुवाग्	सुवाचौ	सुवाचः	सुवाग्भ्याम्	सुवाग्भ्यः
सुवाचम्	सुवाचौ	सुवाचः	सुवाचोः	सुवाचाम्
सुवाचा	सुवाग्भ्याम्	सुवाग्भिः	सुवाचि	सुवाचोः	सुवाक्षु, सुवाक्ष्सु
सुवाचे	सुवाग्भ्याम्	सुवाग्भ्यः			

प्रत्यञ्च् शब्द में कुछ भेद हैं।

'चवर्गदृगादीनां च' इस सूत्र से च् को ग् हो गया तब

प्रत्यन् ग् + सि 'व्यञ्जनाच्च' इस सूत्र से सि का लोप हो गया। यहाँ च् के निमित्त से न् को ञ् हुआ था अतः च् को ग् करने पर ञ् मूल न् के रूप में आ गया।

धुट् के आने पर अंत में न हो ऐसे मकार और नकार अनुस्वार हो जाता है ॥२५८॥

आगे वर्ग के आने पर अनुस्वार उसी वर्ग का अंतिम अक्षर हो जाता है ॥२५९॥

अतः प्रत्यङ् ग् रहा।

विराम और व्यंजनादि विभक्ति के आने पर अन्त के संयोगी अक्षर का लोप हो जाता है ॥२६०॥

अतः प्रत्यङ् बना। प्रत्यञ्च् + औ = प्रत्यञ्चौ आदि।

प्रत्यञ्च् + शस्

धातु और लिंग के अंतिम व्यंजन से पूर्व में जो नकार है वह 'अनुषंग' संज्ञक हो जाता है ॥२६१॥

धातुलिङ्गयोरन्त्याद्व्यञ्जनाद्यः पूर्वो नकारः सोऽनुषङ्गसंज्ञो भवति। अघुट् स्वरे लोपमित्यनुवर्तते। व्यञ्जने चैषां निरति च।

अनुषङ्गश्चाक्रुञ्छेत् ॥२६२॥

अक्रुञ्छेरिदनुबन्धवर्जितस्यानुषङ्गो लोपमापद्यते अघुट्स्वरे व्यञ्जने च परे।

अञ्छेरलोपः पूर्वस्य च दीर्घः ॥२६३॥

अञ्छेरलोपो भवति पूर्वस्य च दीर्घो भवति अघुट् स्वरादौ। प्रतीचः। प्रतीचा। प्रत्यग्भ्यां। प्रत्यग्भिः। इत्यादि। एवं प्राङ् सम्यङ् प्रभृतयः। अक्रुञ्छेरिति किं ? क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुञ्चं। क्रुञ्चौ। क्रुञ्चः। क्रुञ्चा क्रुङ्भ्यां। क्रुङ्भिः। सप्तम्यां तु—

ङात् ॥२६४॥

ङात्परस्य सस्य षो भवति। क्रुङ्षु। इत्यादिः। इदनुबन्धवर्जितस्येति किं ? सुकन्स्शब्दः। कंसि गतिशासनयोः। अत एव वर्जनादिदनुबन्धानां धातूनां नुरागमोऽस्तीति। सूपूर्वकः सुष्ठु कंस्ते क्विप्।

इस सूत्र से प्रत्यङ् के न् को अनुषंग संज्ञा हो गई। 'अघुट स्वरे लोपम्' एवं 'व्यंजने चैषां निः' ये सूत्र अनुवृत्ति में चले आ रहे हैं।

क्रुञ् और इकार अनुबंध वाले शब्दों को छोड़कर आगे अघुट् स्वर और व्यंजन के आने पर अनुषंग का लोप हो जाता है ॥२६२॥

अतः प्रति + अच् + अस् रहा।

अघुट् स्वर वाली विभक्तियों के आने पर अञ् के 'अ' का लोप होकर पूर्व के स्वर को दीर्घ हो जाता है ॥२६३॥

तब प्रतीच् + अस् = प्रतीचः बना। प्रत्यङ् + भ्याम्

२५४वें सूत्र से च् को ग्। २६१वें सूत्र से न् को अनुषंग संज्ञा होकर २६२वें सूत्र से अनुषंग का लोप हुआ और प्रत्यग्भ्याम् बन गया।

संबोधन में भी यही रूप बनते हैं।

प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः	प्रतीचः	प्रत्यग्भ्याम्	प्रत्यग्भ्यः
प्रत्यञ्चम्	प्रत्यञ्चौ	प्रतीचः	प्रतीचः	प्रतीचोः	प्रतीचाम्
प्रतीचा	प्रत्यग्भ्याम्	प्रत्यग्भिः	प्रतीचि	प्रतीचोः	प्रत्यक्षु
प्रतीचे	प्रत्यग्भ्याम्	प्रत्यग्भ्यः			

इसी प्रकार से प्राङ् एवं सम्यङ् शब्द भी चलते हैं। सूत्र में क्रुञ् को छोड़कर ऐसा क्यों कहा ? तो इस क्रुञ् में अघुट् स्वर और व्यंजन के आने पर अनुषंग का लोप नहीं होता।

क्रुङ् + सु

ङ से परे सकार को षकार हो जाता है ॥२६४॥

अतः क्रुङ्षु बना।

क्रुङ्	क्रुञ्चौ	क्रुञ्चः	क्रुञ्चः	क्रुङ्भ्याम्	क्रुङ्भ्यः
क्रुञ्चम्	क्रुञ्चौ	क्रुञ्चः	क्रुञ्चः	क्रुञ्चोः	क्रुञ्चाम्
क्रुञ्चा	क्रुङ्भ्याम्	क्रुङ्भिः	क्रुञ्चि	क्रुञ्चोः	क्रुङ्क्षु
क्रुञ्चे	क्रुङ्भ्याम्	क्रुङ्भ्यः			

क्विप् सर्वापहारिलोपः। कृत्तद्धितसमासाश्चेति लिङ्गसंज्ञा। प्रथमैकवचनं सि। व्यञ्जनाच्चेति सेर्लोपः। मनोरनुस्वारे धुटि इति नकारस्यानुस्वारे प्राप्ते सर्वविधिभ्यो लोपविधिर्बलवानिति न्यायात् संयोगान्तस्य लोप इति सिलं सकारलोपः। सुकन्। स्वरे परे मनोरनुस्वारो धुटि इति अनुस्वारः। महत्साहचर्याद्धातादींर्घो न स्यात्। सुकंसौ। सुकंसः। सुकंसं। सुकंसौ। सुकंसः। सुकंसा। सुकन्भ्यां। सुकन्भिः। इत्यादि। सम्बोधनेऽपि तद्वत्।

नाञ्चेः पूजायां ॥२६५॥

पूजार्थे वर्तमानस्य अञ्चेरनुषङ्गस्य लोपो न भवति अघुट्स्वरे व्यञ्जने च परे। प्राङ्। प्राञ्चौ। प्राञ्चः। हे प्राङ्। हे प्राञ्चौ। हे प्राञ्चः। प्राञ्चं। प्राञ्चौ। प्राञ्चः। प्राञ्चा। प्राङ्भ्याम्। प्राङ्भिः। इत्यादि। सुपि विशेषः। ङात्परस्य सस्य षो भवति। प्राङ्षु। अञ्चु गतिपूजनयोः। प्रपूर्वकः प्राञ्चतीति क्विप्

२६२वें सूत्र में कहा कि इकार अनुबंध जिसमें हुआ है ऐसे शब्दों के अनुषंग का लोप नहीं होगा सो ऐसा क्यों कहा ? सुकन्स् शब्द है यह कैसे बना सो देखिये ! 'कसि' धातु गमन और शासन अर्थ में है इसमें इकार का अनुबंध लोप हुआ है अतः इकार अनुबंध धातु में कृदन्त में नु का आगम होता है सु उपसर्गपूर्वक अर्थात् अच्छी तरह से गमन या शासन करता है इस अर्थ में क्विप् प्रत्यय हुआ तो सु क नु स = सुकन्स् बना क्योंकि क्विप् प्रत्यय का सर्वापहारी लोप हो जाता है। पुनः 'कृत्तद्धितसमासाश्च' इस ४२३वें सूत्र से लिंग संज्ञा होकर सि आदि विभक्तियाँ आ गईं।

सुकन्स् + सि 'व्यंजनाच्च' इस सूत्र से सि का लोप 'मनोरनुस्वारोधुटि' इस २५८वें सूत्र से नकार को अनुस्वार प्राप्त था किन्तु सर्वविधि से लोप विधि बलवान् होती है इस नियम से 'संयोगांतस्य लोपः' इस १६३वें सूत्र से संयुक्त के अन्त सकार का लोप होकर 'सुकन्' बना। सुकन्स् + औ 'मनोरनुस्वारो धुटि' से न् को अनुस्वार होकर 'सुकंसौ' बना। यहाँ महत् के साहचर्य से धातु को दीर्घ नहीं हुआ।

सुकन्स् + भ्याम् 'संयोगांतस्य लोपः' से स् का लोप होकर सुकन्भ्याम् बना।

सुकन्	सुकन्सौ	सुकंसः	सुकंसे	सुकन्भ्याम्	सुकन्भ्यः
हे सुकन्	हे सुकन्सौ	हे सुकंसः	सुकंसः	सुकन्भ्याम्	सुकन्भ्यः
सुकंसम्	सुकन्सौ	सुकंसः	सुकंसः	सुकंसोः	सुकंसाम्
सुकंसा	सुकन्भ्याम्	सुकन्भिः	सुकंसि	सुकंसोः	सुकन्सु

प्राञ्च + सि

पूजा अर्थ में वर्तमान अञ्चु के अनुषंग का लोप नहीं होता है ॥२६५॥

अघुट् स्वर और व्यंजन वाली विभक्तियों के आने पर अञ्च के नकार का लोप नहीं होता है पूजा अर्थ में विद्यमान रहने पर। अतः

प्राञ्च् + शस् = प्राञ्चः। प्राञ्च् + भ्याम् च् को ग् ञ् को अनुस्वार होकर ङकार हुआ। संयुक्त के अंत का लोप होकर प्राङ्भ्याम्। प्राञ्च + सु = प्राङ्सु 'ङात्' २६४वें सूत्र से स् को ष् होकर प्राङ्षु बन गया।

प्राङ्	प्राञ्चौ	प्राञ्चः	प्राञ्चे	प्राङ्भ्याम्	प्राङ्भ्यः
हे प्राङ् !	हे प्राञ्चौ !	हे प्राञ्चः !	प्राञ्चः	प्राङ्भ्याम्	प्राङ्भ्यः
प्राञ्चम्	प्राञ्चौ	प्राञ्चः	प्राञ्चः	प्राञ्चोः	प्राञ्चाम्
प्राञ्चा	प्राङ्भ्याम्	प्राङ्भिः	प्राञ्चि	प्राञ्चोः	प्राङ्षु [प्राङ्क्षु]

अञ्चु धातु गति और पूजा अर्थ में है।

सर्वापहारिलोपः। कृत्तद्धितसमासाश्चेति लिङ्गसंज्ञा। यत्र गत्यर्थस्तत्र अनुषङ्गश्चाक्रुञ्चेत् इत्यनुषङ्गलोपः। यत्र पूजार्थस्तत्र नाञ्चेः पूजायामिति अघुट्स्वरे व्यञ्जने अनुषङ्गलोपो न भवति। अदद्र्यञ्च्शब्दस्य तु भेदः। अञ्चु अदस्पूर्वः—अमुमञ्चतीति क्विप् चेति क्विप् प्रत्ययः। क्विपि सति—

विष्वग्देवयोश्चान्त्यस्वरादेरद्र्यञ्चतौ क्वौ ॥२६६॥

विष्वग्देवयोः सर्वनाम्नश्चान्त्यस्वरादेरवयवश्चाञ्चतौ क्विबन्ते परेऽद्रिरादेशो भवति। इति सकारसहितस्य अकारस्य अद्रिरादेशः। इवर्णो यत्वं। अदद्र्यञ्चु इति स्थिते सति—

अदद्र्यञ्चो दस्य बहुलं ॥२६७॥

अद्र्यञ्चो दकारस्य बहुलं मकारो भवति, मात् परस्य रस्य उत्वं च। अदमुयङ्। अदमुयञ्चौ। अदमुयञ्चः। एवं सम्बुद्धौ। अदमुयञ्चं। अदमुयञ्चौ।

'प्र' उपसर्गपूर्वक अञ्चति है, क्विप् प्रत्यय का सर्वापहारी लोप 'कृत्तद्धितसमासाश्च' सूत्र से लिंग संज्ञा होकर प्राञ्च बना। जब इस प्राञ्च् का गति अर्थ लेंगे तब शसादि विभक्ति के आने पर 'अनुषंगश्चाक्रुञ्चेत्' सूत्र से अघुट् स्वर और व्यञ्जनादि विभक्तियों के आने पर अनुषंग का लोप होगा। अतः उपर्युक्त प्रकार से दो तरह से रूप चलते हैं।

अदद्र्यञ्च् शब्द में कुछ भेद है—

यहाँ भी अञ्चु धातु गति और पूजन अर्थ में है।

अदस् शब्दपूर्वक अञ्चु धातु से अमुम् अञ्चति इस प्रकार से 'क्विप्' इस ६५६वें सूत्र से क्विप् प्रत्यय हुआ एवं क्विप् प्रत्यय के होने पर आगे का सूत्र लगता है।

अञ्च् धातु से क्विप् प्रत्यय के आने पर विष्वक्, देव और सर्वनाम के अन्त्य स्वर की आदि के अवयव को 'अद्रि' आदेश हो जाता है ॥२६६॥

यहाँ पर अदस् शब्द सर्वनाम है अतः इसके अवयव—सकार सहित दकार के अकार को 'अद्रि' आदेश हो गया तब अदद्रि + अञ्च्।

इ वर्ण को य् होकर 'अदद्र्यञ्च्' बन गया। अदद्र्यञ्च् के दकार को बहुलता से मकार हो जाता है ॥२६७॥

और मकार से परे रकार को उकार हो जाता है तब अदमु इकार को य् होकर अञ्च् मिलकर अदमुयञ्च् बना। अर्थात् अद द्रि + अञ्च् है। द्रि में तीन अक्षर हैं। द् को 'म्' र् को 'उ' और इ को 'य्' आदेश हो गया।

अदमुय् + अञ्च् = अदमुयञ्च् बना।

इसी विषय में आगे के श्लोक का अर्थ देखिये !

श्लोकार्थ—कोई आचार्य पर के दकार को मकार एवं कोई आचार्य पूर्व के दकार को मकार करते हैं एवं कोई आचार्य दोनों ही दकार को मकार स्वीकार करते हैं तथा कोई आचार्य दोनों ही दकारों को मकार नहीं मानते हैं अतः इस अदस् शब्द से अञ्च् धातु के आने पर चार प्रकार के रूप बन जाते हैं।

प्रथम पर के दकार को मकार करने पर 'अदमुयञ्च्' द्वितीय—पूर्व के दकार को मकार करने पर अमुद्र्यञ्च्।

तृतीय में—दोनों ही दकारों को मकार करने पर 'अमुमुयञ्च्' चतुर्थ में—दोनों ही दकारों को मकार न करने पर 'अदद्र्यञ्च्' ऐसे चार रूप बने हैं अब 'कृत्तद्धित समासाश्च' से लिंग संज्ञा होकर सि आदि विभक्तियाँ आकर क्रम से एक-एक के रूप चलेंगे।

नोतो वः ॥२६८॥

अदमुयञ्च् इत्येतस्य उतो वत्वं च भवति। अनुषङ्गश्चाक्रुञ्चेत् इति नलोपः। अञ्चेरलोपः पूर्वस्य च दीर्घ इति अकारलोपः पूर्वस्य च दीर्घो भवति। अदमुईचः। अदमुईचा। अनुषङ्गश्चाक्रुञ्चेत् नलोपः। चवर्गदृगादीनां च गत्वं। अदमुयग्भ्यां। अदमुयग्भिः। पूर्ववत् अनुषङ्गलोपो गत्वं च। अघोषे प्रथमः। क्। नामिकरेत्यादिना षत्वं। अदमुयक्षु। अमुद्र्यङ्। अमुद्र्यञ्चौ। अमुद्र्यञ्चः। अमुद्र्यञ्चं। अमुद्र्यञ्चौ। अमुद्रीचः। अमुद्रीचा। अमुद्र्यग्भ्यां। अमुद्र्यग्भिः। अमुद्र्यक्षु। अमुमुयङ्। अमुमुयञ्चौ। अमुमुयञ्चः। अमुमुयञ्चं। अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्यां। अमुमुयग्भिः। अमुमुयक्षु। अदद्र्यङ्। अदद्र्यञ्चौ। अदद्र्यञ्चः। अदद्र्यञ्चं। अदद्र्यञ्चौ। अदद्रीचः। अदद्रीचा। अदद्र्यग्भ्यां। अदद्र्यग्भिः। अदद्र्यक्षु।

पहले 'अदमुयञ्च्' शब्द चलाया है। जो कि प्रत्यञ्च् के समान है। अदमुयञ्च् + शस् 'अनुषंगश्चाक्रुञ्चेत्' से न् का लोप हो गया। 'अञ्चेरलोपः पूर्वस्य च दीर्घः' इस २६३वें सूत्र से अदमुइ + अञ्च के 'अ' का लोप होकर पूर्व के स्वर 'इ' को दीर्घ हुआ एवं अदमुईचः बना।

अदमुयञ्च् के उकार को 'व्' नहीं होता है ॥२६८॥

अदमुयञ्च् + भ्याम् 'अनुषंगश्चाक्रुञ्चेत्' से अनुषंग का लोप होकर 'चवर्गदृगादीनां च' सूत्र से च् को ग् होकर 'अदमुयग्भ्याम्' बना।

सुप् में अदमुयग् + सु 'अघोषे प्रथमः' से ग् को क् एवं 'नामिकरपरः' इत्यादि सूत्र से स् को ष् होकर 'कषयोगे क्षः' से क्ष् होकर अदमुयक्षु बना।

दूसरा शब्द अमुद्र्यञ्च् है। पाँच रूप बनने के बाद अमुद्र्यञ्च् + शस् अनुषंग का लोप। अञ्च् के अ का लोप होकर पूर्व को दीर्घ—अमुद्रि अञ्च् + शस् = अमुद्रीचः बना।

अमुद्र्यञ्च् + भ्याम् अनुषंग का लोप एवं च् को ग् होकर 'अमुद्र्यग्भ्याम्' बना।

अमुद्र्यञ्च् + सुप् = अमुद्र्यक्षु बना

तीसरा—अमुमुयञ्च् है। पाँच रूप बनने के बाद अमुमुयञ्च् + शस् अमुमुइ अञ्च् + शस् अनुषंग का लोप, अ का लोप पूर्व की इ को दीर्घ होकर अमुमुईचः बना। अमुमुयञ्च् + भ्याम् अनुषंग का लोप च् को ग् होकर अमुमुयग्भ्याम् बना। अमुमुयञ्च् + सु। अनुषंग का लोप होकर च् को ग् एवं क् तथा सु को ष् होकर 'कषयोगे क्षः' से क्षु होकर अमुमुयक्षु बना।

चौथा अदद्र्यञ्च् है। पाँच रूप बनने के पश्चात् अदद्र्यञ्च् + शस् अदद्रि अञ्च् + शस् अनुषंग का लोप 'अ' का लोप होकर पूर्व स्वर को दीर्घ हुआ तो अदद्रीचः बना।

अदद्र्यञ्च् + भ्याम् अनुषंग का लोप एवं च् को ग् होकर अदद्र्यग्भ्याम्।

अदद्र्यञ्च् + सु अनुषंग का लोप च् को ग् एवं क् तथा सु को ष् होकर अदद्र्यक्षु बना।

क्रमशः—

अदमुयङ्	अदमुयञ्चौ	अदमुयञ्चः	अदमुईचे	अदमुयग्भ्याम्	अदमुयग्भ्यः
हे अदमुयङ् !	हे अदमुयञ्चौ !	हे अदमुयञ्चः !	अदमुईचः	अदमुयग्भ्याम्	अदमुयग्भ्यः
अदमुयञ्चम्	अदमुयञ्चौ	अदमुईचः	अदमुईचः	अदमुईचोः	अदमुईचाम्
अदमुईचा	अदमुयग्भ्याम्	अदमुयग्भिः	अदमुईचि	अदमुईचोः	अदमुयक्षु
अमुद्र्यङ्	अमुद्र्यञ्चौ	अमुद्र्यञ्चः	अमुद्रीचे	अमुद्र्यग्भ्याम्	अमुद्र्यग्भ्यः
हे अमुद्र्यङ् !	हे अमुद्र्यञ्चौ !	हे अमुद्र्यञ्चः !	अमुद्रीचः	अमुद्र्यग्भ्याम्	अमुद्र्यग्भ्यः
अमुद्र्यञ्चम्	अमुद्र्यञ्चौ	अमुद्रीचः	अमुद्रीचः	अमुद्रीचोः	अमुद्रीचाम्
अमुद्रीचा	अमुद्र्यग्भ्याम्	अमुद्र्यग्भिः	अमुद्रीचि	अमुद्रीचोः	अमुद्र्यक्षु

(परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः।
उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥१॥)

उदञ्शब्दस्य तु भेदः। उदङ्। उदञ्चौ। उदञ्चः। उदञ्चं। उदञ्चौ। शसादौ—

उदङ् उदीचिः ॥२६९॥

उदङ् उदीचिर्भवति। अघुट्स्वरादौ। उदीचः। उदीचा। उदग्भ्यां। उदग्भिः। इत्यादि। तिर्यञ्च् शब्दस्य तु भेदः। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। तिर्यञ्चौ। शसादौ—

तिर्यङ् तिरश्चिः ॥२७०॥

तिर्यङ्शब्दः तिरश्चिर्भवति अघुट्स्वरादौ। तिरश्चः। तिरश्चा। तिर्यग्भ्यां। तिर्यग्भिः। इत्यादि। छकारान्तः पुल्लिङ्गः प्राच्छ्शब्दः। सौ—विरामे व्यञ्जनादिष्विति वर्तते।

अमुमुयङ्	अमुमुयञ्चौ	अमुमुयञ्चः	अमुमुईचे	अमुमुयग्भ्याम्	अमुमुयग्भ्यः
हे अमुमुयङ् !	हे अमुमुयञ्चौ !	हे अमुमुयञ्चः !	अमुमुईचः	अमुमुयग्भ्याम्	अमुमुयग्भ्यः
अमुमुयञ्चम्	अमुमुयञ्चौ	अमुमुईचः	अमुमुईचः	अमुमुईचोः	अमुमुईचाम्
अमुमुईचा	अमुमुयग्भ्याम्	अमुमुयग्भिः	अमुमुईचि	अमुमुईचोः	अमुमुयक्षु
अदद्यङ्	अदद्यञ्चौ	अदद्यञ्चः	अदद्रीचे	अदद्यग्भ्याम्	अदद्यग्भ्यः
हे अदद्यङ् !	हे अदद्यञ्चौ !	हे अदद्यञ्चः !	अदद्रीचः	अदद्यग्भ्याम्	अदद्यग्भ्यः
अदद्यञ्चम्	अदद्यञ्चौ	अदद्रीचः	अदद्रीचः	अदद्रीचोः	अदद्रीचाम्
अदद्रीचा	अदद्यग्भ्याम्	अदद्यग्भिः	अदद्रीचि	अदद्रीचोः	अदद्यक्षु

उदञ् शब्द में कुछ भेद हैं।
घुट् पर्यंत पाँच रूप तो पूर्ववत् ही हैं।
उदञ् + शस्

अघुट स्वर के आने पर उदञ् को उदीच् आदेश हो जाता है ॥२६९॥

अतः उदीचः बना। उदञ् + भ्याम् अनुषंग का लोप एवं च् को ग् होकर उदग्भ्याम् बना।
उदञ् + सु अनुषंग का लोप च् को ग् और ग् को क् होकर सु को 'नामिकरपरः' इत्यादि सूत्र १५०वें से षु हो गया पुनश्च 'कषयोगे क्षः' इस सूत्र से क्ष होकर उदक्षु बना।

उदङ्	उदञ्चौ	उदञ्चः	उदीचे	उदग्भ्याम्	उदग्भ्यः
हे उदङ् !	हे उदञ्चौ !	हे उदञ्चः !	उदीचः	उदग्भ्याम्	उदग्भ्यः
उदञ्चम्	उदञ्चौ	उदीचः	उदीचः	उदीचोः	उदीचाम्
उदीचा	उदग्भ्याम्	उदग्भिः	उदीचि	उदीचोः	उदक्षु

तिर्यञ्च् शब्द है। घुट् विभक्ति के आने पर पूर्ववत् है।
तिर्यञ्च् + शस्

अघुट् स्वर के आने पर तिर्यञ्च् को तिरश्च् आदेश हो जाता है ॥२७०॥

तिरश्च् + अस् = तिरश्चः
तिर्यञ्च् + भ्याम् अनुषंग का लोप होकर च् को ग् हुआ। तिर्यग्भ्याम् बना।

तिर्यङ्	तिर्यञ्चौ	तिर्यञ्चः	तिरश्चे	तिर्यग्भ्याम्	तिर्यग्भ्यः
हे तिर्यङ् !	हे तिर्यञ्चौ !	हे तिर्यञ्चः !	तिरश्चः	तिर्यग्भ्याम्	तिर्यग्भ्यः
तिर्यञ्चम्	तिर्यञ्चौ	तिरश्चः	तिरश्चः	तिरश्चोः	तिरश्चाम्
तिरश्चा	तिर्यग्भ्याम्	तिर्यग्भिः	तिरश्चि	तिरश्चोः	तिर्यक्षु

इस प्रकार से चकारांत पुल्लिंग शब्द हुए। अब छकारांत प्राच्छ् शब्द है।
प्राच्छ् + सि "सौ विरामे व्यञ्जनादिषु" यह सूत्र अनुवृत्ति में चला आ रहा है।

हशषछान्तेजादीनां डः ॥२७१ ॥

हशषछान्तानां यजादीनां च डो भवति विरामे व्यञ्जनादौ च । प्राट् प्राड् । द्विर्भावं स्वरपरश्छकारः । प्राच्छौ । प्राच्छः । संबोधनेऽपि तद्वत् । प्राच्छं । प्राच्छौ । प्राच्छः । प्राच्छा । प्राड्भ्यां । प्राड्भिः । इत्यादि । इति । छकारान्ताः । जकारान्तः पुल्लिङ्गे युज्शब्दः ।

युजेरसमासे नुर्घुटि ॥२७२ ॥

युज्शब्दस्य असमासे नुरागमो भवति घुटि परे ।

आगम उदनुबन्धः स्वरादन्त्यात्परः ॥२७३ ॥

उदनुबन्ध आगमोऽन्त्यात्स्वरात् परो भवति । मित्रवदागमः । अथवा प्रकृतिप्रत्यययोरनुपघाती आगम उच्यते । शत्रुवदादेशः । युड् । युञ्जौ । युञ्जः । सम्बोधनेऽपि तद्वत् । युञ्जं । युञ्जौ । युजः । युजा । युग्भ्यां । युग्भिः । इत्यादि । अश्वयुजादीनां समासत्वान्नुरागमो नास्ति । अश्वयुग्, अश्वयुक् । अश्वयुजौ । अश्वयुजः । सम्बोधनेऽपि तद्वत् । इत्यादि । एवं ऋत्विज् गुणभाज् प्रभृतयः । साधुमस्ज् शब्दस्य तु भेदः ।

ह् श् ष् छ् है अंत में जिसके वे शब्द और यज् आदि शब्द के अंत में ड् हो जाता है ॥२७१ ॥

विराम और व्यञ्जन वाली विभक्ति के आने पर । अतः प्राड् + सि 'व्यंजनाच्च' इस सूत्र से सि का लोप होकर 'वा विरामे' इस सूत्र से विकल्प के प्रथम अक्षर हो जाता है अतः प्राट्, प्राड् बना ।

प्राट्, प्राड्	प्राच्छौ	प्राच्छः	प्राच्छे	प्राड्भ्याम्	प्राड्भ्यः
हे प्राट्, प्राड् !	हे प्राच्छौ !	हे प्राच्छः !	प्राच्छः	प्राड्भ्याम्	प्राड्भ्यः
प्राच्छम्	प्राच्छौ	प्राच्छः	प्राच्छः	प्राच्छोः	प्राच्छाम्
प्राच्छा	प्राड्भ्याम्	प्राड्भिः	प्राच्छि	प्राच्छोः	प्राट्सु

जकारांत पुल्लिंग युज् शब्द है ।

युज् + सि

असमास में घुट् विभक्ति के आने पर युज् शब्द को नु का आगम अंतिम स्वर से परे होता है ॥२७२ ॥

उकार अनुबंध वाला आगम अंतिम स्वर से परे होता है ॥२७३ ॥

आगम किसे कहते हैं ? जो मित्रवत् हो उसे आगम कहते हैं अथवा प्रकृति और प्रत्यय का उपघात (क्षति) न करने वाला आगम कहलाता है । आदेश शत्रुवत् होता है । अर्थात् वह किसी को हटाकर उसके स्थान पर होता है अतः शत्रुवत् कहलाता है ।

युन् ज् + सि 'व्यंजनाच्च' इस सूत्र से सि का लोप होकर युञ्ज् बन गया । ज् को ग् एवं न् को अनुस्वार होकर वर्ग का अंतिम अक्षर ड् हुआ पुनश्च 'संयोगांतस्य लोपः' से ग् का लोप होकर युड् बना ।

युज् + भ्याम् 'चवर्गदृगादीनां च' से ज् को ग् होकर युग्भ्याम् बना ।

युड्	युञ्जौ	युञ्जः	युजे	युग्भ्याम्	युग्भ्यः
हे युड् !	हे युञ्जौ !	हे युञ्जः !	युजः	युग्भ्याम्	युग्भ्यः
युञ्जम्	युञ्जौ	युजः	युजः	युजोः	युजाम्
युजा	युग्भ्याम्	युग्भिः	युजि	युजोः	युक्षु

अश्वयुज् आदि शब्दों में समास के होने से नु का आगम नहीं हुआ है ।

संयोगादेर्धुटः ॥२७४॥

संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादौ च। व्यञ्जनाच्च सिलोपश्चवर्गदृगादीनां च गकारककारौ। साधुमक्, साधुमग्।

धुटां तृतीयः ॥२७५॥

धुटां तृतीयो भवति घोषवति सामान्ये। इति सस्य तृतीयत्वे प्राप्ते लृवर्णतवर्गलसा दन्त्या इति न्यायात् सकारस्य दकारः। तवर्गश्चटवर्गयोगे चटवर्गौ इति दकारस्य जकारः। साधुमज्जौ इत्यादि। देवेज्शब्दस्य तु भेदः। सौ—हशषछान्ते इत्यादिना डत्वं। देवेट्, देवेड्। देवेजौ। देवेजः। सम्बोधनेऽपि तद्वत्। देवेजम्। देवेजौ। देवेजः। देवेजा। देवेड्भ्यां। देवेड्भिः।

अश्वयुक् अश्वयुग्	अश्वयुजौ	अश्वयुजः
हे अश्वयुक्, अश्वयुग् !	हे अश्वयुजौ !	हे अश्वयुजः !
अश्वयुजम्	अश्वयुजौ	अश्वयुजः
अश्वयुजा	अश्वयुग्भ्याम्	अश्वयुग्भिः
अश्वयुजे	अश्वयुग्भ्याम्	अश्वयुग्भ्यः
अश्वयुजः	अश्वयुग्भ्याम्	अश्वयुग्भ्यः
अश्वयुजः	अश्वयुजोः	अश्वयुजाम्
अश्वयुजि	अश्वयुजोः	अश्वयुक्षु

इसी प्रकार से ऋत्विज् और गुणभाज् शब्द भी चलते हैं।

साधुमस्ज् शब्द में कुछ भेद है।

साधुमस्ज् + सि 'व्यंजनाच्च' सूत्र से सि का लोप हुआ।

विराम और व्यंजन वाली विभक्ति के आने पर संयोग की आदि के धुट् का लोप हो जाता है ॥२७४॥

इससे स् का लोप हुआ। अतः साधुमज् रहा 'चवर्गदृगादीनां च' इस सूत्र से ज् को ग् होकर पुनः 'वा विरामे' से क् होकर साधुमक्, साधुमग् बना।

साधुमस्ज् + औ

सामान्य घोषवान् के आने पर धुट् को तृतीय अक्षर हो जाता है ॥२७५॥

इस सूत्र से स् को तृतीय अक्षर प्राप्त होने पर "लृवर्ण, तवर्ग, ल और स ये दंतस्थानीय हैं" इस न्याय से सकार को दकार हुआ पुनः "तवर्ग को चवर्ग और टवर्ग के योग में चवर्ग, टवर्ग हो जाता है इस नियम से तवर्ग के दकार को चवर्ग का जकार हो गया तो 'साधुमज्जौ' बना।

साधुमक्, साधुमग्	साधुमज्जौ	साधुमज्जः	साधुमज्जे	साधुमग्भ्याम्	साधुमग्भ्यः
हे साधुमक्, साधुमग् !	हे साधुमज्जौ !	हे साधुमज्जः !	साधुमज्जः	साधुमग्भ्याम्	साधुमग्भ्यः
साधुमज्जम्	साधुमज्जौ	साधुमज्जः	साधुमज्जः	साधुमज्जोः	साधुमज्जाम्
साधुमज्जा	साधुमग्भ्याम्	साधुमग्भिः	साधुमज्जि	साधुमज्जोः	साधुमक्षु

देवेज् शब्द में भेद है।

देवेज् + सि 'व्यंजनाच्च' से सि का लोप एवं "हशषछान्तेजादीनां डः" इस सूत्र से ज् को ड् होकर देवेड् प्रथम अक्षर होकर देवेट् बना।

देवेट् + सु

टात् सुप्तादिर्वा ॥२७६ ॥

टकारात्परः सुप् तादिर्वा भवति। तेन देवेट्त्सु, देवेट्सु। एवं सम्राज्प्रभृतयः। झजटवर्गान्ता अप्रसिद्धाः। तकारान्तः पुल्लिङ्गो मरुत्शब्दः। मरुत्, मरुद्। मरुतौ। मरुतः। संबोधनेऽपि तद्वत्। मरुतं। मरुतौ। मरुतः। मरुता। धुटां तृतीय इत्यनेन दत्वे मरुद्भ्याम् इत्यादि। उदनुबन्धस्य भवन्तशब्दस्य तु भेदः। दीर्घमामि झलि इति वर्तते।

अन्तवसन्तस्य चाधातोस्सौ ॥२७७ ॥

अन्तु अस् इत्येवमन्तस्याधातोरस्य दीर्घो सौ असम्बुद्धौ। लिङ्गान्तनकारस्य इति नकारस्य लोपे प्राप्ते।

नसंयोगान्तावलुप्तवच्च पूर्वविधौ ॥२७८ ॥

टकार से परे सु की आदि में त् का आगम विकल्प से होता है ॥२७६ ॥

अतः देवेट्त्सु, देवेट्सु बना। इसी प्रकार सम्राज् शब्द के रूप भी चलेंगे।

देवेड्, देवेट्	देवेजौ	देवेजः	देवेजः	देवेड्भ्याम्	देवेड्भ्यः
देवेजम्	देवेजौ	देवेजः	देवेजः	देवेजोः	देवेजाम्
देवेजा	देवेड्भ्याम्	देवेड्भिः	देवेजि	देवेजोः	देवेट्त्सु, देवेट्सु
देवेजे	देवेड्भ्याम्	देवेड्भ्यः			
सम्राट्, सम्राड्	सम्राजौ	सम्राजः	सम्राजे	सम्राड्भ्याम्	सम्राड्भ्यः
हे सम्राट्, सम्राड् !	हे सम्राजौ !	हे सम्राजः !	सम्राजः	सम्राड्भ्याम्	सम्राड्भ्यः
सम्राजम्	सम्राजौ	सम्राजः	सम्राजः	सम्राजोः	सम्राजाम्
सम्राजा	सम्राड्भ्याम्	सम्राड्भिः	सम्राजि	सम्राजोः	सम्राट्त्सु, सम्राट्सु

झकारांत जकारांत और टवर्गांत शब्द अप्रसिद्ध हैं अब तकारांत पुल्लिंग मरुत् शब्द हैं।

मरुत + सि 'व्यंजनाच्च' इस सूत्र से सि का लोप एवं विकल्प से तृतीय होकर मरुत्, मरुद् शब्द हैं।

मरुत् + भ्याम् 'धुटां तृतीयः' से तृतीय अक्षर होकर मरुद्भ्याम् बना।

मरुत्, मरुद् !	मरुतौ	मरुतः	मरुते	मरुद्भ्याम्	मरुद्भ्यः
हे मरुत्, हे मरुद् !	हे मरुतौ !	हे मरुतः !	मरुतः	मरुद्भ्याम्	मरुद्भ्यः
मरुतम्	मरुतौ	मरुतः	मरुतः	मरुतोः	मरुताम्
मरुता	मरुद्भ्याम्	मरुद्भिः	मरुति	मरुतोः	मरुत्सु

उकार अनुबंध वाले भवन्त् शब्द में कुछ भेद है।

भवन्त् + सि 'दीर्घमामिसनौ' सूत्र अनुवृत्ति में चला आ रहा है।

अन्तु और अंस् है अंत में जिसके ऐसे धातु के अकार को दीर्घ हो जाता है असंबुद्ध सि के आने पर ॥२७७ ॥

सि का लोप होकर भवान्त् बना। 'संयोगांतस्यलोपः' से त् का लोप होकर 'लिंगांत नकारस्य' इस सूत्र से नकार का लोप प्राप्त था किन्तु आगे सूत्र लगा—

लुप्त हुए नकार और संयोगांत अलुप्तवत् होते हैं पूर्वविधि में दीर्घ आदि के करने पर ॥२७८ ॥

नकारसंयोगान्तौ लुप्तावप्यलुप्तवद्भवतः पूर्वविधौ दीर्घादिके कर्तव्ये । नकारग्रहणं राजन्शब्दार्थम् । भवान् । भवन्तौ । भवन्तः ।

भवतो वादेरुत्वं सम्बुद्धौ ।।२७९ ।।[1]

उदनुबन्धस्य भवन्तशब्दस्य वादेरुत्वं भवति वा सम्बुद्धौ । हे भोः । सन्निपातलक्षणविधिरनिमित्तं तद्विघातस्य । यो यमाश्रित्य समुत्पन्नः स तं प्रति सन्निपातः । हे भवन् । हे भवन्तौ । हे भवन्तः । भवन्तं । भवन्तौ । भवतः । भवता । भवद्भ्यां । भवद्भिः । इत्यादि । एवं भगवन्त् अघवन्त् शब्दौ । सम्बुद्धिं विना गोमन्त् धनवन्त् यावन्त् तावन्त् एतावन्त् इयन्त् कियन्त् प्रभृतयः । एते शब्दाः केन प्रकारेण सिद्धाः । भगं ज्ञानं । भगमस्यास्तीति भगवान् । अघं पापमस्यास्तीति अघवान् । गावोऽस्य सन्तीति गोमान् । धनमस्यास्तीति धनवान् । तदस्यास्तीति मंत्वंत्विन् इति वन्तुप्रत्ययः ।

यहाँ लुप्त हुए नकार का ग्रहण राजन् शब्द के लिये किया गया है अर्थात् राजन् शब्द में नकार का लोप हो जाता है । अतः यहाँ नकार का लोप न होकर भवान् बना ।

भवन्त् + औ = भवन्तौ, भवन्तः । संबोधन में—भवन्त् + सि

उकार अनुबंध सहित भवन्त् शब्द के 'व' को संबोधन में विकल्प से 'उ' हो जाता है ॥२७९ ॥

इसमें 'संयोगांतस्य लोपः' से त् का लोप 'लिंगांतनकारस्य' से न का लोप होकर संधि और सि का विसर्ग होकर हे भोः बना, विकल्प से हे भवन् बना ।

सन्निपात लक्षण विधि बिना निमित्त के ही उसके विघात के लिये हो जाती है । जो जिसका आश्रय लेकर उत्पन्न हुआ है वह उसके प्रति सन्निपात कहलाता है । मतलब यहाँ हे भोः में नकार तकार का लोप बिना निमित्त के ही हुआ अतः वह सन्निपात विधि है ।

भवन्त् + शस्, भवन्त् + भ्याम् 'व्यंजने चैषां निः' सूत्र से नकार का लोप हुआ । भवतः, भवद्भ्याम् बना ।

भवान्	भवन्तौ	भवन्तः	भवते	भवद्भ्याम्	भवद्भ्यः
हे भोः, हे भवन् ।	हे भवन्तौ ।	हे भवन्तः !	भवतः	भवद्भ्याम्	भवद्भ्यः
भवन्तम्	भवन्तौ	भवतः	भवतः	भवतोः	भवताम्
भवता	भवद्भ्याम्	भवद्भिः	भवति	भवतोः	भवत्सु

इसी प्रकार से भगवन्त् और अघवन्त् शब्द चलते हैं ।

भगवान्	भगवन्तौ	भगवन्तः	भगवते	भगवद्भ्याम्	भगवद्भ्यः
हे भगोः ! हे भगवान् ।	हे भगवन्तौ ।	हे भगवन्तः !	भगवतः	भगवद्भ्याम्	भगवद्भ्यः
भगवन्तम्	भगवन्तौ	भगवतः	भगवतः	भगवतोः	भगवताम्
भगवता	भगवद्भ्याम्	भगवद्भिः	भगवति	भगवतोः	भगवत्सु

सम्बोधन के बिना गोमन्त्, धनवन्त्, यावन्त्, तावन्त्, एतावन्त्, इयन्त् और कियन्त् आदि शब्द चलते हैं ।

प्रश्न—ये शब्द किस प्रकार से सिद्ध हुए हैं ?

उत्तर—भग-ज्ञान, ऐसा भग जिसमें है वह भगवान् कहलाता है । अघ-पाप, अघ जिसमें है वह अघवान् है । गायें जिसके हैं वह गोमान् है । धन इसमें है वह धनवान् है ।

एतद्—यह इसके है वह एतावान् आदि । इन शब्दों में 'मंत्वंत्विन्' से वन्तु प्रत्यय हुआ है ।

---

१. यः संबुद्धेः सकारमाश्रित्योत्पन्नः स उकारस्तं संबुद्धेः सकारं प्रति सन्निपातः अयं सन्निपातलक्षणविधिः । तद्विघातस्य संबुद्धिसिलोपस्य अनिमित्तं हेतुर्न भवतीत्यर्थः । वाम्शसोरिति सूत्राद्वा इति वर्तते ॥

यत्तदेतेभ्यो डावन्तुः ॥२८० ॥

यद् तद् एतद् इत्येतेभ्यः परतो डावन्तुः प्रत्ययो भवति परिमाणेऽर्थे । डकार अनुबन्धः ।

डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥२८१ ॥

डकार इति अन्त्यस्वरादेर्लोपार्थः । उकार उच्चारणार्थः । यत्परिमाणमस्य यावान् । तत्परिमाणमस्य तावान् । एतत्परिमाणमस्य एतावान् ।

इदमो डियन्तुः ॥२८२ ॥

इदमः परो डियन्तु प्रत्ययो भवति परिमाणेऽर्थे । डकारउकारौ पूर्ववत् । इदं परिमाणमस्य इयान् ।

परिमाण अर्थ में यत् तद् और एतद् शब्दों से परे डावन्तु प्रत्यय होता है ॥२८० ॥

इस प्रत्यय में ड् का अनुबंध एवं उकार का अनुबंध लोप हो जाता है ।

'ड्' का अनुबंध अन्तिम स्वर को आदि में लेकर व्यंजन के लोप करने के लिये है ॥२८१ ॥

डकार का अनुबंध उच्चारण के लिये है । अतः यत् से डावन्तु प्रत्यय होकर य् + आवन्त् = यावन्त् बना । ये तद्धित के प्रत्यय हैं अतः "कृत्तद्धितसमासाश्च" सूत्र से लिंग संज्ञा होकर सि आदि विभक्तियाँ आकर रूप चलेंगे । इसका अर्थ है कि 'जो परिमाण है इसका' अर्थात् 'जितना' यह अर्थ होता है । ऐसे 'वह परिमाण है इसका' ।

तत् + डावन्तु त् + आवन्त् बना । अर्थात् 'उतना' 'यह परिमाण है जिसका' एतत् + डावन्तु— एत् + आवन्त् = एतावन्त् बना । अर्थात् 'इतना' यावन्त्, तावन्त्, एतावन्त् ।

यावन्त्—जितना

यावान्	यावन्तौ	यावन्तः	यावते	यावद्भ्याम्	यावद्भ्यः
हे यावन् !	हे यावन्तौ !	हे यावन्तः !	यावतः	यावद्भ्याम्	यावद्भ्यः
यावन्तम्	यावन्तौ	यावतः	यावतः	यावतोः	यावताम्
यावता	यावद्भ्याम्	यावद्भिः	यावति	यावतोः	यावत्सु

तावन्त्—उतना

तावान्	तावन्तौ	तावन्तः	तावते	तावद्भ्याम्	तावद्भ्यः
हे तावन् !	हे तावन्तौ !	हे तावन्तः !	तावतः	तावद्भ्याम्	तावद्भ्यः
तावन्तम्	तावन्तौ	तावतः	तावतः	तावतोः	तावताम्
तावता	तावद्भ्याम्	तावद्भिः	तावति	तावतोः	तावत्सु

एतावन्त्—इतना

एतावान्	एतावन्तौ	एतावन्तः	एतावते	एतावद्भ्याम्	एतावद्भ्यः
हे एतावन् !	हे एतावन्तौ !	हे एतावन्तः !	एतावतः	एतावद्भ्याम्	एतावद्भ्यः
एतावन्तम्	एतावन्तौ	एतावतः	एतावतः	एतावतोः	एतावताम्
एतावता	एतावद्भ्याम्	एतावद्भिः	एतावति	एतावतोः	एतावत्सु

'यह परिमाण है इसका' इस अर्थ में इदं शब्द से डियन्तु प्रत्यय होता है ॥२८२ ॥

परिमाण अर्थ में—अतः डियन्तु में डकार का अनुबंध । "तत्रेदमिः" सूत्र से इदं को इ आदेश एवं 'इवर्णावर्णयोर्लोपः" इस सूत्र से इ का लोप होकर प्रत्यय मात्र से रूप बन गया । 'इयन्त्' लिंग संज्ञा होकर विभक्तियाँ आकर इयान् बना ।

किमो डियन्तुः ॥२८३॥

किमः शब्दात्परो डियन्तुः प्रत्ययो भवति परिमाणेऽर्थे। डकारउकारौ पूर्ववत्। किम्परिमाणमस्य कियान्। पूर्वमन्त्यस्वरादेर्लोपं कृत्वा पश्चादेकदेशविकृतमनन्यवदिति न्यायात्। तत्रेदमिरिति इ आदेशः। इवर्णावर्णयोर्लोप इत्यादिना इकारलोपः। अनेन प्रकारेण सिद्धा भवन्ति। नीतकम्। भगवान्। भगवन्तौ। भगवन्तः। भगवन्तं। भगवन्तौ। भगवतः। भगवता। भगवद्भ्यां। भगवद्भिः। सुपि-भगवत्सु। एवं सर्वत्र। सम्बोधने—

भगवदघवतोश्च ॥२८४॥

भगवदघवतोश्च वादेरवयवस्य उत्वं वा भवति सम्बुद्धौ सौ परे। एवं संबुद्धि बिना गोमन् धनवन् यावन् तावन् एतावन् इयन् प्रभृतयः। यत्प्रमाणमस्य यावन्। हे भगो, हे भगवन्। हे अघो, हे अघवन्। अन्यत्र हे गोमन्। हे धनवन्। हे यावन्। हे तावन्। हे एतावन्। हे इयन्। हे कियन्। शन्तृङन्तक्विबन्ता धातुत्वं न त्यजन्ति। शन्तृङन्तस्य क्विबन्तानां च। भवन्तशब्दस्य धातुत्वात् सौ दीर्घो न भवति। भवन्। भवन्तौ। भवन्तः। इत्यादि। एवं पचन् पठन् प्रभृतयः। ददन्तशब्दस्य तु भेदः। युजेरसमासे नुर्घुटि इत्यनुवर्त्तते।

किम् शब्द से परे डियन्तु प्रत्यय होता है ॥२८३॥

परिमाण अर्थ में—'क्या परिमाण है इसका' किम् + डियन्तु। इस डियन्तु प्रत्यय से अनुबंध से इम् का लोप होकर कियन्त् बना।

इयन्त्—इतना

इस प्रकार से ये रूप सिद्ध हुए हैं।

इयान्	इयन्तौ	इयन्तः	इयते	इयद्भ्याम्	इयद्भ्यः
हे इयन् !	हे इयन्तौ !	हे इयन्तः !	इयतः	इयद्भ्याम्	इयद्भ्यः
इयन्तम्	इयन्तौ	इयतः	इयतः	इयतोः	इयताम्
इयता	इयद्भ्याम्	इयद्भिः	इयति	इयतोः	इयत्सु
कियान्	कियन्तौ	कियन्तः	कियते	कियद्भ्याम्	कियद्भ्यः
हे कियन् !	हे कियन्तौ !	हे कियन्तः !	कियतः	कियद्भ्याम्	कियद्भ्यः
कियन्तम्	कियन्तौ	कियतः	कियतः	कियतोः	कियताम्
कियता	कियद्भ्याम्	कियद्भिः	कियति	कियतोः	कियत्सु

संबोधन में—भगवन्त + सि अघवन्त + सि

भगवत् और अघवत् के 'व' के आदि के अवयव को विकल्प से उकार हो जाता है संबोधन की सि के आने पर ॥२८४॥

अतः हे भगो ! हे अघो ! बन गया।

भवन्त् शब्द है इसमें शतृङ् प्रत्यय हुआ है इसका अर्थ है होते हुए। शन्तृङ् है अंत में जिसके एवं क्विप् हुआ है अंत में जिसके ऐसे शब्द धातुपने को नहीं छोड़ते हैं अतः यहाँ शन्तृङंत भवन्त् शब्द है धातु रूप होने से विभक्ति के आने पर दीर्घ नहीं हुआ।

भवन्त् + सि, सि का लोप होकर भवन् बन गया। बाकी रूप पूर्ववत् चलेंगे। यथा—

भवन्	भवन्तौ	भवन्तः	भवन्तम्	भवन्तौ	भवतः
हे भवन् !	हे भवन्तौ !	हे भवन्तः !	भवता	भवद्भ्याम्	भवद्भिः

अभ्यस्तादन्तिरनकारः ॥२८५॥

अभ्यस्तात्परोऽन्तिरनकारो भवति घुटि परे। ददत्, ददद्। ददतौ। ददतः। इत्यादि। एवं दधन्त् जक्षन्त् जाग्रन्त् प्रभृतयः। महन्तशब्दस्य तु भेदः। दीर्घमामि सनौ, घुटि चासम्बुद्धौ इति वर्तते।

सान्तमहतोर्नोपधायाः ॥२८६॥

सान्त् महन्त् इत्येतयोर्नकारस्योपधाया दीर्घो भवति असम्बुद्धौ घुटि परे। महान्। महान्तौ। महान्तः। हे महन्। हे महान्तौ। हे महान्तः। महान्तं। महान्तौ। महतः। महता। महद्भ्यां। महद्भिः। इत्यादि॥ इति तकारान्ताः। थकारान्तोऽग्निमथ् शब्दः। अग्निमत्, अग्निमद्[1]। अग्निमथौ। अग्निमथः।

भवते	भवद्भ्याम्	भवद्भ्यः	भवतः	भवतोः	भवताम्
भवतः	भवद्भ्याम्	भवद्भ्यः	भवति	भवतोः	भवत्सु

इसी प्रकार से पठन्त् पचन्त् गच्छन्त् आदि के रूप चलेंगे।

ददन्त् शब्द में कुछ भेद हैं।

ददन्त् + सि

अभ्यस्त संज्ञक से परे घुट् विभक्ति के आने पर अन्त के नकार का लोप हो जाता है ॥२८५॥

पुनः 'वा विरामे' से विकल्प से प्रथम अक्षर होकर ददत्, ददद् ऐसे दो रूप बने।

ददन्त्—देते हुए

ददत्, ददद	ददतौ	ददतः	ददते	ददद्भ्याम्	ददद्भ्यः
हे ददत् !	हे ददतौ !	हे ददतः !	ददतः	ददद्भ्याम्	ददद्भ्यः
ददतम्	ददतौ	ददतः	ददतः	ददतोः	ददताम्
ददता	ददद्भ्याम्	ददद्भिः	ददति	ददतोः	ददत्सु

इसी प्रकार से दधन्त्, जक्षन्त्, जाग्रन्त् आदि के रूप चलते हैं।

महन्त् शब्द में कुछ भेद है।

'दीर्घमामिसनौ' 'घुटि चा सम्बुद्धौ' सूत्र अनुवृत्ति में चले आ रहे हैं। महन्त् + सि

असंबुद्ध और घुट् विभक्ति के आने पर सकारांत और महन्त् शब्द के नकार की उपधा को दीर्घ हो जाता है ॥२८६॥

महान्त् + सि सि और संयुक्त त् का लोप होकर महान् बना।

महन्त्—बड़ा-श्रेष्ठ

महान्	महान्तौ	महान्तः	महते	महद्भ्याम्	महद्भ्यः
हे महन् !	हे महान्तौ !	हे महान्तः !	महतः	महद्भ्याम्	महद्भ्यः
महान्तम्	महान्तौ	महतः	महतः	महतोः	महताम्
महता	महद्भ्याम्	महद्भिः	महति	महतोः	महत्सु

इस प्रकार से तकारांत शब्द पूर्ण हुए अब थकारांत अग्निमथ् शब्द है।

अग्निमथ् + सि 'धुटां तृतीयः' से तृतीय अक्षर एवं 'वा विरामे' प्रथम अक्षर होकर अग्निमत्, अग्निमद् शब्द बना।

---

१. वा विरामे धुटां तृतीय इति थकारस्य दकारः।

संबोधनेऽपि तद्वत्। अग्निमथं। अग्निमथौ। अग्निमथः। अग्निमथा। अग्निमद्भ्यां। अग्निमद्भिः। इत्यादि। इति थकारान्ताः। दकारान्तः पुल्लिङ्गस्तत्त्वविद्शब्दः। तत्त्ववित्, तत्त्वविद्। तत्त्वविदौ। तत्त्वविदः इत्यादि। द्विपाद्शब्दस्य तु भेदः। द्विपाद्, द्विपादौ। द्विपादः। सम्बोधनेऽपि तद्वत्। द्विपादं। द्विपादौ। शसादौ—

पात्पदं समासान्तः ॥२८७॥

समासान्तः पाच्छब्दः पदमापद्यते अघुटि स्वरे परे। द्विपदः द्विपदा। द्विपाद्भ्यामित्यादि। एवं चतुष्पाद् व्याघ्रपाद् प्रभृतयः। त्यद्शब्दस्य तु भेदः। सौ—

अग्निमत्, अग्निमद्	अग्निमथौ	अग्निमथः
हे अग्निमत्, अग्निमद् !	हे अग्निमथौ !	हे अग्निमथः !
अग्निमथम्	अग्निमथौ	अग्निमथः
अग्निमथा	अग्निमद्भ्याम्	अग्निमद्भिः
अग्निमथे	अग्निमद्भ्याम्	अग्निमद्भ्यः
अग्निमथः	अग्निमद्भ्याम्	अग्निमद्भ्यः
अग्निमथः	अग्निमथोः	अग्निमथाम्
अग्निमथि	अग्निमथोः	अग्निमत्सु

थकारांत शब्द हुए। अब दकारांत तत्त्वविद् शब्द है।

तत्त्वविद् + सि, सि का लोप एवं विकल्प से प्रथम अक्षर करके रूप चलेगा।

तत्त्वविद्—तत्त्वों का जानने वाला

तत्त्ववित्, तत्त्वविद्	तत्त्वविदौ	तत्त्वविदः
हे तत्त्ववित्, तत्त्वविद् !	हे तत्त्वविदौ !	हे तत्त्वविदः !
तत्त्वविदम्	तत्त्वविदौ	तत्त्वविदः
तत्त्वविदा	तत्त्वविद्भ्याम्	तत्त्वविद्भिः
तत्त्वविदे	तत्त्वविद्भ्याम्	तत्त्वविद्भ्यः
तत्त्वविदः	तत्त्वविद्भ्याम्	तत्त्वविद्भ्यः
तत्त्वविदः	तत्त्वविदोः	तत्त्वविदाम्
तत्त्वविदि	तत्त्वविदोः	तत्त्ववित्सु

द्विपाद् शब्द में कुछ भेद है—

घुट् विभक्तियों तक कुछ भेद नहीं है। द्विपाद् + शस्

समासांत पाद् शब्द अघुट् स्वर और व्यंजन के आने पर पद् हो जाता है ॥२८७॥

द्विपाद् + शस् = द्विपद् + शस् = द्विपदः बना।

द्विपाद्	द्विपादौ	द्विपादः	द्विपदे	द्विपाद्भ्याम्	द्विपाद्भ्यः
हे द्विपाद् !	हे द्विपादौ !	हे द्विपादः !	द्विपदः	द्विपाद्भ्याम्	द्विपाद्भ्यः
द्विपादम्	द्विपादौ	द्विपदः	द्विपदः	द्विपादोः	द्विपदाम्
द्विपदा	द्विपाद्भ्याम्	द्विपाद्भिः	द्विपदि	द्विपादोः	द्विपात्सु

इसी प्रकार से चतुष्पाद् व्याघ्रपाद् आदि शब्द चलते हैं।

त्यद् शब्द में कुछ भेद हैं।

त्यद + सि

"त्यदादीनाम् विभक्तौ" से अकारांत 'त्य' रहा पुनः

तस्य च ॥२८८ ॥

त्यदादीनां तकारस्य सकारो भवति सौ परे। स्यः। त्यौ। त्ये। अन्यत्र सर्वशब्दवत्। एवं एतत् तद् शब्दौ। एषः। एतौ। एते। इत्यादि। सः। तौ। ते। इत्यादि।

एतस्य चान्वादेशे द्वितीयायां चैनः ॥२८९ ॥

एतस्य इदमश्च टौसोर्द्वितीयायां च एनादेशो भवति कथितस्यानुकथनविषये। एनं। एनौ। एनान्। एनेन। एनयोः। इति दकारान्ताः। धकारान्तः पुल्लिङ्गस्तत्त्वबुध्शब्दः। विरामव्यञ्जनादिष्विति वर्त्तते।

त्यदादि के तकार को सकार हो जाता है ॥२८८ ॥

सि विभक्ति के आने पर स् का विसर्ग होकर स्यः बना।

त्यद् + औ अकारांत होकर त्यौ बना। त्यद् = जस् सर्वनामवत् त्ये बना।

यद् एतद् शब्द है 'त्यदादीनाम् विभक्तौ' इस सूत्र से अकारान्त। तद् के त् को सकार एतद् के त् को भी सकार होकर यद् का यः तद्—सः, एतद्—एषः बना।

यद्—जो

यः	यौ	ये	यस्मात्	याभ्याम्	येभ्यः
यम्	यौ	यान्	यस्य	ययोः	येषाम्
येन	याभ्याम्	यैः	यस्मिन्	ययोः	येषु
यस्मै	याभ्याम्	येभ्यः			

तद्—वह

सः	तौ	ते	तस्मात्	ताभ्याम्	तेभ्यः
तम्	तौ	तान्	तस्य	तयोः	तेषाम्
तेन	ताभ्याम्	तैः	तस्मिन्	तयोः	तेषु
तस्मै	ताभ्याम्	तेभ्यः			

एतद् और इदम् शब्द से परे टा, ओस् और द्वितीया विभक्ति के आने पर 'एन' आदेश हो जाता है अन्वादेश के अर्थ में ॥२८९ ॥

कहे गये शब्द को पुनः कहने को अन्वादेश कहते हैं।

अतः एन् + अम् = एनम्, एन् + औ = एनौ, एन + शस् = एनान् एन + टा = एनेन, एन + ओस = एनयोः

एतद्—यह

एषः	एतौ	एते	एतस्मात्	एताभ्याम्	एतेभ्यः
एतम्, एनम्	एतौ, एनौ	एतान्, एनान्	एतस्य	एतयोः, एनयोः	एतेषाम्
एतेन, एनेन	एताभ्याम्	एतैः	एतस्मिन्	एतयोः, एनयोः	एतेषु
एतस्मै	एताभ्याम्	एतेभ्यः			

दकारांत शब्द हुए। अब धकारांत पुल्लिंग 'तत्त्वबुध्' शब्द है।

तत्त्वबुध + सि

'विरामव्यंजनादिषु' अनुवृत्ति में चला आ रहा है।

हचतुर्थान्तस्य धातोस्तृतीयादेरादि चतुर्थत्वमकृतवत् ॥२९० ॥

हचतुर्थान्तस्य तृतीयादेर्धातोरादि चतुर्थत्वं भवति विरामे व्यञ्जनादौ च । स चाकृतवत् । तत्त्वभुत्, तत्त्वभुद् । तत्त्वबुधौ । तत्त्वबुधः । संबोधनेऽपि तद्वत् । तत्त्वबुधा । तत्त्वभुद्भ्यां । तत्त्वभुद्भिः । इत्यादि । इति धकारान्ताः । नकारोऽन्तः पुल्लिङ्ग राजन् शब्दः । घुटि चासंबुद्धौ इति दीर्घः । लिङ्गान्तनकारस्येति नकारलोपः । राजा । राजानौ । राजानः ।

न सम्बुद्धौ ॥२९१ ॥

लिङ्गान्तनकारस्य लोपो न भवति सम्बुद्धौ । हे राजन् । राजानं । राजानौ (अघुट्स्वरे अवमसंयोगादनो इत्यादिना लोपः)

तवर्गश्चटवर्गयोगे चटवर्गौ ॥२९२ ॥

अनन्त्यस्तवर्गश्चटवर्गयोगे चटवर्गौ प्राप्नोति आन्तरतम्यात् । राज्ञः । राज्ञा । व्यञ्जनादौ नलोपः । अकारो दीर्घं घोषवतीति दीर्घे प्राप्ते नसंयोगान्तावलुप्तवच्च पूर्वविधौ इति नकारोऽलुप्तवद्भवति ।

हकारांत और चतुर्थांत धातु के शब्द के ह अथवा चतुर्थ अक्षर को तृतीय अक्षर एवं चतुर्थ की आदि में तृतीय को अपने वर्ग का चतुर्थ अक्षर हो जाता है ॥२९० ॥

विराम और व्यंजन वाली विभक्ति के आने पर पुनः 'वा विरामे' से प्रथम अक्षर होकर तत्त्वबुध को तत्त्वभुत्, तत्त्वभुद् बना ।

तत्त्वबुध्—तत्त्वों को जानने वाला

तत्त्वभुत्, तत्त्वभुद्	तत्त्वबुधौ	तत्त्वबुधः
हे तत्त्वभुत्, तत्त्वभुद् !	हे तत्त्वबुधौ !	हे तत्त्वबुधः !
तत्त्वबुधम्	तत्त्वबुधौ	तत्त्वबुधः
तत्त्वबुधा	तत्त्वभुद्भ्याम्	तत्त्वभुद्भिः
तत्त्वबुधे	तत्त्वभुद्भ्याम्	तत्त्वभुद्भ्यः
तत्त्वबुधः	तत्त्वभुद्भ्याम्	तत्त्वभुद्भ्यः
तत्त्वबुधः	तत्त्वबुधोः	तत्त्वबुधाम्
तत्त्वबुधि	तत्त्वबुधोः	तत्त्वभुत्सु

धकारान्त शब्द हुए अब नकारांत पुल्लिंग राजन् शब्द है । राजन् + सि "घुटि चासंबुद्धौ" से दीर्घ "व्यंजनाच्च" से सि का लोप "लिंगांतनकारस्य" से न का लोप राजा बना । राजन् + औ राजानौ । संबोधन में— राजन् + सि

संबोधन में लिंगांत नकार का लोप नहीं होता है ॥२९१ ॥

अतः सि का लोप होकर हे राजन् ! बना ।

राजन् + शस्

'अघुट् स्वरे अवमसंयोगादनो' इस सूत्र से अन् के 'अ' का लोप तब राजन् + अस् रहा ।

तवर्ग को चवर्ग और टवर्ग के योग में चवर्ग और टवर्ग हो जाता है ॥२९२ ॥

अर्थात् तवर्ग के अंत में नहीं हो तब चवर्ग और टवर्ग के आने पर उसी क्रम से चवर्ग और टवर्ग हो जाता है । यहाँ नकार तवर्ग का अंतिम अक्षर है उसे ज् के निमित्त से चवर्ग का अंतिम अक्षर ञकार हुआ । 'जञोर्ञः' इस नियम से ज और ञ के मिलने पर ज्ञ होकर 'राज्ञः' बन गया ।

राजभ्यां । राजभिः । राज्ञे । राजभ्यां । राजभ्यः । ङौ । ईङ्योर्वेति अलोपो वा भवति । राज्ञि, राजनि । राज्ञोः । राजसु । एवं तक्षन् मूर्धन् प्रभृतयः । आत्मन्शब्दस्य तु भेदः । आत्मा । आत्मानौ । आत्मानः । हे आत्मन् । इत्यादि । आत्मानं । आत्मानौ । अघुट्स्वरेअवमसंयोगादिति प्रतिषेधादनोऽलोपो नास्ति । आत्मनः । आत्मना । इत्यादि । एवं सुपर्वन् सुशर्मन ब्रह्मन् कृतवर्मन् प्रभृतयः । करिन् शब्दस्य तु भेदः । सौ—इन्हन् इत्यादिना दीर्घः । करी । करिणौ । करिणः । हे करिन् । इत्यादि । एवं दण्डिन् हस्तिन् गोमिन्

राजन् + भ्याम् व्यंजन वाली विभक्ति के आने पर न् का लोप हो जाता है पुनः "अकारो दीर्घं घोषवति' सूत्र से अ को दीर्घ प्राप्त था किन्तु पहले सूत्र आया है कि नकार और संयुक्त अक्षर का लोप करने पर अन्य विधि नहीं होने से दीर्घ नहीं हुआ अतः राजभ्याम् बना ।

राजन् + ङि

'ईङ्योर्वा' इस सूत्र से ङि के आने पर अन् के अकार का लोप विकल्प से होता है अतः राज्ञि, राजनि बना । संबोधन में नकार का लोप नहीं हुआ है ।

राजन्—राजा

राजा	राजानौ	राजानः	राज्ञे	राजभ्याम्	राजभ्यः
हे राजन् ।	हे राजानौ ।	हे राजानः ।	राज्ञः	राजभ्याम्	राजभ्यः
राजानम्	राजानौ	राज्ञः	राज्ञः	राज्ञोः	राज्ञाम्
राज्ञा	राजभ्याम्	राजभिः	राज्ञि, राजनि	राज्ञोः	राजसु

इसी प्रकार से तक्षन् और मूर्धन् शब्द भी चलते हैं । यथा—

मूर्धा	मूर्धानौ	मूर्धानः	मूर्ध्ने	मूर्धभ्याम्	मूर्धभ्यः
हे मूर्धन् ।	हे मूर्धानौ ।	हे मूर्धानः ।	मूर्ध्नः	मूर्धभ्याम्	मूर्धभ्यः
मूर्धानम्	मूर्धानौ	मूर्ध्नः	मूर्ध्नः	मूर्ध्नोः	मूर्ध्नाम्
मूर्ध्ना	मूर्धभ्याम्	मूर्धभिः	मूर्ध्नि, मूर्धनि	मूर्ध्नोः	मूर्धसु

आत्मन् शब्द में कुछ भेद है । शस् आदि विभक्तियों के आने पर अन् के अकार का लोप नहीं होता क्योंकि 'अवमसंयोगः' सूत्र में वम का संयोग न हो तभी अकार का लोप माना है और इस आत्मन् शब्द में 'म' का संयोग है अतः—

आत्मन्—जीव

आत्मा	आत्मानौ	आत्मानः	आत्मने	आत्मभ्याम्	आत्मभ्यः
हे आत्मन् ।	हे आत्मानौ ।	हे आत्मानः ।	आत्मनः	आत्मभ्याम्	आत्मभ्यः
आत्मानम्	आत्मानौ	आत्मनः	आत्मनः	आत्मनोः	आत्मनाम्
आत्मना	आत्मभ्याम्	आत्मभिः	आत्मनि	आत्मनोः	आत्मसु

इसी प्रकार से सुपर्वन्, सुशर्मन्, ब्रह्मन्, कृतवर्मन् शब्दों के रूप चलेंगे ।

ब्रह्मन्—ब्रह्मा

ब्रह्मा	ब्रह्माणौ	ब्रह्माणः	ब्रह्मणे	ब्रह्मभ्याम्	ब्रह्मभ्यः
हे ब्रह्मन् ।	हे ब्रह्माणौ ।	हे ब्रह्माणः ।	ब्रह्मणः	ब्रह्मभ्याम्	ब्रह्मभ्यः
ब्रह्माणम्	ब्रह्माणौ	ब्रह्मणः	ब्रह्मणः	ब्रह्मणोः	ब्रह्मणाम्
ब्रह्मणा	ब्रह्मभ्याम्	ब्रह्मभिः	ब्रह्मणि	ब्रह्मणोः	ब्रह्मसु

करिन् शब्द में भेद है । करिन् + सि "[illegible]" इस सूत्र से सि का लोप "इन् हन् पूषन् इत्यादि" सूत्र से न् की उपधा को दीर्घ होकर 'लिंगांतनकारस्य' इस सूत्र से न् का लोप होकर 'करी' बना ।

तपस्विन् प्रभृतयः । वृत्रहन् शब्दस्य तु भेदः । वृत्रहा । वृत्रहणौ । वृत्रहणः । हे वृत्रहन् । वृत्रहणं । वृत्रहणौ । अघुट्स्वरे लोपे कृते । इन्हन् इत्यादिना दीर्घः । अस्मादेव हन उपधायाः सावेव दीर्घः क्विपि न दीर्घः ।

हनेर्हेर्घिरुपधालोपे ॥२९३ ॥

हनेरुपधायाः लोपे कृते हेः स्थाने घिर्भवति । धत्वे नस्य णत्वाभावः । वृत्रघ्नः । वृत्रघ्ना । वृत्रहभ्यां । वृत्रहभिः । इत्यादि । एवं ब्रह्महन् भ्रूणहन् ऋणहन् एते शब्दाः । पूषन् शब्दस्य तु भेदः । सौ दीर्घः । पूषा । पूषणौ । पूषणः । हे पूषन् । पूषणं । पूषणौ ।

हन्मासदोषपूषां शसादौ स्वरे वा ॥२९४ ॥

हन् मास दोष पूषन् इत्येतेषां उपधायाः उत्तरस्य लोपो वा भवति शसादौ स्वरे परे । पूषः, पूष्णः । पूषा, पूष्णा । पूषभ्यां । पूषभिः । इत्यादि । एवं अर्यमन् शब्दः । अर्वन्शब्दस्य तु भेदः । सौ—अर्वा ।

करिन्—हाथी

करी	करिणौ	करिणः	करिणे	करिभ्याम्	करिभ्यः
हे करिन् !	हे करिणौ !	हे करिणः !	करिणः	करिभ्याम्	करिभ्यः
करिणम्	करिणौ	करिणः	करिणः	करिणोः	करिणाम्
करिणा	करिभ्याम्	करिभिः	करिणि	करिणोः	करिषु

इसी प्रकार से दण्डिन्, हस्तिन्, गोमिन् और तपस्विन् के रूप चलते हैं ।

वृत्रहन् शब्द में कुछ भेद हैं ।

वृत्रहन् + शस्

'अघुट् स्वरे लोपम्' से स्वर का लोप प्राप्त था और 'इन् हन् पूषन्' इत्यादि सूत्र से दीर्घ प्राप्त था । इसी सूत्र से ही हन् की उपधा को सि के आने पर ही दीर्घ होगा क्विप् प्रत्यय के आने पर दीर्घ नहीं होगा ।

हन् की उपधा का लोप करने पर ह् के स्थान में घ् का आदेश हो जाता है ॥२९३ ॥

ह् को घ् होने पर न् को ण् नहीं होता है ।

वृत्रहन् + अस्

वृत्रहा	वृत्रहणौ	वृत्रहणः	वृत्रघ्ने	वृत्रहभ्याम्	वृत्रहभ्यः
हे वृत्रहन् !	हे वृत्रहणौ ।	हे वृत्रहणः ।	वृत्रघ्नः	वृत्रहभ्याम्	वृत्रहभ्यः
वृत्रहणम्	वृत्रहणौ	वृत्रघ्नः	वृत्रघ्नः	वृत्रघ्नोः	वृत्रघ्नाम्
वृत्रघ्ना	वृत्रहभ्याम्	वृत्रहभिः	वृत्रघ्नि, वृत्रहणि	वृत्रघ्नोः	वृत्रहसु

इसी प्रकार से ब्रह्महन्, भ्रूणहन्, ऋणहन् आदि शब्दों के रूप चलते हैं पूषन् शब्द में कुछ भेद है ।

पूषन् + सि इत्यादि घुट् विभक्ति में पूर्ववत् पूषा आदि रूप ही बनेंगे । पूषन् + शस् ।

शसादि स्वर वाली विभक्ति के आने पर हन् मास् दोष और पूषन् इनकी उपधा के उत्तर अक्षर का लोप विकल्प से हो जाता है ॥२९४ ॥

जब उपधा के उत्तर नकार का लोप हुआ और 'अवमसंयोगा' इत्यादि सूत्र से अन् के अकार का लोप होकर पूषः बना । और नकार का लोप नहीं होने पर पूष्णः बना ।

अर्वन्नर्वन्तिरसावनञ् ॥२९५॥

अर्वन्शब्दोऽर्वन्तिर्भवति असावनञ्परश्चेति । अर्वन्तौ । अर्वन्तः । हे अर्वन् । हे अर्वन्तौ । हे अर्वन्तः । अर्वन्तम् । अर्वन्तौ । अर्वतः । अर्वता । अर्वद्भ्याम् । अर्वद्भिः । इत्यादि । नञ्परश्चेत् आत्मनशब्दवत् । अनर्वा । अनर्वाणौ अनर्वाणः । इत्यादि । श्वन् शब्दस्य तु भेदः । सौ—श्वा । श्वानौ । श्वानः । हे श्वन् । श्वानं । श्वानौ । अघुट्स्वरादौ सेट्कस्याप्यनुवर्तते ।

पूषन्—सूर्य

पूषा	पूषणौ	पूषणः	पूषे, पूष्णे	पूषभ्याम्	पूषभ्यः
हे पूषन् !	हे पूषणौ !	हे पूषणः !	पूषः, पूष्णः	पूषभ्याम्	पूषभ्यः
पूषणम्	पूषणौ	पूषः, पूष्णः	पूषः, पूष्णः	पूषोः, पूष्णोः	पूषाम्, पूष्णाम्
पूषा, पूष्णा	पूषभ्याम्	पूषभिः	पूषि, पूष्णि	पूषोः, पूष्णोः	पूषसु

अर्यमन्—सूर्य

अर्यमा	अर्यमणौ	अर्यमणः	अर्यम्णे	अर्यमभ्याम्	अर्यमभ्यः
हे अर्यमन् !	हे अर्यमणौ !	हे अर्यमणः !	अर्यम्णः	अर्यमभ्याम्	अर्यमभ्यः
अर्यमणम्	अर्यमणौ	अर्यमणः	अर्यम्णः	अर्यम्णोः	अर्यम्णाम्
अर्यमणा	अर्यमभ्याम्	अर्यमभिः	अर्यमणि	अर्यम्णि, अर्यम्णोः	अर्यमसु

अर्वन् शब्द में कुछ भेद है।

सि विभक्ति और नञ् समास के बिना अर्वन् शब्द को अर्वन्त आदेश हो जाता है ॥२९५॥

अर्वन् + सि पूर्ववत् अर्वा बना।

अर्वन् + औ—अर्वन्त + औ = अर्वन्तौ।

अर्वन्त् + शस्, अर्वन्त् + भ्याम्

"व्यंजने चैषां निः" सूत्र से शस् आदि स्वर और व्यंजन वाली विभक्ति के आने पर नकार का लोप हो जाता है अतः अर्वतः, अर्वद्भ्याम् बना।

अर्वन्—घोड़ा

अर्वा	अर्वन्तौ	अर्वन्तः	अर्वते	अर्वद्भ्याम्	अर्वद्भ्यः
हे अर्वन् !	हे अर्वन्तौ !	हे अर्वन्तः !	अर्वतः	अर्वद्भ्याम्	अर्वद्भ्यः
अर्वन्तम्	अर्वन्तौ	अर्वतः	अर्वतः	अर्वतोः	अर्वताम्
अर्वता	अर्वद्भ्याम्	अर्वद्भिः	अर्वति	अर्वतोः	अर्वत्सु

जब नञ् समास हो गया तब अनर्वन् शब्द के रूप आत्मन् शब्द के समान चलेंगे। क्योंकि इसमें व का संयोग होने से अन् के अकार का लोप नहीं होगा।

अनर्वा	अनर्वाणौ	अनर्वाणः	अनर्वणः	अनर्वभ्याम्	अनर्वभ्यः
अनर्वाणम्	अनर्वाणौ	अनर्वणः	अनर्वणः	अनर्वणोः	अनर्वणाम्
अनर्वणा	अनर्वभ्याम्	अनर्वभिः	अनर्वणि	अनर्वणोः	अनर्वसु
अनर्वणे	अनर्वभ्याम्	अनर्वभ्यः			

श्वन् शब्द में कुछ भेद है।

श्वन् + सि = श्वा आदि पाँच घुट् संज्ञक विभक्ति के रूप पूर्ववत्।

श्वन् + शस्

श्वयुवमघोनां च ॥२९६॥

श्वन् युवन् मघवन् एषां वशब्दस्योत्वं भवति अघुट्स्वरे परे। शुनः। शुना। श्वभ्यां। श्वभिः इत्यादि। एवं युवन्शब्दः। युवा। युवानौ। युवानः। हे युवन्। युवानं। युवानौ। यूनः। यूना। युवभ्यां। युवभिः। इत्यादि। मघवन्शब्दस्य तु भेदः। सौ अर्वन्नर्वन्तिरित्यनुवर्तते।

सौ च मघवान्मघवा वा ॥२९७॥

विभक्तौ सौ च परे मघवन् शब्दो मघवन्त् भवति वा। अन्त्यसन्तस्येति दीर्घे प्राप्ति निपातनाद्दीर्घः। मघवान्। मघवन्तौ। मघवन्तः। संबोधनेऽपि तद्वत्। मघवन्तं। मघवन्तौ। मघवतः। मघवता। मघवद्भ्यां। मघवद्भिः। इत्यादि। पक्षे। मघवा। मघवानौ। मघवानः। मघवानं। मघवानौ। मघोनः। मघोना। मघवभ्यां। मघवभिः। इत्यादि। श्वानमाचष्टे। तत्करोति तदाचष्टे इन्। इनि लिङ्गस्यानेकाक्षरस्येत्यादिना अन्त्यस्वरादेर्लोपे प्राप्ते।

'अघुट् स्वरादौ सेट्कस्यापि' सूत्र अनुवृत्ति में चला आ रहा है। श्वन्, युवन् और मघवन् इनके व् को अघुट् स्वर के आने पर उकार हो जाता है ॥२९६॥

श्वन्+शस् श् उ न्+अस्=शुन्+अस्=शुनः। इसी प्रकार से युवन्+अस्=यु उ न्+अस्=यूनः बना।

श्वन्—कुत्ता

श्वा	श्वानौ	श्वानः	शुने	श्वभ्याम्	श्वभ्यः
हे श्वन्।	हे श्वानौ।	हे श्वानः।	शुनः	श्वभ्याम्	श्वभ्यः
श्वानम्	श्वानौ	शुनः	शुनः	शुनोः	शुनाम्
शुना	श्वभ्याम्	श्वभिः	शुनि	शुनोः	श्वसु

युवन्—जवानी

युवा	युवानौ	युवानः	यूने	युवभ्याम्	युवभ्यः
हे युवन्।	हे युवानौ।	हे युवानः।	यूनः	युवभ्याम्	युवभ्यः
युवानम्	युवानौ	यूनः	यूनः	यूनोः	यूनाम्
यूना	युवभ्याम्	युवभिः	यूनि	यूनोः	युवसु

मघवन् शब्द में कुछ भेद है।

मघवन्+सि

'अर्वन्नर्वन्तिरसावनम्' सूत्र अनुवृत्ति में चला आ रहा है।

सि विभक्ति और विभक्तियों के आने पर मघवन् शब्द को विकल्प से मघवन्त् आदेश हो जाता है ॥२९७॥

सि औ जस् अम् औ पाँच जगह आदेश है। 'अन्त्यसन्तस्य' इत्यादि सूत्र से न् की उपधा को दीर्घ प्राप्त था, किन्तु यहाँ निपात से दीर्घ हुआ तो मघवान् त्+सि। सि और त् का लोप होकर मघवान् बना। इसके रूप भगवान् के समान चलेंगे। द्वितीय पक्ष में—मघवा, मघवानौ, आत्मन् के समान बन गये।

मघवन्+शस् २९६वें सूत्र से व को उ होकर संधि होकर मघोनः बना।

श्वान जैसी चेष्टा करता है या कहता है। इस अर्थ में "तत्करोति तदाचष्टे इन्" इस सूत्र से इन् प्रत्यय होकर "इनि लिंगस्यानेकाक्षरस्य" इत्यादि सूत्र से अंत स्वर की आदि का लोप प्राप्त था तब सूत्र लगा—

न शुनः ॥२९८॥

श्वन् इत्येतस्य अन्त्यस्वरादेर्लोपो न भवति इनि परे। श्वानयति। मघवानमाचष्टे मघवयति।

स्थूलदूरयुवक्षिप्रक्षुद्राणामन्तस्थादेर्लोपो गुणश्च नामिनाम् ॥२९९॥

स्थूलदूरयुवक्षिप्रक्षुद्र इत्येतेषामन्तस्थादेर्लोपो भवति नामिनां गुणश्च इनि परे। स्थूलमाचष्टे स्थवयति। दूरमाचष्टे दवयति। युवानमाचष्टे यवयति। क्षिप्रमाचष्टे क्षेपयति। क्षुद्रमाचष्टे क्षोदयति। इनि लिङ्गस्यानेकाक्षरस्येत्यादिना अन्त्यस्वरादेर्लोपः। अनि च विकरणे गुणः सर्वत्र। पञ्चन् शब्दस्य तु भेदः। तस्य बहुवचनमेव। कतेश्च जश्शसोर्लुक्। पञ्च। पञ्च। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। आमि च नुरित्यनुवर्त्तते।

संख्यायाः ष्णान्तायाः ॥३००॥

श्वन् इसके अन्त्य के आदि स्वर का लोप नहीं होता इन् के आने पर ॥२९८॥

पुनः इस सूत्र से इन् का लोप न होने से 'श्वानयति' बन गया। ऐसे ही मघवानमाचष्टे 'मघवयति' बना है।

स्थूल, दूर, युव, क्षिप्र और क्षुद्र इनके अंतस्थ की आदि का लोप और नामि को गुण हो जाता है इन् के आने पर ॥२९९॥

स्थूलं आचष्टे—स्थवयति। दूरमाचष्टे दवयति। युवानमाचष्टे यवयति। क्षिप्रमाचष्टे क्षेपयति। क्षुद्रमाचष्टे क्षोदयति। "इनि लिंगस्यानेकाक्षरस्य" इस सूत्र से यहाँ अन्त्य स्वर का लोप होकर "अनि च विकरणे" से गुण हो गया है।

मघवन्—इन्द्र

मघवान्	मघवन्तौ	मघवन्तः	मघवते	मघवद्भ्याम्	मघवद्भ्यः
हे मघवन् !	हे मघवन्तौ ।	हे मघवन्तः !	मघवतः	मघवद्भ्याम्	मघवद्भ्यः
मघवन्तम्	मघवन्तौ	मघवतः	मघवतः	मघवतोः	मघवताम्
मघवता	मघवद्भ्याम्	मघवद्भिः	मघवति	मघवतोः	मघवत्सु

द्वितीय पक्ष में—

मघवा	मघवानौ	मघवानः	मघोने	मघवभ्याम्	मघवभ्यः
हे मघवन् ।	हे मघवानौ !	हे मघवानः ।	मघोनः	मघवभ्याम्	मघवभ्यः
मघवानम्	मघवानौ	मघोनः	मघोनः	मघोनोः	मघोनाम्
मघोना	मघवभ्याम्	मघवभिः	मघोनि	मघोनोः	मघवत्सु

पञ्चन् शब्द में कुछ भेद है।

पंचन् आदि शब्द बहुवचन में ही चलते हैं।

पञ्चन् + जस्, पञ्चन् + शस्

'कतेश्च जश्शसोर्लुक्' से जस् शस् का लोप होकर लिंगांत नकार का लोप होने पर पञ्च, पञ्च बना।

पञ्चन् + भिस् 'लिंगांतनकारस्य' न् का लोप होकर पंचभिः बना।

पञ्चन् + आम्

षकारांत और नकारांत संख्यावाची शब्द से परे आम के आने पर नु का आगम हो जाता है ॥३००॥

'दीर्घमामिसनौ' अनुवृत्ति में आ रहा है।

षकारनकारान्तायाः संख्याया नुरागमो भवति आमि परे। दीर्घमामि सनौ इति अनुवर्तते।

नान्तस्य चोपधायाः ॥३०१॥

नान्तस्य चोपधाया दीर्घो भवति सनावामि परे। पञ्चानाम्। पञ्चसु। एवं सप्तन् नवम् दशन् प्रभृतयः। अष्टन्शब्दस्य तु भेदः। तस्यापि बहुवचनमेव।

अष्टनः सर्वासु ॥३०२॥

अष्टन्शब्दान्तस्य आ भवति सर्वासु विभक्तिषु। येन विधिस्तदन्तस्य इति नकारस्य आकारः। सवर्णे दीर्घः।

औ तस्माज्जस्शसोः ॥३०३॥

तस्मादष्टनः कृताकारात्परयोर्जश्शसोः स्थाने और्भवति। अष्टौ। अष्टौ। तस्माद्ग्रहणं किमर्थम्। आत्वस्यानित्यार्थं। तेन औत्वाभावे जश्शसोर्लुक् इत्यनेन जश्शसोर्लोपः। अष्ट। अष्ट। अष्टाभिः, अष्टभिः। अष्टाभ्यः, अष्टभ्यः। अष्टाभ्यः, अष्टभ्यः। आमि आत्वं संख्यायाः ष्णान्तायाः इति, अत्र अन्तग्रहणाधिक्यात् भूतपूर्वनान्तायाः अपि आमि नुरागमः। अष्टानाम्। अष्टसु, अष्टासु। इति नकारान्ताः। पफबभान्ता अप्रसिद्धाः। मकारान्तः पुल्लिङ्गः किम् शब्दः।

सुनु और आम् के आने पर नांत की उपधा को दीर्घ हो जाता है ॥३०१॥

और न का लोप हो जाता है। पञ्चानाम् बना।

पञ्च। पञ्च। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। पञ्चानाम्। पञ्चसु।

इसी प्रकार से सप्तन्, नवन् और दशन् के रूप चलते हैं।

यथा—

सप्त	सप्तभ्यः	नव	नवभ्यः	दश	दशभ्यः
सप्त	सप्तानाम्	नव	नवानाम्	दश	दशानाम्
सप्तभिः	सप्तसु	नवभिः	नवसु	दशभिः	दशसु
सप्तभ्यः		नवभ्यः		दशभ्यः	

अष्टन् शब्द में कुछ भेद है।

यह भी बहुवचन में ही चलता है।

सभी विभक्तियों के आने पर अष्टन् के अन्त को 'आ' हो जाता है ॥३०२॥

जिससे विधि हुई है वह अंत को हुई है अतः नकार को आकार हुआ।

अष्टा + जस् अष्टा + शस्

अष्टन् शब्द को आकारांत करने के बाद जस् शस् के स्थान में औ आदेश हो जाता है ॥३०३॥

अष्टा + औ = अष्टौ बना।

सूत्र में तस्माद् शब्द का ग्रहण क्यों किया है ? नकार को आकार किया गया है वह अनित्य है इस बात को सूचित करने के लिये ही तस्माद् पद का ग्रहण किया गया है। इसलिये जब जस् शस् को औ नहीं होगा तब 'जश्शसोर्लुक्' से जस् शस् का लोप एवं "लिंगांत नकारस्य" से नकार का लोप होकर अष्ट, अष्ट बना। न को 'आ' होने से अष्टाभिः अष्टाभ्यः। अष्ट + आम् "संख्यायाष्णान्तायाः" सूत्र से नु का आगम होकर अष्टानाम् बना। क्योंकि इस सूत्र में भी नकारांत पद से नु का आगम करने का विधान है अतः भूतपूर्व नकारांत होने से नु का आगम हुआ है। पुनः अष्टन् + आम् नु का आगम होकर अष्टानाम् बना।

किं कः ॥३०४॥

किंशब्दः को भवति विभक्तौ परतः। कः। कौ। के। कं। कौ। कान्। केन। काभ्यां। कैः। इत्यादि। इदम् शब्दस्य तु भेदः।

इदमियमयं पुंसि ॥३०५॥

इदम् शब्दस्य इयं भवति स्त्रियामयं पुंसि इदं च नपुंसके सौ परे। अयम्। अन्यत्र त्यदाद्यत्वम्।

दोऽद्वेर्मः ॥३०६॥

त्यदादीनां दकारस्य मो भवति अद्वेर्विभक्तौ। इमौ। इमे। इमं। इमौ। इमान्।

टौसोरनः ॥३०७॥

अग्वर्जितस्य इदंशब्दस्य अनादेशो भवति टौसोः परतः। अनेन।

अष्टौ	अष्टाभ्यः	अष्ट	अष्टभ्यः
अष्टौ	अष्टानाम्	अष्ट	अष्टानाम्
अष्टाभिः	अष्टासु	अष्टभिः	अष्टसु
अष्टाभ्यः		अष्टभ्यः	

इस प्रकार से नकारांत शब्द हुए। प फ ब और भकारांत शब्द अप्रसिद्ध हैं।

अब मकारांत पुल्लिंग किम् शब्द है।

किम् + सि

पुल्लिंग में विभक्तियों के आने पर किम् को 'क' आदेश होता है ॥३०४॥

अब 'क' शब्द से सारी विभक्तियाँ आने पर सर्वनाम के समान रूप चलेंगे। यथा—

कः	कौ	के	कस्मात्	काभ्याम्	केभ्यः
कम्	कौ	कान्	कस्य	कयोः	केषाम्
केन	काभ्याम्	कैः	कस्मिन्	कयोः	केषु
कस्मै	काभ्याम्	केभ्यः			

इदम् शब्द में कुछ भेद है।

इदम् शब्द को पुल्लिंग में 'अयं' स्त्रीलिंग में 'इयम्' और नपुंसक लिंग में 'इदम्' आदेश होता है ॥३०५॥

अतः इदम् + सि, सि का लोप होकर इदम् को 'अयम्' आदेश हुआ। 'अयम्' बना।

इदम् + औ "त्यदादीनाम् विभक्तौ" से अकारांत होकर 'इद' बना। इद + औ।

द्वि शब्द को छोड़कर विभक्तियों के आने पर त्यदादि गण के दकार को मकार होता है ॥३०६॥

इम + औ = इमौ, इम + जस् "जः सर्व इः" से इ होकर इम + इ = इमे इत्यादि।

इदम् + टा।

टा और ओस् के आने पर अग् वर्जित इदम् शब्द को अन आदेश हो जाता है ॥३०७॥

पुनः 'इन टा' इस १३८वें सूत्र से टा को 'इन' आदेश होकर अन + इन = अनेन।

इदम् + भ्याम्।

अद् व्यञ्जनेऽनक् ॥३०८॥

अग्वर्जितस्य इदं शब्दस्य अद्भवति व्यञ्जनादौ विभक्तौ परतः। आभ्याम्।

तस्माद्भिस् भिर् ॥३०९॥

तस्मात्कृताकारादिदमः परो भिस् भिर् भवति। एभिः। अस्मै। आभ्याम्। एभ्यः। अस्मात्। आभ्याम्। एभ्यः। अस्य। अनयोः। एषाम्। अस्मिन्। अनयोः। एषु। अन्वादेशे पूर्ववत्। इति मकारान्ताः। यकारान्तोऽप्रसिद्धः। रेफान्तः पुल्लिङ्गश्चत्वारशब्दः। तस्य बहुवचनमेव। चत्वारः।

चतुरो वाशब्दस्योत्वम् ॥३१०॥

चत्वार् इत्येतस्य वाशब्दस्य उत्वं भवति अघुट्स्वरे व्यञ्जने च परे। चतुरः।

न रेफस्य घोषवति ॥३११॥

रेफस्य घोषवति परे विसर्जनीयो न भवति। चतुर्भिः। चतुर्भ्यः। चतुर्भ्यः।

आमि चतुरः ॥३१२॥

चत्वार् शब्दस्य नुरागमो भवति आमि परे। चतुर्णां। विसर्जनीये प्राप्ते।

अग्वर्जित इदम् शब्द को व्यंजन आदि विभक्ति के आने पर 'अ' हो जाता है ॥३०८॥

'अकारो दीर्घं घोषवति' आभ्याम् बना।

इदम् + भिस् 'अद् व्यंजनेऽनक्' सूत्र से इदम् को 'अ' होकर 'धुटि बहुत्वे त्वे' १४३वें सूत्र से बहुवचन में 'ए' होकर—

इदम् शब्द को अकार करने पर भिस् को भिर् हो जाता है ॥३०९॥

ए + भिर् = एभिः।

इदम् + ङे 'स्मै सर्वनाम्नः' १५३वें सूत्र से ङे को स्मै होकर ३०८वें सूत्र से 'अ' होकर अस्मै बना।

इदम्—यह

अयम्	इमौ	इमे	अस्मात्	आभ्याम्	एभ्यः
इमम्, एनम्	इमौ, एनौ	इमान्, एनान्	अस्य	अनयोः, एनयोः	एषाम्
अनेन, एनेन	आभ्याम्	एभिः	अस्मिन्	अनयो, एनयोः	एषु
अस्मै	आभ्याम्	एभ्यः			

मकारांत शब्द हुए। यकारांत शब्द अप्रसिद्ध हैं। अब रकारांत चत्वार् शब्द है। वह बहुवचन में ही चलता है।

चत्वार् + जस् = चत्वारः

चत्वार् इस शब्द के वा को उकार हो जाता है ॥३१०॥

अघुट् स्वर और व्यंजन के आने पर। चत्वार् + शस् = चतुरः। चत्वार् + भिस्।

घोषवान् के आने पर रेफ को विसर्ग नहीं होता है ॥३११॥

अतः चतुर्भिः। चत्वार् + आम्

आम् के आने पर चत्वार् से नु का आगम होता है ॥३१२॥

चतुर्णाम् बना। चतुर् + सु

---

१. इदं सूत्रमैस्बाधनार्थं।

रः सुपि ॥३१३॥

रो रकारस्य विसर्जनीयः सुपि परे न भवति। इति निषेधः। चतुर्षु। इति रेफान्ताः। लकारान्तोऽप्रसिद्धः। वकारान्तः पुल्लिङ्गः सुदिव्शब्दः। सौ—

औ सौ ॥३१४॥

दिवो वकारस्य औ भवति सौ परे। सुद्यौः। सुदिवौ। सुदिवः।

वाभ्याः ॥३१५॥

दिवो वकारस्य वा आकारो भवति अमि परे। सुद्यां, सुदिवं। सुदिवौ। सुदिवः। सुदिवा।

दिव उद्व्यञ्जने ॥३१६॥

दिवो वकारस्य उत् भवति व्यञ्जने परे। सुद्युभ्यां। सुद्युभिः। इत्यादि। इति वकारान्ताः। शकारान्तः

सुप् के आने पर रकार का विसर्ग नहीं होता है ॥३१३॥

अतः चतुर्षु बना।

रकारांत शब्द हुए, लकारांत शब्द अप्रसिद्ध हैं। अब वकारांत सुदिव् शब्द है।

सुदिव् + सि

सि के आने पर दिव् के वकार को औ हो जाता है ॥३१४॥

'इवर्णो यमसवर्णे' इत्यादि सूत्र से संधि होकर 'सुद्यौः' बना।

सुदिव् + अम्

अम् विभक्ति के आने पर दिव् के वकार को विकल्प से आकार हो जाता है। ।३१५॥

सुदि आ + अम् संधि होकर = सुद्याम्।

सुदिव् + भ्याम्

व्यंजन वाली विभक्ति के आने पर दिव् के वकार को उकार हो जाता है ॥३१६॥

अतः सुद्युभ्याम् बना।

सुदिव्—अच्छा आकाश

सुद्यौः	सुदिवौ	सुदिवः	सुदिवे	सुद्युभ्याम्	सुद्युभ्यः
हे सुद्यौः !	हे सुदिवौ !	हे सुदिवः !	सुदिवः	सुद्युभ्याम्	सुद्युभ्यः
सुद्याम्, सुदिवं	सुदिवौ	सुदिवः	सुदिवः	सुदिवोः	सुदिवाम्
सुदिवा	सुद्युभ्याम्	सुद्युभिः	सुदिवि	सुदिवोः	सुद्युषु

इस प्रकार से वकारांत शब्द हुए। अब शकारांत पुल्लिग विश् शब्द है।

विश् + सि

'हशसछान्तेजादीनां डः' २७१वें सूत्र से स् को ड् होकर सि का लोप और प्रथम अक्षर होकर विट् विड् बना।

विश्—वैश्य

विट्, विड्	विशौ	विशः	विशे	विड्भ्याम्	विड्भ्यः
हे विट्, विड् !	हे विशौ !	हे विशः !	विशः	विड्भ्याम्	विड्भ्यः
विशम्	विशौ	विशः	विशः	विशोः	विशाम्
विशा	विड्भ्याम्	विड्भिः	विशि	विशोः	विट्सु

पुल्लिङ्गे विश् शब्दः। हशषछान्त इत्यादिना डत्वम्। विट्, विड्। विशौ। विशः। संबोधनेऽपि तद्वत्। इत्यादि। तादृश्[1] शब्दस्य तु भेदः। चवर्गदृगादीनां चेति गत्वम्। तादृक्, तादृग्। तादृशौ। तादृशः। एवं सदृश् यादृश् एतादृश् कीदृश् ईदृश् अमूदृश् प्रभृतयः। इति शकारान्ताः। षकारान्तः पुल्लिङ्गे रत्नमुष् शब्दः। रत्नमुट्, रत्नमुड्। रत्नमुषौ। रत्नमुषः। रत्नमुषं। रत्नमुषौ। रत्नमुषः। रत्नमुषा। रत्नमुड्भ्यां। रत्नमुड्भिः। इत्यादि। साधुतक्ष् शब्दस्य तु भेदः !

संयोगादेर्धुटः ॥२७४॥*

संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादौ च। व्यञ्जनाच्च सेर्लोपः।

हशषछान्तेर्जादीनां डः ॥२७१॥*

तादृश् शब्द में कुछ भेद है।

तादृश् + सि

'चवर्गदृगादीनां च' इस २५४वें सूत्र से च् को ग् एवं क् होकर तादृग्, तादृक् बना।

तादृश्—वैसा

तादृक्, तादृग्	तादृशौ	तादृशः	तादृशः	तादृग्भ्याम्	तादृग्भ्यः
तादृशम्	तादृशौ	तादृशः	तादृशः	तादृशोः	तादृशाम्
तादृशा	तादृग्भ्याम्	तादृग्भिः	तादृशि	तादृशोः	तादृक्षु
तादृशे	तादृग्भ्याम्	तादृग्भ्यः			

इसी प्रकार से सदृश्, यादृश्, एतादृश्, कीदृश्, ईदृश्, अमूदृश् आदि शब्द चलते हैं। शकारांत शब्द हुए। अब षकारांत रत्नमुष् शब्द है।

रत्नमुष् + सि

'ह श ष छान्तेर्जादीनां डः' सूत्र से ष् को ड् होकर प्रथम अक्षर होकर रत्नमुट्, रत्नमुड् बना।

रत्नमुष्—रत्नों का चोर

रत्नमुट्, रत्नमुड्	रत्नमुषौ	रत्नमुषः
हे रत्नमुट्, हे रत्नमुड् !	हे रत्नमुषौ !	हे रत्नमुषः !
रत्नमुषम्	रत्नमुषौ	रत्नमुषः
रत्नमुषा	रत्नमुड्भ्याम्	रत्नमुड्भिः
रत्नमुषे	रत्नमुड्भ्याम्	रत्नमुड्भ्यः
रत्नमुषः	रत्नमुड्भ्याम्	रत्नमुड्भ्यः
रत्नमुषः	रत्नमुषोः	रत्नमुषाम्
रत्नमुषि	रत्नमुषोः	रत्नमुट्सु, रत्नमुट्त्सु

साधुतक्ष् + सि

*संयोग की आदि में यदि धुट् अक्षर है एवं विराम और व्यंजन वाली विभक्तियाँ आयी हैं तो धुट् का लोप हो जाता है ॥२७४॥

'व्यंजनाच्च' सूत्र से सि का लोप हो जाता है। अतः साधु—त क् ष् + सि क् का लोप हुआ।

*ह श ष और छकारांत शब्द एवं यजादि को विराम और व्यंजन के आने पर 'ड्' हो जाता है ॥२७१॥

अतः ष् को ड् होकर साधु तद् बना। एक बार प्रथम अक्षर होकर साधुतट् बना।

---

१. सेव दृश्यत इति तादृक् ॥ *ये दो सूत्र पहले आ चुके हैं।

हशषछान्तानां यजादीनां[1] च डो भवति विरामे व्यञ्जनादौ च। इति डत्वं। साधुतट्, साधुतड्। साधुतक्षौ। साधुतक्षः। संबोधनेऽपि तद्वत्। साधुतक्षं। साधुतक्षौ। साधुतक्षः। साधुतक्षा। साधुतड्भ्यां। साधुतड्भिः इत्यादि। षष्शब्दस्य तु भेदः। तस्य बहुवचनमेव। जश्शसोर्लुक्। षट्, षड्। षड्भिः। षड्भ्यः। आमि नुरागमो डत्वं च।

षडो णो ने ॥३१६॥

संख्यायाः ष्णान्तायाः षडा णो भवति विभक्तौ ने परे। षण्णां। षट्सु, षट्सु इत्यादि। सकारान्तः पुल्लिङ्गः सुवचस् शब्दः। सौ अन्त्वसन्तस्येत्यादिना दीर्घः। सुवचाः। सुवचसौ। सुवचसः हे सुवचः। हे सुवचसौ। हे सुवचसः। सुवचसं। सुवचसौ। सुवचसः। सुवचसा। सुवचोभ्यां। सुवचोभिः। इत्यादि। एवं चन्द्रमस् पीतवासस् स्थूलशिरस् हिरण्यरेतस् सुश्रोतस् प्रभृतयः। उशनस् शब्दस्य तु भेदः।

साधुतक्ष्-—

साधुतड्, साधुतट्	साधुतक्षौ	साधुतक्षः
हे साधुतड्, हे साधुतट् !	हे साधुतक्षौ !	हे साधुतक्षः !
साधुतक्षम्	साधुतक्षौ	साधुतक्षः
साधुतक्षा	साधुतड्भ्याम्	साधुतड्भिः
साधुतक्षे	साधुतड्भ्याम्	साधुतड्भ्यः
साधुतक्षः	साधुतड्भ्याम्	साधुतड्भ्यः
साधुतक्षः	साधुतक्षोः	साधुतक्षाम्
साधुतक्षि	साधुतक्षोः	साधुतट्सु, साधुतट्त्सु

षष् + जस्, षष् + शस्

'जश्शसोर्लुक्' सूत्र से जस्, शस् का लुक् शब्द से लोप करके "हशषछान्तेजादीनां डः" सूत्र से ष् को ड् होकर पुनश्च विकल्प से प्रथम अक्षर होकर षट्, षड् बना।

षष् आम् नु का न् होकर न् को ण् हो गया पुनः

आगे नकार विभक्ति के आने पर संख्यावाची षट् शब्द के ट् को ण् हो जाता है ॥३१७॥

अतः षण्णाम् बना।

षष् + सु २७१वें सूत्र से ष् को ट् होकर षट्सु एवं "टात् सुप्तादिर्वा" इस २७६वें सूत्र से 'त्' का आगम होकर षट्त्सु बना।

षट्, षड्। षट्, षड्। षड्भिः। षड्भ्यः षड्भ्यः षण्णाम् षट्सु, षट्त्सु

अब सकारांत पुल्लिंग सुवचस् शब्द है।

सुवचस् + सि, सि विभक्ति का लोप होकर "अन्त्वसन्तस्य चाधातोस्सौ" २७७वें सूत्र से असंबुद्धि सि के आने पर अस् के 'अ' को दीर्घ होकर स् को विसर्ग होकर सुवचाः बना।

सुवचस्—अच्छे वचन बोलने वाला।

सुवचाः	सुवचसौ	सुवचसः	सुवचसे	सुवचोभ्याम्	सुवचोभ्यः
हे सुवचः !	हे सुवचसौ !	हे सुवचसः !	सुवचसः	सुवचोभ्याम्	सुवचोभ्यः
सुवचसम्	सुवचसौ	सुवचसः	सुवचसः	सुवचसोः	सुवचसाम्
सुवचसा	सुवचोभ्याम्	सुवचोभिः	सुवचसि	सुवचसोः	सुवचःसु

इसी प्रकार से चन्द्रमस्, पीतवासस्, स्थूलशिरस्, हिरण्यरेतस्, सुश्रोतस् आदि के रूप चलते हैं। उशनस् शब्द में कुछ भेद है। उशनस् + सि

---

१. ते-के यजादयः यज्-स्वज् मृज्-भ्राज्-राज् परिव्राज् इति यजादयः॥

उशनस्पुरुदंसोऽनेहसां सावनन्तः ॥३१८॥

उशनस् पुरुदंशस् अनेहस् इत्येतेषामन्तोऽन् भवति सौ परे असम्बुद्धौ। उशना। उशनसौ। उशनसः। नञा निर्दिष्टमनित्यम्।

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम्।
श्रीव्याघ्रभूतिप्रतितन्त्रमेपन्नञापि निर्दिष्टमनित्यमेव ॥१॥

हे उशनः, हे उशनन्, हे उशन। हे उशनसौ। हे उशनसः। उशनसं। उशनसौ। उशनसः। उशनसा। उशनोभ्यां। उशनोभिः। इत्यादि। एवं पुरुदंशस् अनेहस् शब्दौ सम्बुद्धिं विना। विद्वन्स् शब्दस्य तु भेदः। सौ—सान्तमहतोर्नोपधाया इति दीर्घः। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। हे विद्वांसौ। हे विद्वांसः। विद्वांसं। विद्वांसौ।

असंबुद्ध 'सि' विभक्ति के आने पर उशनस्, पुरुदंशस् और अनेहस् शब्दों के अंत को 'अन्' हो जाता है ॥३१८॥

अतः उशनन् + सि हुआ। पुनः 'घुटि चासंबुद्धौ' इस १७७वें सूत्र से न् की उपधा को दीर्घ होकर "लिंगान्त नकारस्य" सूत्र से 'न्' का लोप होकर 'उशना' बना। उशनस् + औ = उशनसौ, उशनसः।

नञ् समास से निर्दिष्ट होने से यह वैकल्पिक है और—

श्लोकार्थ—संबोधन में उशनस् शब्द के तीन रूप बनते हैं, सकारांत, नकारान्त एवं अकारांत। ऐसा श्री व्याघ्रभूति महोदय ने स्वीकार किया है क्योंकि यह नञ् समास के द्वारा कहा गया होने से अनित्य ही है॥

अतः उशनस् + सि, सि का लोप एवं स् का विसर्ग होकर हे उशनः ! अन् आदेश होकर हे उशनन् ! एवं अकारांत होकर हे उशन ! ऐसे तीन रूप बन गये।

तथाहि—उशनस्

उशना	उशनसौ	उशनसः
हे उशनः ! हे उशनन् !	हे उशन् । हे उशनसौ !	हे उशनसः !
उशनसम्	उशनसौ	उशनसः
उशनसा	उशनोभ्याम्	उशनोभिः
उशनसे	उशनोभ्याम्	उशनोभ्यः
उशनसः	उशनोभ्याम्	उशनोभ्यः
उशनसः	उशनसोः	उशनसाम्
उशनसि	उशनसोः	उशनःसु [2]उशनस्सु।

संबोधन के सिवाय पुरुदंशस् और अनेहस् के रूप इसी प्रकार से चलते हैं।

विद्वन्स् शब्द में कुछ भेद है। विद्वन्स् + सि "सान्तमहतोर्नोपधायाः" इस २८६वें सूत्र से 'न' की उपधा को दीर्घ होकर "संयोगान्तस्य लोपः" सूत्र २६०वें से स् का लोप होकर एवं व्यञ्जनाच्च सूत्र से सि का लोप होकर 'विद्वान्' बना। तत्रैव घुट् विभक्ति तक न् की उपधा को दीर्घ एवं "मनोरनुस्वारो घुटि" इस २५८वें सूत्र से नकार को अनुस्वार होकर विद्वन्स् + औ = विद्वान्सौ बना।

---

१. अकारः किमर्थः ? सख्युरंतः अन्भवतीत्यत्र अन्नयोजनम्॥

२. 'शेषे से वा षापररूपम्' से विकल्प से स् हो गया है।

अघुट्स्वरादौ सेट्कस्यापि[1] वन्सेर्वशब्दस्योत्वम् ॥३१९॥[2]

सेट्कस्यापि [3]वन्सेर्वशब्दस्योत्वं भवति अघुट्स्वरादौ। विदुषः। विदुषा।

विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च ॥३२०॥

विरामे व्यञ्जनादौ च अनड्वन्नहिवन्सीनामन्तस्य दो भवति। विद्वद्भ्यां। विद्वद्भिः। इत्यादि। पेचिवान्। पेचिवांसौ। पेचिवांसः। पेचिवांसं। पेचिवांसौ। निमित्ताभावे नैमित्तिकस्याप्यभावः। इतीडभावः। अघुट्स्वरादौ सेट्कस्येति उत्वम्। पेचुषः। पेचुषा। पेचिवद्भ्यां। पेचिवद्भिः। पेचुषे। पेचिवद्भ्यां। पेचिवद्भ्यः। एवं तेनिवन्स् प्रभृतयः। इत्यादि। उखाश्रस् शब्दस्य तु भेदः। सौ—

श्रसिध्वसोश्च ॥३२१॥

विद्वन्स्+शस्, अब अघुट् विभक्ति के आने पर—

अघुट् स्वर वाली विभक्ति के आने पर इट् सहित एवं इट् रहित दोनों प्रकार के शब्दों में भी 'वन्स्' के 'व' को 'उ' हो जाता है ॥३१९॥

विदुन्स्+अस् "व्यञ्जने चैषां निः" इस १८८वें सूत्र से नकार का लोप होकर एवं 'नामि' से परे स् को ष् होकर 'विदुषः' बना। अब व्यंजन वाली विभक्ति के आने पर—विद्वन्स्+भ्याम्।

विराम एवं व्यञ्जनादि विभक्ति के आने पर अनड्वाह् और वन्स् शब्द के अन्त को 'दकार' हो जाता है ॥३२०॥

अतः 'व्यंजने चेषां निः' से नकार का लोप होकर 'विद्वद्भ्याम्' बना।

विद्वान्	विद्वांसौ	विद्वांसः	विदुषे	विद्वद्भ्याम्	विद्वद्भ्यः
हे विद्वन् ।	हे विद्वांसौ ।	हे विद्वांसः ।	विदुषः	विद्वद्भ्याम्	विद्वद्भ्यः
विद्वांसम्	विद्वांसौ	विदुषः	विदुषः	विदुषोः	विदुषाम्
विदुषा	विद्वद्भ्याम्	विद्वद्भिः	विदुषि	विदुषोः	विद्वत्सु

पेचिवन्स्+सि=पेचिवान्, बना घुट् विभक्ति तक विद्वान् के समान रूप बनेंगे। आगे अघुट् स्वर वाली विभक्ति के आने पर कुछ अंतर है। यथा—पेचिवन्स्+शस्

"निमित्त के अभाव में नैमित्तिक का भी अभाव हो जाता है" इस नीति के अनुसार पेचिवन्स् शब्द के इट् का अभाव होकर एवं उपर्युक्त ३१९वें सूत्र से 'व' को 'उ' होकर 'पेचुषः' बना।

पेचिवान्	पेचिवांसौ	पेचिवांसः	पेचुषे	पेचिवद्भ्याम्	पेचिवद्भ्यः
हे पेचिवन् ।	हे पेचिवांसौ ।	हे पेचिवांसः ।	पेचुषः	पेचिवद्भ्याम्	पेचिवद्भ्यः
पेचिवांसं	पेचिवांसौ	पेचुषः	पेचुषः	पेचुषोः	पेचुषाम्
पेचुषा	पेचिवद्भ्याम्	पेचिवद्भिः	पेचुषि	पेचुषोः	पेचिवत्सु

तेनिवन्स् शब्द के रूप भी इसी प्रकार से चलते हैं।

उखाश्रस् शब्द में कुछ भेद है। उखाश्रस्+सि

विराम और व्यञ्जनादि विभक्ति के आने पर श्रस्, ध्वस् शब्द के अंत के सकार को दकार हो जाता है ॥३२१॥

---

१. सेट्कस्य इडागमेन सहितस्य॥ २. वन्सीति विद्वच्छिब्दादिस्थले रूपम्॥ ३. आगम उच्चारणार्थः स्वरादन्त्यात्परः॥

श्रसिध्वसोर्लिङ्ग्योरन्तस्य दो भवति विरामे व्यञ्जनादौ च। उखाश्रत्, उखाश्रद्।

घुट्स्वरे नुः ॥३२२॥

श्रसिध्वसोर्लिङ्ग्योर्नुरागमो भवति घुट्स्वरे परे। उखाश्रंसौ। उखाश्रंसः। संबोधनेऽपि तद्वत्। उखाश्रंसं। उखाश्रंसौ। उखाश्रसः। उखाश्रसा। उखाश्रद्भ्याम्। उखाश्रद्भिः। उखाश्रत्सु। एवं पर्णध्वस् शब्दः। अदस् शब्दस्य तु भेदः। तदाद्यत्वम्।

सौ सः ॥३२३॥

त्यदादीनां दकारस्य सकारो भवति सौ परे।

सावौ सिलोपश्च ॥३२४॥

अदसोऽन्तस्य और्भवति स्वरे परे सिलोपश्च। असौ। द्वित्वे—

अदसः पदे मः ॥३२५॥

एवं 'सि' का लोप होकर उखाश्रत्, उखाश्रद् बन गया।

उखाश्रस् + औ

घुट् स्वर वाली विभक्ति के आने पर श्रस्, ध्वस् शब्द को 'नु' का आगम हो जाता है ॥३२२॥

पुनः नकार का अनुस्वार होकर 'उखाश्रंसौ' बना। संबोधन में भी वैसे ही रूप रहेंगे। उखाश्रस् + भ्याम् उपर्युक्त ३२१वें सूत्र से 'स्' को 'द्' होकर 'उखाश्रद्भ्याम्' बना।

उखाश्रत्, उखाश्रद	उखाश्रंसौ	उखाश्रंसः
हे उखाश्रत्, उखाश्रद	हे उखाश्रंसौ	हे उखाश्रंसः
उखाश्रंसम्	उखाश्रंसौ	उखाश्रसः
उखाश्रसा	उखाश्रद्भ्याम्	उखाश्रद्भिः
उखाश्रसे	उखाश्रद्भ्याम्	उखाश्रद्भ्यः
उखाश्रसः	उखाश्रद्भ्याम्	उखाश्रद्भ्यः
उखाश्रसः	उखाश्रसोः	उखाश्रसाम्
उखाश्रसि	उखाश्रसोः	उखाश्रत्सु

इसी प्रकार से पर्णध्वस् शब्द के रूप चलते हैं।

अदस् शब्द में कुछ भेद हैं। अदस् + सि

"त्यदादीनाम् विभक्तौ" इस १७२वें सूत्र से अदस् को अकारांत 'अद' हुआ।

सि विभक्ति के आने पर त्यदादि के दकार को सकार हो जाता है ॥३२३॥

अतः अस + सि रहा।

अदस् के अंत को 'औ' हो जाता है। एवं 'सि' विभक्ति का लोप हो जाता है ॥३२४॥

अतः अस + औ = असौ बना। अब सुप् विभक्ति तक अदस् को 'अद' आदेश कर लेना चाहिये।

अद + औ

अदस् को पद करने पर 'द' को 'म' हो जाता है ॥३२५॥

अदसः पदे सति दस्य मो भवति ।

उत्वं मात् ॥३२६ ॥

अदसो मात्परो वर्णमात्रस्योत्वं भवति आन्तरतम्यात् । अमू । जसि—

एद्बहुत्वे त्वी ॥३२७ ॥

अदसो मात्परो बहुत्वे निष्पन्ने एदीर्भवति । अमी । अमुं । अमू । [1]अमून् ।

अदो मुश्च ॥३२८ ॥

अदसो मुरादेशो भवति टावचनस्य च नादेशोऽस्त्रियाम् । अमुना । अमूभ्याम् ।

अदसश्च ॥३२९ ॥

अदसोऽग्वर्जितात्परो भिस् भिर् भवति । धुट्येत्वम् । अमीभिः । अमुष्मै । अमूभ्याम् । अमीभ्यः । अमुष्मात् । अमूभ्यां । अमीभ्यः । अमुष्य । अमुयोः । अमीषाम् । अमुष्मिन् । अमुयोः । अमीषु ॥ श्रेयन्स् शब्दस्य तु भेदः ॥ श्रेयान् । श्रेयांसौ । श्रेयांसः । हे श्रेयन् । हे श्रेयांसौ । हे श्रेयांसः । श्रेयांसं । श्रेयांसौ । श्रेयसः । श्रेयसा । श्रेयोभ्यां । श्रेयोभिः । पुमन्स्शब्दस्य तु भेदः । पुमान् । पुमांसौ । पुमांसः । हे पुमन् । पुमांसं । पुमांसौ ।

अदस् के 'म' से परे 'वर्णमात्र द' के 'अ' सहित विभक्ति मात्र को उकार हो जाता है ॥३२६ ॥

और वह उकार आदेश क्रम से होता है; यथा—ह्रस्व स्वर को ह्रस्व 'उ' एवं दीर्घ स्वर को दीर्घ 'ऊ' होता है । यहाँ दीर्घ औ है । अतः दीर्घ ऊ होकर—अम् + ऊ = अमू बना । अद + जस् है पूर्वोक्त "अदसः पदे मः" सूत्र से 'द' को 'म' करके "जः सर्व इः" इस १५२वें सूत्र से जस् को 'इ' और संधि होकर 'अमे' बना । पुनः—

बहुवचन के 'ए' को 'ई' हो जाता है ॥३२७ ॥

अदस् के 'म्' से परे बहुवचन में बने हुए 'ए' को 'ई' होकर 'अमी' बना । अद + अम् है । 'द' को 'म' एवं द के 'अ' सहित अम् के अ को 'उ' होकर 'अमुम्' बना । अद + शस् है । पहले अदान् बना करके 'द' को 'म' और दीर्घ 'आ' को 'ऊ' करके 'अमून्' बना ।

अद + टा है ।

स्त्रीलिंग को छोड़कर अदस् को 'अमु' एवं 'टा' को 'ना' आदेश हो जाता है ॥३२८ ॥

अतः 'अमुना' बना । अद + भ्याम् 'अकारो दीर्घं घोषवति' सूत्र से 'अदाभ्याम् करके द् को म् एवं 'आ' को ऊ करने से 'अमूभ्याम्' बना ।

अद + भिस् है पूर्ववत् 'द्' को 'म्' करके आगे सूत्र लगा ।

अक् वर्जित अदस् से परे 'भिस्' को 'भिर्' आदेश हो जाता है और धुट् के आने पर 'एकार' भी हो जाता है ॥३२९ ॥

अतः 'अमेभिः' बन गया । पुनः—'एद्बहुत्वे त्वी' सूत्र से बहुवचन के 'ए' को 'ई' करके 'अमीभिः' बना । अद + ङे है पूर्ववत् द को 'म' और 'अ' को 'उ' करके "स्मै सर्वनाम्नः" इस १५३वें सूत्र से 'ङे' को 'स्मै' करके 'नामि' से परे स् को ष् करने से 'अमुष्मै' बना । अद + ङसि पूर्ववत् द् को म्, अ को 'उ' करके "ङसि स्मात्" इस १५४वें सूत्र से स्मात् करके स् को ष् हुआ और 'अमुष्मात्' बना । अद + ओस् है द को 'म' करके 'ओसि च्' १४६वें सूत्र से अ को 'ए' एवं संधि करके 'अमयोः' बना एवं 'उत्वं मात्' से म के 'अ' को 'उ' करके 'अमुयोः' बन गया ।

---

१. शसि सस्य च नः ॥

पुंसोऽन्शब्दलोपः ॥३३० ॥

पुमान्स् इत्येतस्य अन्शब्दस्य लोपो भवति, अघुट्स्वरे व्यञ्जने च परे। पुंसः। पुंसा।

स्यादिधुटि पदान्तवत् ॥३३१ ॥

स्यादिधुटि परे पदान्तवत्कार्यं भवति[1]। इति न्यायात्। मोऽनुस्वारव्यञ्जने। पुंभ्यां। पुंभिः। इत्यादि। इति ऋकारान्ताः॥ ऌकारान्तः पुल्लिङ्गो मधुलिह् शब्दः। मधुलिट्, मधुलिड्। मधुलिहौ। मधुलिहः। संबोधनेऽपि तद्वत्। मधुलिट्सु। एवं पुष्पलिह् इत्यादि। गोदुह् शब्दस्य तु भेदः। हचतुर्थान्तस्य धातोरित्यादिना चतुर्थत्वम्।

अद + ङि है पूर्ववत् सारी प्रक्रिया करके 'ङि' को 'स्मिन्' करके 'अमुष्मिन्' बना।

असौ	अमू	अमी	अमुष्मात्	अमूभ्याम्	अमीभ्यः
अमुम्	अमू	अमून्	अमुष्य	अमुयोः	अमीषाम्
अमुना	अमूभ्याम्	अमीभिः	अमुष्मिन्	अमुयोः	अमीषु
अमुष्मै	अमूभ्याम्	अमीभ्यः			

श्रेयन्स् शब्द में कुछ भेद है—श्रेयन्स् + सि है "सान्तमहतोर्नोपधायाः" इस २८६वें सूत्र से स् की उपधा को दीर्घ होकर संयोगांत स् का लोप एवं 'सि' का लोप होकर 'श्रेयान्' बना। तथैव घुट् विभक्ति में दीर्घ होकर श्रेयांसौ आदि बनता है। श्रेयन्स् + शस् है 'व्यंजने वैषां निः' सूत्र १८८वें से अघुट् विभक्ति में न् का लोप होकर 'श्रेयसः' बना।

श्रेयान्	श्रेयांसौ	श्रेयांसः	श्रेयसे	श्रेयोभ्याम्	श्रेयोभ्यः
हे श्रेयन् ।	हे श्रेयांसौ ।	हे श्रेयांसः ।	श्रेयसः	श्रेयोभ्याम्	श्रेयोभ्यः
श्रेयांसम्	श्रेयांसौ	श्रेयसः	श्रेयसः	श्रेयसोः	श्रेयसाम्
श्रेयसा	श्रेयोभ्याम्	श्रेयोभिः	श्रेयसि	श्रेयसोः	श्रेयःसु, श्रेयस्सु

पुमन्स् शब्द में कुछ भेद है। पुमन्स् + सि

पूर्ववत् घुट् विभक्ति में 'न' की उपधा को दीर्घ करके 'पुमान्' आदि बना।

पुमन्स् + शस् है।

पुमन्स् इस शब्द के 'अन्' शब्द का लोप हो जाता है ॥३३० ॥

यह नियम अघुट् विभक्ति के आने पर होता है। अतः पुम्स् + शस् रहा पुनः 'म्' का अनुस्वार होकर 'पुंसः' बन गया। पुम्स् + भ्याम् है।

सि आदि घुट् विभक्ति के आने पर पदांतवत् कार्य हो जाता है ॥३३१ ॥

इस न्याय से 'संयोगान्तस्य लोपः' सूत्र से स् का लोप होकर 'मोऽनुस्वारो व्यंजने' से म् का अनुस्वार होकर 'पुंभ्याम्' बन गया।

पुमान्	पुमांसौ	पुमांसः	पुंसे	पुंभ्याम्	पुंभ्यः
हे पुमन्	हे पुमांसौ	हे पुमांसः	पुंसः	पुंभ्याम्	पुंभ्यः
पुमांसम्	पुमांसौ	पुंसः	पुंसः	पुंसोः	पुंसाम्
पुंसा	पुंभ्याम्	पुंभिः	पुंसि	पुंसोः	पुंसु

---

१. पदान्तवत्कार्यं किं ? सर्वं तद्गणपञ्चमीति विकल्पः॥

दादेर्हस्य गः ॥३३२॥

दादेर्हकारस्य गकारो भवति, विरामे व्यञ्जनादौ च। गोधुक्, गोधुग्। गोदुहौ। गोदुहः। संबोधनेऽपि तद्वत्। गोदुहं। गोदुहौ। गोदुहः। गोदुहा। गोधुग्भ्यां। गोधुग्भिः। इत्यादि। मुह्-शब्दस्य तु भेदः।

मुहादीनां वा ॥३३३॥

मुहादीनां हकारस्य गकारो भवति, वा विरामे व्यञ्जनादौ च। मुक्, मुग्, मुट्। मुहौ। मुहः। मुहं। मुहौ। मुहः। मुहा। मुग्भ्यां, मुड्भ्यां। मुग्भिः, मुड्भिः। इत्यादि। एवं द्रुह् स्नुह् स्निह् प्रभृतयः। प्रष्ठवाहशब्दस्य तु भेदः। प्रष्ठवाट्, प्रष्ठवाड्। प्रष्ठवाहौ। प्रष्ठवाहः। प्रष्ठवाहं। प्रष्ठवाहौ।

इस प्रकार से सकारांत शब्द हुए।

अब हकारांत पुल्लिग मधु लिह् शब्द है।

मधुलिह्+सि 'हशषछान्तेजादीनां डः' इस २७१वें सूत्र से 'ह्' को 'ड्' पुनः विकल्प से 'ट्' होकर 'मधुलिट्, मधुलिड्' बन गया।

मधुलिह्—मधु को चाटने वाला

मधुलिट्, मधुलिड्	मधुलिहौ	मधुलिहः	मधुलिहे	मधुलिड्भ्याम्	मधुलिड्भ्यः
हे मधुलिट्	हे मधुलिहौ	हे मधुलिहः	मधुलिहः	मधुलिड्भ्याम्	मधुलिड्भ्यः
मधुलिहम्	मधुलिहौ	मधुलिहः	मधुलिहः	मधुलिहोः	मधुलिहाम्
मधुलिहा	मधुलिड्भ्याम्	मधुलिड्भिः	मधुलिहि	मधुलिहोः	मधुलिट्सु, मधुलिट्त्सु

पुष्पलिह् आदि के रूप भी इसी प्रकार से चलेंगे।

गोदुह शब्द में कुछ भेद है। गोदुह्+सि है 'व्यञ्जनाच्च' सूत्र से 'सि' का लोप होकर 'हचतुर्थान्तस्य धातोस्तृतीयादेरादि चतुर्थत्वमकृतवत्' इस २९०वें सूत्र से धातु के तृतीय अक्षर को चतुर्थ अक्षर हो गया तब 'गोधुह्' रहा। पुनः—

'द' है आदि में जिसके ऐसे हकार को 'ग्' हो जाता है ॥३३२॥

जबकि विराम और व्यञ्जनादि विभक्तियाँ आती हैं। एवं "पदांते धुटां प्रथमः" तृतीय को विकल्प से प्रथम अक्षर होकर 'गोधुक्, गोधुग्' बना।

गोदुह्—गाय को दुहने वाला ग्वाला

गोधुक्, गोधुग्	गोदुहौ	गोदुहः	गोदुहे	गोधुग्भ्याम्	गोधुग्भ्यः
हे गोधुक्, हे गोधुग्	हे गोदुहौ	हे गोदुहः	गोदुहः	गोधुग्भ्याम्	गोधुग्भ्यः
गोदुहम्	गोदुहौ	गोदुहः	गोदुहः	गोदुहोः	गोदुहाम्
गोदुहा	गोधुग्भ्याम्	गोधुग्भिः	गोदुहि	गोदुहोः	गोधुक्षु

मुह् शब्द में कुछ भेद है। मुह्+सि

विराम और व्यञ्जनादि विभक्ति के आने पर मुह् आदि शब्दों के हकार को 'ग्' विकल्प से होता है ॥३३३॥

विकल्प से मतलब "हशषछान्तेजादीनां डः" सूत्र से 'ड्' भी हो जाता है। तथा विकल्प से प्रथम अक्षर होकर चार रूप "मुक् मुग् मुट् मुड्" बन गये।

मुक् मुग् मुट् मुड्	मुहौ	मुहः
हे मुक् मुग् मुट् मुड्	हे मुहौ	हे मुहः
मुहम्	मुहौ	मुहः

वाहेर्वाशब्दस्यौत्वं ॥३३४॥

वाहेर्वाशब्दस्यौत्वं भवति, अघुट्स्वरे परे। प्रष्ठौहः। प्रष्ठौहा। प्रष्ठवाड्भ्यां। प्रष्ठवाड्भिः। प्रष्ठवाट्सु। इत्यादि। अनड्वाह् शब्दस्य तु भेदः। सौ—

सौ नुः ॥३३५॥

अनड्वाह् इत्येतस्य नुरागमो भवति सौ परे। अनड्वान्। अनड्वाहौ। अनड्वाहः।

सम्बुद्धावुभयोर्ह्रस्वः ॥३३६॥

चतुरनडुहोरुभयोः सम्बुद्धौ ह्रस्वो भवति। हे अनड्वन् ३। हे अनड्वाहं। अनड्वाहौ।

मुहा	मुग्भ्याम्, मुड्भ्याम्	मुग्भिः, मुड्भिः
मुहे	मुग्भ्याम्, मुड्भ्याम्	मुग्भिः, मुड्भिः
मुहः	मुग्भ्याम्, मुड्भ्याम्	मुग्भिः, मुड्भिः
मुहः	मुहोः	मुहाम्
मुहि	मुहोः	मुक्षु, मुट्सु, मुट्त्सु

स्नुह् और स्निह् शब्द के रूप भी इसी प्रकार से चलते हैं।

प्रष्ठवाह् शब्द में कुछ भेद है। प्रष्ठवाद + सि "हशषछान्ते" इत्यादि सूत्र से 'ह्' को 'ड्' होकर एवं प्रथम अक्षर भी होकर 'प्रष्ठवाट्, प्रष्ठवाड्' बना।

अघुट् स्वर वाली विभक्ति में भेद है। प्रष्ठवाह् + शस्

अघुट् स्वर वाली विभक्ति के आने पर वाह् के 'वा' शब्द को 'औ' हो जाता है ॥३३४॥

अतः प्रष्ठ औह् + अस् = संधि होकर "प्रष्ठौहः" बना।

प्रष्ठवाट्, प्रष्ठवाड्	प्रष्ठवाहौ	प्रष्ठवाहः
हे प्रष्ठवाट्, प्रष्ठवाड् !	हे प्रष्ठवाहौ	हे प्रष्ठवाहः
प्रष्ठवाहम्	प्रष्ठवाहौ	प्रष्ठौहः
प्रष्ठौहा	प्रष्ठवाड्भ्याम्	प्रष्ठवाड्भिः
प्रष्ठौहे	प्रष्ठवाड्भ्याम्	प्रष्ठवाड्भ्यः
प्रष्ठौहः	प्रष्ठवाड्भ्याम्	प्रष्ठवाड्भ्यः
प्रष्ठौहः	प्रष्ठौहोः	प्रष्ठौहाम्
प्रष्ठौहि	प्रष्ठौहोः	प्रष्ठवाट्सु, प्रष्ठवाट्त्सु

अनड्वाह् शब्द में कुछ भेद है। अनड्वाह् + सि

सि विभक्ति के आने पर अनड्वाह् को 'नु' का आगम हो जाता है ॥३३५॥

अतः 'अनड्वान्ह्' रहा। संयोग के अन्त का लोप होकर 'अनड्वान्' बना। संबोधन में अनड्वाह् + सि

चत्वार् और अनड्वाह् शब्द के 'वा' को संबुद्धि सि के आने पर ह्रस्व हो जाता है ॥३३६॥

अतः हे 'अनड्वन्' बना। अनड्वाह् + शस्

अनडुह्श्च ॥३३७॥

अनड्वाह् इत्येतस्य वाशब्दस्योत्वं भवति अघुट्स्वरे परे व्यञ्जने च परे। अनडुहः। अनडुहा। विरामव्यञ्जनेत्यादिना दत्वं। अनडुद्भ्यां। अनडुद्भिः। अनडुत्सु। इत्यादि। इति हकारान्ताः। प्रियाश्चत्वारो यस्यासौ प्रियचत्वाः। प्रियचत्वारौ। प्रियचत्वारः। हे प्रियचत्वः ३। प्रियचत्वारं। प्रियचत्वारौ। प्रियचतुरः प्रियचतुरा। प्रियचतुर्भ्यां। प्रियचतुर्भिः। इत्यादि।

इति व्यञ्जनान्ताः पुल्लिङ्गाः ❑

अथ व्यञ्जनान्ताः स्त्रीलिङ्गा उच्यन्ते

कवर्गान्ताः स्त्रीलिङ्गा अप्रसिद्धाः। चकारान्तः स्त्रीलिङ्गस्त्वच् शब्दः। त्वक्, त्वग्। त्वचौ। त्वचः। त्वक्षु। इत्यादि। एवं वाच् शब्दप्रभृतयः। छकारान्तोऽप्रसिद्धः। जकारान्तः स्त्रीलिङ्गः स्रज् शब्दः। स्रक्,

---

अघुट् स्वर एवं व्यञ्जनादि विभक्ति के आने पर अनड्वाट् के "वा" शब्द को 'ड' हो जाता है ॥३३७॥

अतः 'अनडुहः' बना। अनड्वाह + भ्याम् "विरामव्यञ्जनादिषु" इत्यादि ३२०वें सूत्र से 'ह्' को 'द्' होकर 'अनडुद्भ्याम्' बना।

अनड्वाह्—बैल्

अनड्वान्	अनड्वाहौ	अनड्वाहः	अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः
हे अनड्वन् !	हे अनड्वाहौ	हे अनड्वाहः	अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः
अनड्वाहम्	अनड्वाहौ	अनडुहः	अनडुहः	अनडुहोः	अनडुहाम्
अनडुहा	अनडुद्भ्याम्	अनडुद्भिः	अनडुहि	अनडुहोः	अनडुत्सु

इस प्रकार से हकारांत शब्द हुए। अब रकारांत प्रियचत्वार् शब्द है।

प्रिया हैं चार जिसके ऐसे पुरुष को 'प्रियचत्वाः" कहते हैं। ऐसे यहाँ बहुव्रीहि समास में शब्द बना है।

प्रियचत्वार् + सि। सि का लोप एवं रकार का विसर्ग होकर 'प्रियचत्वाः' बना।

संबोधन में ३३६वें सूत्र से 'वा' को ह्रस्व होकर हे प्रियचत्वः बना। प्रियचत्वार् + शस् है ३३७वें सूत्र से "वा" को 'ठ' होकर 'प्रियचतुरः' बना।

प्रियचत्वार—चार स्त्री सहित पुरुष।

प्रियचत्वाः	प्रियचत्वारौ	प्रियचत्वारः	प्रियचतुरे	प्रियचतुर्भ्याम्	प्रियचतुर्भ्यः
हे प्रियचत्वः !	हे प्रियचत्वारौ	हे प्रियचत्वारः	प्रियचतुरः	प्रियचतुर्भ्याम्	प्रियचतुर्भ्यः
प्रियचत्वारम्	प्रियचत्वारौ	प्रियचतुरः	प्रियचतुरः	प्रियचतुरोः	प्रियचतुराम्
प्रियचतुरा	प्रियचतुर्भ्याम्	प्रियचतुर्भिः	प्रियचतुरि	प्रियचतुरोः	प्रियचतुर्षु

इस प्रकार से व्यञ्जनान्त पुल्लिंग प्रकरण समाप्त हुआ। ❑

व्यञ्जनान्त स्त्रीलिंग प्रकरण

अब व्यञ्जनान्त स्त्रीलिंग कहा जाता है।

इसमें कवर्गान्त स्त्रीलिंग अप्रसिद्ध है, चकारांत स्त्रीलिंग 'त्वच्' शब्द से प्रकरण शुरू हो रहा है।

स्रग् । स्रजौ । स्रजः । स्रक्षु । इत्यादि । झञटवर्गान्ता अप्रसिद्धाः । तकारान्तः स्त्रीलिङ्गे विद्युच्छब्दः । विद्युत्, विद्युद् । विद्युतौ । विद्युतः । इत्यादि । थकारान्तोऽप्रसिद्धः । दकारान्तः स्त्रीलिङ्गः शरद् शब्दः । शरत्, शरद् । शरदौ । शरदः । एवं संविद् विपद् परिषद् प्रभृतयः । त्यद्शब्दस्य तु भेदः । त्यदाद्यत्वं । स्त्रियामादेत्यादिना

त्वच् + सि है

"चवर्गदृगादीनां च" इस २५४वें सूत्र से विराम और व्यञ्जनादि विभक्ति के आने पर 'च्' को 'ग्' हो गया एवं "पदांते धुटां प्रथमः" सूत्र से विकल्प से प्रथम अक्षर होकर त्वक् त्वग् बना।

त्वच्—छाल

त्वक्, त्वग्	त्वचौ	त्वचः	त्वचे	त्वग्भ्याम्	त्वग्भ्यः
हे त्वक्, त्वग्	हे त्वचौ	हे त्वचः	त्वचः	त्वग्भ्याम्	त्वग्भ्यः
त्वचम्	त्वचौ	त्वचः	त्वचः	त्वचोः	त्वचाम्
त्वचा	त्वग्भ्याम्	त्वग्भिः	त्वचि	त्वचोः	त्वक्षु

'वाच्' शब्द के रूप भी इसी प्रकार से चलेंगे।

छकारान्त शब्द अप्रसिद्ध हैं। अब जकारान्त स्रज् शब्द है।

स्रज् + सि = स्रक् स्रग्। पूर्वोक्त २५४वें सूत्र से ग् होकर रूप बन गया।

स्रज्—माला

स्रक्, स्रग्	स्रजौ	स्रजः	स्रजे	स्रग्भ्याम्	स्रग्भ्यः
हे स्रक्, स्रग्	हे स्रजौ	हे स्रजः	स्रजः	स्रग्भ्याम्	स्रग्भ्यः
स्रजम्	स्रजौ	स्रजः	स्रजः	स्रजोः	स्रजाम्
स्रजा	स्रग्भ्याम्	स्रग्भिः	स्रजि	स्रजोः	स्रक्षु

झ, ञ और टवर्गान्त शब्द स्त्रीलिंग में अप्रसिद्ध हैं। अब तकारान्त स्त्रीलिंग विद्युत् शब्द है।

विद्युत् + सि = विद्युत्, विद्युद् बना। 'सि' का लोप होकर "वा विरामे" सूत्र से प्रथम अक्षर भी हो गया।

विद्युत्—बिजली

विद्युत्, विद्युद्	विद्युतौ	विद्युतः	विद्युते	विद्युद्भ्याम्	विद्युद्भ्यः
हे विद्युत् विद्युद्	हे विद्युतौ	हे विद्युतः	विद्युतः	विद्युद्भ्याम्	विद्युद्भ्यः
विद्युतम्	विद्युतौ	विद्युतः	विद्युतः	विद्युतोः	विद्युताम्
विद्युता	विद्युद्भ्याम्	विद्युद्भिः	विद्युति	विद्युतोः	विद्युत्सु

थकारान्त स्त्रीलिंग अप्रसिद्ध है। दकारान्त शरद् शब्द के रूप भी इसी प्रकार से चलेंगे।

शरद्

शरत् शरद्	शरदौ	शरदः	शरदे	शरद्भ्याम्	शरद्भ्यः
हे शरत् शरद्	हे शरदौ	हे शरदः	शरदः	शरद्भ्याम्	शरद्भ्यः
शरदम्	शरदौ	शरदः	शरदः	शरदोः	शरदाम्
शरदा	शरद्भ्याम्	शरद्भिः	शरदि	शरदोः	शरत्सु

संविद्, विपद् और परिषद् आदि के रूप भी इसी प्रकार से चलेंगे।

त्यद् शब्द में कुछ भेद है। त्यद् + सि है।

आप्रत्ययः। सौ—तस्य चेति सकारः। स्या। त्ये। त्याः। त्यां। त्ये। त्याः। त्यया। त्याभ्यां। त्याभिः। त्यस्यै। त्याभ्यां। त्याभ्यः। त्यस्याः। त्याभ्यां। त्याभ्यः। त्यस्याः। त्ययोः। त्यासां। त्यस्यां। त्ययोः।

"त्यदादीनाम् विभक्तौ" सूत्र से अकारान्त 'त्य' बना। पुनः "स्त्रियामादा" इस २१५वें सूत्र से स्त्रीलिंग में 'आ' होकर 'त्या' बना। पुनः 'तस्य च' इस २८८वें सूत्र से 'त्' को 'स्' होकर 'स्या' एवं सि विभक्ति का लोप हो गया। अब सभी विभक्तियों में त्या बनाकर स्त्रीलिंग की सर्वनाम विभक्ति लगाना चाहिये। यथा—त्या + औ "औरिम्" सूत्र २११वें से 'इ' होकर संधि होकर 'त्ये' बना।

त्यद्—वह

स्या	त्ये	त्याः	त्यस्याः	त्याभ्यां	त्याभ्यः
त्याम्	त्ये	त्याः	त्यस्याः	त्ययोः	त्यासाम्
त्यया	त्याभ्यां	त्याभिः	त्यस्याम्	त्ययोः	त्यासु
त्यस्यै	त्याभ्यां	त्याभ्यः			

इसी प्रकार से तद्, यद् और एतद् के रूप चलते हैं। यथा—

सा	ते	ताः	तस्याः	ताभ्याम्	ताभ्यः
ताम्	ते	ताः	तस्याः	तयोः	तासाम्
तया	ताभ्याम्	ताभिः	तस्याम्	तयोः	तासु
तस्यै	ताभ्याम्	ताभ्यः			

यद्—जो

या	ये	याः	यस्याः	याभ्याम्	याभ्यः
याम्	ये	याः	यस्याः	ययोः	यासाम्
यया	याभ्याम्	याभिः	यस्याम्	ययोः	यासु
यस्यै	याभ्याम्	याभ्यः			

एतद्—वह

एषा	एते	एताः	एतस्याः	एताभ्याम्	एताभ्यः
एताम्, एनाम्	एते, एने	एताः, एनाः	एतस्याः	एतयोः, एनयोः	एतासाम्
एतया, एनया	एताभ्याम्	एताभिः	एतस्याम्	एतयोः, एनयोः	एतासु
एतस्यै	एताभ्याम्	एताभ्यः			

धकारांत स्त्रीलिंग वीरुध् शब्द है। वीरुध् + सि "पदांते धुटां प्रथमः" ७६वें सूत्र से प्रथम अक्षर होकर 'वा विरामे' से विकल्प से तृतीया होकर 'वीरुत्, वीरुद्' बना।

वीरुध्—लता।

वीरुत्, वीरुद्	वीरुधौ	वीरुधः	वीरुधे	वीरुद्भ्याम्	वीरुद्भ्यः
हे वीरुत्, वीरुद्	हे वीरुधौ	हे वीरुधः	वीरुधः	वीरुद्भ्याम्	वीरुद्भ्यः
वीरुधम्	वीरुधौ	वीरुधः	वीरुधः	वीरुधोः	वीरुधाम्
वीरुधा	वीरुद्भ्याम्	वीरुद्भिः	वीरुधि	वीरुधोः	वीरुत्सु

इसी प्रकार से 'समिध्' शब्द के रूप भी चलते हैं।

इस प्रकार से धकारांत शब्द हुए, अब नकारान्त स्त्रीलिंग सीमन् शब्द है। सीमन् + सि

त्यासु । एवं तद्शब्दः । सा । ते । ताः । इत्यादि त्यदशब्दवद्रूपं । एवं यद् एतद् शब्दौ । धकारान्तः स्त्रीलिङ्गे वीरुध्शब्दः । वीरुत्, वीरुद् । वीरुधौ । वीरुधः । इत्यादि । एवं समिध् ऋभृक्षयः । इति धकारान्ताः । नकारान्तः स्त्रीलिङ्गः सीमन्शब्दः । सीमा । सीमानौ । सीमानः । अघुटि । अवमसंयोगेत्यादिना अलोपः । सीम्नः । इत्यादि । एवं पंचन्शब्दादीनां पूर्ववत् । इति नकारान्ताः । पकारान्तः स्त्रीलिङ्गेऽप्शब्दः । तस्य बहुवचनमेव ।

अपश्च ॥३३८ ॥

अप् इत्येतस्य उपधाया दीर्घो भवति असम्बुद्धौ घुटि परे । आपः । अपः ।

अपां भे दः ॥३३९ ॥

अपां दो भवति विभक्तौ भे परे । अद्भिः । अद्भ्यः । अद्भ्यः । अपां । अप्सु । इति पकारान्तः । फकारबकारान्तावप्रसिद्धौ । भकारान्तः स्त्रीलिङ्गः ककुभ्शब्दः । ककुप्, ककुब् । ककुभौ । ककुभः । इत्यादि ।

'घुटि चासंबुद्धौ' सूत्र १७७वें से 'न्' की उपधा दीर्घ होकर एवं नकार का विभक्ति का लोप होकर 'सीमा' बना ।

अघुट् स्वर वाली विभक्ति में कुछ अन्तर है ।

सीमन् + शस्

"अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ" इस २५०वें सूत्र से व, म, संयुक्त न होने से 'अन्' के अकार का लोप होकर 'सीम्नः' बना ।

सीमन्—हद, मर्यादा

सीमा	सीमानौ	सीमानः	सीम्ने	सीमभ्याम्	सीमभ्यः
हे सीमन्	हे सीमानौ	हे सीमानः	सीम्नः	सीमभ्याम्	सीमभ्यः
सीमानम्	सीमानौ	सीम्नः	सीम्नः	सीम्नोः	सीम्नाम्
सीम्ना	सीमभ्याम्	सीमभिः	सीम्नि, सीमनि	सीम्नोः	सीमसु

पञ्चन् आदि शब्दों के रूप स्त्रीलिंग में पूर्ववत् पुल्लिङ्ग के समान ही चलेंगे ।

पञ्च । पञ्चभ्यः । पञ्च । पञ्चभ्यः । पञ्चभिः । पञ्चानाम् । पञ्चसु ।

इस प्रकार नकारान्त शब्द हुए, अब पकारान्त स्त्रीलिंग अप् शब्द है । यह अप् शब्द बहुवचन में ही चलता है ।

अप् + जस्

असंबुद्ध घुट् के आने पर 'अप्' की उपधा को दीर्घ हो जाता है ॥३३८ ॥

अतः आप् + अस् = आपः बना ।

अप् + शस् = अपः । अप् + भिस् है ।

'भ' विभक्ति के आने पर अप् के 'प्' को 'द्' हो जाता है ॥३३९ ॥

अतः 'अद्भिः' बना ।

आपः	अद्भिः	अपाम्
अपः	अद्भ्यः	अप्सु
	अद्भ्यः	

फकारांत, बकारान्त शब्द अप्रसिद्ध हैं । अब भकारान्त स्त्रीलिंग 'ककुभ्' शब्द है । ककुभ् + सि सि का लोप होकर 'पदांते धुटां प्रथमः' सूत्र से प्रथम अक्षर

इति भकारान्तः। मकारान्तः स्त्रीलिङ्गः किम्शब्दः। तस्य कादेशः। आप्रत्ययः। का। के। काः। कां। के। काः। कया। काभ्यां। काभिः। कस्यै। काभ्यां। काभ्यः। कस्याः। काभ्यां। काभ्यः। कस्याः। कयोः। कासाम्। कस्यां। कयोः। कासु। इत्यादि। इदंशब्दस्य तु भेदः। सौ—इयं। अन्यत्र त्यदाद्यत्वं। दादेर्म इति दस्य मत्वं। स्त्रियामादेत्याप्रत्ययः। इमे। इमाः। इमां। इमे। इमाः। टौसोरन इति अनादेशः। अनया। अद्व्यञ्जनेऽनक् इत्यत्वे। आभ्यां। आभिः। भविनि भूतवदुपचारः। अस्यै। आभ्यां। आभ्यः। अस्याः। आभ्यां। आभ्यः। अस्याः। अनयोः। आसाम्। अस्यां। अनयोः। आसु। अन्वादेशे पूर्ववत्। एनां। एने। एनाः। एनया। एनयोः। यकारान्तोऽप्रसिद्धः। इत्यादि। रकारान्तः स्त्रीलिङ्गश्चत्वार्शब्दः। तस्य

'वा विरामे' सूत्र से तृतीय होकर 'ककुप्, ककुब्' बना।

ककुप्, ककुब्	ककुभौ	ककुभः	ककुभे	ककुब्भ्याम्	ककुब्भ्यः
हे ककुप्, ककुब्	हे ककुभौ	हे ककुभः	ककुभः	ककुब्भ्याम्	ककुब्भ्यः
ककुभम्	ककुभौ	ककुभः	ककुपः	ककुभोः	ककुभाम्
ककुभा	ककुब्भ्याम्	ककुब्भिः	ककुभि	ककुभोः	ककुप्सु

भकारांत शब्द हुए। अब मकारांत स्त्रीलिंग 'किम्' शब्द है। किम्+सि। "किं कः" ३०४वें सूत्र से विभक्ति के आने पर 'किम्' को 'क' आदेश होता है एवं 'स्त्रियामादा' २१५वें सूत्र से 'आ' प्रत्यय होकर 'का' बन गया। ऐसे ही 'का' शब्द बनाकर प्रत्येक विभक्ति में 'सर्वा' के समान रूप चला लेना चाहिये।

का	के	काः	कस्याः	काभ्याम्	काभ्यः
काम्	के	काः	कस्याः	कयोः	कासाम्
कया	काभ्याम्	काभिः	कस्याम्	कयोः	कासु
कस्यै	काभ्याम्	काभ्यः			

इदं शब्द में कुछ भेद है। इदं+सि।

"इदमियमयं पुंसि" इस ३०५वें सूत्र से स्त्रीलिंग में इदं को 'इयं' आदेश हो जाता है। अतः 'इयं' बना।

इदं+औ 'त्यदादीनाम् विभक्तौ' सूत्र से सर्वत्र 'इद' बनेगा एवं "दोऽद्वेर्मः" इस ३०६वें सूत्र से दकार को मकार हुआ एवं 'स्त्रियामादा' सूत्र से आकारांत होकर रूप चलेंगे। अतः द्विवचन में 'इमे' बना।

इदं इमा+टा 'टौसोरनः।' ३०७वें सूत्र से 'अन' आदेश 'आ' प्रत्यय हो 'टौसोरे' २१३वें सूत्र से 'ए' होकर 'अनया' बना। इदम्+भ्याम् है 'अद्व्यञ्जनेऽनक्' ३०८वें सूत्र से 'अ' होकर 'आ' होकर 'आभ्याम्' बना।

द्वितीय मे टा और ओस् में 'एन' आदेश होकर अन्वादेश अर्थ में 'एनाम्' आदि बना।

इदं—यह

इयम्	इमे	इमाः	अस्याः	आभ्याम्	आभ्यः
इमां, एनाम्	इमे, एने	इमाः, एनाः	अस्याः	अनयोः, एनयोः	आसाम्
अनया, एनया	आभ्याम्	आभिः	अस्याम्	अनयोः, एनयोः	आसु
अस्यै	आभ्याम्	आभ्यः			

यकारांत स्त्रीलिंग अप्रसिद्ध है। अब रकारांत स्त्रीलिंग चत्वार् शब्द है। यह बहुवचन में ही चलता है।

चत्वार्+जस्

बहुवचनमेव। त्रिचतुरोरित्यादिना चतस्रादेशः। तौ रं स्वरे इति रत्वं। चतस्रः। चतस्रः। चतसृभिः। चतसृभ्यः। चतसृभ्यः न नामि दीर्घमिति दीर्घो न भवति। चतसृणां। चतसृषु। इत्यादि। गिर्शब्दस्य तु भेदः। सौ—

इरुरोरीरूरौ ॥११२॥[1]

धातोरिरुरोरीरूरौ भवतो विसर्गे व्यञ्जनादौ च। गीः। गिरौ। गिरः। सम्बोधनेऽपि तद्वत्। गिरं। गिरौ। गिरः। गिरा। गीर्भ्यां। गीर्भिः। गिरे। गीर्भ्यां। गीर्भ्यः। गिरः। गीर्भ्यां। गीर्भ्यः। गिरः। गिरोः।

"त्रिचतुरोः स्त्रियां तिसृचतसृ विभक्तौ" २२३वें सूत्र से चत्वार् को 'चतसृ' आदेश 'तौ रं स्वरे' २२४वें सूत्र से ऋ को र् होकर 'चतस्रः' बना। चतसृ + आम् 'न नामि दीर्घ' से दीर्घ नहीं हुआ तब 'नु' होकर चतसृणाम् बना।

चतस्रः। चतस्रः। चतसृभिः। चतसृभ्यः, चतसृभ्यः। चतसृणाम्। चतसृषु।

गिर् शब्द में कुछ भेद है। गिर् + सि

"इरुरोरीरूरौ" ११२वें सूत्र से 'ईर्' होकर 'सि' का लोप एवं 'र्' को विसर्ग हो गया। तब 'गीः' बना।

गिर् + भ्याम् = गीर्भ्याम्, संपूर्ण व्यंजनादि विभक्ति में दीर्घ होगा। वा का अधिकार होने से व्यंजन विभक्ति में रेफ हो विसर्ग नहीं होगा।

गिर्—वाणी

गीः	गिरौ	गिरः	गिरे	गीर्भ्याम्	गीर्भ्यः
हे गीः	हे गिरौ	हे गिरः	गिरः	गीर्भ्याम्	गीर्भ्यः
गिरम्	गिरौ	गिरः	गिरः	गिरोः	गिराम्
गिरा	गीर्भ्याम्	गीर्भिः	गिरि	गिरोः	गीर्षु

इसी प्रकार से पुर् धुर् आदि के रूप चलते हैं।

रकारान्त शब्द हुए। लकारान्त शब्द अप्रसिद्ध है। वकारांत स्त्रीलिंग 'दिव्' शब्द है।

दिव् + सि

'औ सौ' सूत्र ३१४वें से सि के आने पर वकार का 'औ' एवं सि का विसर्ग होकर 'द्यौः' बना। दिव् + भ्याम् है।

"दिव् उदव्यञ्जने" ३१६वें सूत्र से 'व्' को उकार होकर 'भ्याम्' बना।

दिव्—स्वर्ग

द्यौः	दिवौ	दिवः	दिवे	द्युभ्याम्	द्युभ्यः
हे द्यौः	हे दिवौ	हे दिवः	दिवः	द्युभ्याम्	द्युभ्यः
दिवम्	दिवौ	दिवः	दिवः	दिवोः	दिवाम्
दिवा	द्युभ्याम्	द्युभिः	दिवि	दिवोः	द्युषु

वकारांत शब्द हुए। शकारान्त स्त्रीलिंग दृश् शब्द है। दृश् + सि "चवर्गदृगादीनां च" सूत्र से 'ग्' पदांते धुटां प्रथमः से क् होकर 'दृक्, दृग्' बना।

---

१. यह सूत्र पहले आ चुका है।

गिरां । गिरि । गिरोः । वाधिकारादिभक्तिव्यञ्जने रेफस्य विसर्गो न स्यात् । गीर्षु । एवं पुर् धुर् प्रभृतयः । इति रकारान्ताः । लकारान्तोऽप्रसिद्धः । ककारान्तः स्त्रीलिङ्गे दिव्शब्दः । स च सुदिव्शब्दवत् । द्यौः । दिवौ । दिवः । दिवं । दिवौ । दिवः । दिवा । दिव उद्व्यञ्जने । द्युभ्यां । द्युभिः । इत्यादि । इति वकारान्तः । शकारान्तः स्त्रीलिङ्गे दृश् शब्दः । दृक्, दृग् । दृशौ । दृशः । इत्यादि । इति शकारान्तः । षकारान्तः स्त्रीलिङ्गे विप्रुष्शब्दः । विप्रुट्, विप्रुड् । विप्रुषौ । विप्रुषः । इत्यादि । षकारान्ते दधृष्शब्दस्य तु भेदः । चवर्गदृगादीनां च गत्वं । दधृक्, दधृग् । दधृक्षु । इत्यादि । सकारान्तः स्त्रीलिङ्गः सुवचस् शब्दः । स च पूर्ववत् । सुवचाः ।

दृश्—नेत्र

दृक्, दृग्	दृशौ	दृशः	दृशे	दृग्भ्याम्	दृग्भ्यः
हे दृक्, दृग्	हे दृशौ	हे दृशः	दृशः	दृग्भ्याम्	दृग्भ्यः
दृशम्	दृशौ	दृशः	दृशः	दृशोः	दृशाम्
दृशा	दृग्भ्याम्	दृग्भिः	दृशि	दृशोः	दृक्षु

शकारान्त शब्द हुए। अब षकारान्त विप्रुष् शब्द है।

विप्रुष् + सि "हशषछान्ते" इत्यादि सूत्र से 'ड्' होकर 'विप्रुट्, विप्रुड्' बना।

विप्रुष्

विप्रुट्, विप्रुड्	विप्रुषौ	विप्रुषः	विप्रुषे	विप्रुड्भ्याम्	विप्रुड्भ्यः
हे विप्रुट्, हे विप्रुड्	हे विप्रुषौ	हे विप्रुषः	विप्रुषः	विप्रुड्भ्याम्	विप्रुड्भ्यः
विप्रुषम्	विप्रुषौ	विप्रुषः	विप्रुषः	विप्रुषोः	विप्रुषाम्
विप्रुषा	विप्रुड्भ्याम्	विप्रुड्भिः	विप्रुषि	विप्रुषोः	विप्रुट्सु

ष्कारांत दधृष् शब्द में कुछ भेद है। दधृष् + सि "चवर्गदृगादीनां च" सूत्र से 'ग्' होकर 'दधृग् दधृक्' बना।

दधृक्, दधृग्	दधृषौ	दधृषः	दधृषः	दधृग्भ्याम्	दधृग्भ्यः
दधृषम्	दधृषौ	दधृषः	दधृषः	दधृषोः	दधृषाम्
दधृषा	दधृग्भ्याम्	दधृग्भिः	दधृषि	दधृषोः	दधृक्षु
दधृषे	दधृग्भ्याम्	दधृग्भ्यः			

सकारांत स्त्रीलिंग सुवचस् शब्द है। सुवचस् + सि यह पूर्ववत् चलेगा अर्थात् "अन्वसन्तस्य चाधातोस्सौ" सूत्र २७७वें से स् की उपधा को दीर्घ होकर 'सुवचाः' बना।

सुवचाः	सुवचसौ	सुवचसः	सुवचसे	सुवचोभ्याम्	सुवचोभ्यः
हे सुवचाः	हे सुवचसौ	हे सुवचसः	सुवचसः	सुवचोभ्याम्	सुवचोभ्यः
सुवचसम्	सुवचसौ	सुवचसः	सुवचसः	सुवचसोः	सुवचसाम्
सुवचसा	सुवचोभ्याम्	सुवचोभिः	सुवचसि	सुवचसोः	सुवचःसु

अदस् शब्द में कुछ भेद है। अदस् + सि 'सौ सः' ३२३वें सूत्र से दकार का सकार "सावौ सिलोपश्च" सूत्र ३२४वें से अंत को औ होकर 'असौ' बना। अन्यत्र विभक्ति में "त्यदादीनाम्" 'अ' पुनः स्त्रीलिंग में 'आ' प्रत्यय करके "अदसः पदे मः" सूत्र से 'द' को 'म' करके एवं वर्णमात्र को उकार करके पूर्ववत् रूप चलेंगे।

सुवचसौ। सुवचसः। इत्यादि। अदस् शब्दस्य तु भेदः। त्यदाद्यत्वं। असौ। अन्यत्र आप्रत्ययः। अदसः पदे म इति मत्वं। उत्वमादीति पूर्ववत्। अमू। अमूः। अमूं। अमूं। अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमूभ्यां। अमूभ्यः। अमुष्याः। अमूभ्यां। अमूभ्यः। अमुष्याः। अमुयोः। अमूषां। अमुष्यां। अमुयोः। अमूषु। इत्यादि। हकारान्तः स्त्रीलिङ्ग उपानह् शब्दः। विरामव्यञ्जनादिषु हस्य दः। उपानत्, उपानद्। उपानहौ। उपानहः। इत्यादि। अनड्वाह शब्दस्य तु भेदः।

वा स्त्रीकारे ॥३४० ॥

अनड्वाह इत्येतस्य वाशब्दस्य उत्वं वा भवति स्त्रीकारे परे। नदाद्यंच इति ईप्रत्ययः। अनडुही, अनड्वाही। इत्यादि।

इति व्यञ्जनान्ताः स्त्रीलिङ्गाः ❑

असौ	अमू	अमूः	अमुष्याः	अमूभ्याम्	अमूभ्यः
अमूम्	अमू	अमूः	अमूष्याः	अमुयोः	अमूषाम्
अमुया	अमूभ्याम्	अमूभिः	अमुष्याम्	अमुयोः	अमूषु
अमुष्यै	अमूभ्याम्	अमूभ्यः			

सकारान्त शब्द हुए। अब हकारान्त स्त्रीलिंग उपानह् शब्द है। उपानह् + सि

"विरामव्यञ्जनादिषु" इत्यादि ३२०वें सूत्र से 'ह्' को 'द्' होकर 'उपानत्' बना। वा विरामे, सूत्र से विकल्प से द् हुआ है।

उपानह्—जूते

उपानत्, उपानद्	उपानहौ	उपानहः	उपानहे	उपानद्भ्याम्	उपानद्भ्यः
हे उपानत्, उपानद्	हे उपानहौ	हे उपानहः	उपानहः	उपानद्भ्याम्	उपानद्भ्यः
उपानहम्	उपानहौ	उपानहः	उपानहः	उपानहोः	उपानहाम्
उपानहा	उपानद्भ्याम्	उपानद्भिः	उपानहि	उपानहोः	उपानत्सु

अनड्वाह् शब्द में कुछ भेद है। अनड्वाह् + सि

अनड्वाह् शब्द को स्त्रीलिंग में विकल्प से 'वा' शब्द को उकार होता है ॥३४० ॥

पुनः "नदाद्यश्च वाह्" इत्यादि ३७२वें सूत्र से 'ई' प्रत्यय होकर अनडुही अनड्वाही बन गया। अब इसके रूप स्त्रीलिंग में नदी के समान चलेंगे।

अनडुही	अनडुहौ	अनडुहः	अनडुहौ	अनडुहीभ्याम्	अनडुहीभ्यः
हे अनडुहि	हे अनडुहौ	हे अनडुहः	अनडुहाः	अनडुहीभ्याम्	अनडुहीभ्यः
अनडुहीम्	अनडुहौ	अनडुहीः	अनडुहाः	अनडुहोः	अनडुहीनाम्
अनडुहा	अनडुहीभ्याम्	अनडुहीभिः	अनडुहाम्	अनडुहोः	अनडुहीषु

इसी प्रकार से अनड्वाही के रूप चलेंगे।

इस प्रकार से व्यञ्जनान्त स्त्रीलिंग प्रकरण पूर्ण हुआ। ❑

अथ व्यञ्जनान्ता नपुंसकलिङ्गा उच्यन्ते

कवर्गान्ता अप्रसिद्धाः । चकारान्तो नपुंसकलिङ्गः प्राञ्चशब्दः ।

विरामे व्यञ्जनादावुक्तं नपुंसकात्स्यमोर्लोपेऽपि ॥३४१ ॥

विरामे व्यञ्जनादौ च यदुक्तं नपुंसकलिङ्गात्परयोः स्यमोर्लोपेपि तद्भवति । इति मत्वं अनुषङ्गश्चाक्लृप्तेत्सर्वत्र । प्राक्, प्राग् । प्राची । प्राची । पुनरप्येवं । प्राचा । प्राग्भ्यां । प्राग्भिः । प्राक्षु । अन्यत्र पुल्लिङ्गवत् । एवं प्रत्यञ्च् सम्यञ्च् उदञ्च् तिर्यञ्च् प्रभृतयः । छजझञटवर्गान्ता अप्रसिद्धाः । तकारान्तो नपुंसकलिङ्गः सकृत् शब्दः । सकृत्, सकृद् । सकृती । सकृन्ति । पुनरपि । इत्यादि । ददन् शब्दस्य तु भेदः । ददत्, ददद् । ददती ।

व्यञ्जनान्त नपुंसकलिंग प्रकरण

अब व्यञ्जनान्त नपुंसकलिंग प्रकरण कहा जाता है । यहाँ नपुंसकलिंग में कवर्गान्त अप्रसिद्ध है चकारांत नपुंसक लिंग प्राञ्च् शब्द है ।

प्राञ्च् + सि

विराम और व्यञ्जनादि विभक्ति के आने पर जो कार्य कहा गया है वह कार्य—नपुंसकलिंग से परे 'सि अम्' के लोप होने पर भी हो जाता है ॥३४१ ॥

इस नियम से 'सि अम्' का लोप होकर "अनुषंगश्चाक्लृप्तेत्" २६२वें सूत्र से अनुषंग संज्ञक अकार का लोप होकर 'चवर्गदृगादीनां च' सूत्र से 'च्' को 'ग्' होकर विकल्प से प्रथम अक्षर होकर 'प्राक्, प्राग्' बना । ऐसे सर्वत्र अनुषंग का लोप करके व्यंजनादि में च् को ग् करके रूप बनेंगे । एवं नपुंसकलिंग के सारे नियम लगेंगे । यथा—प्राञ्च् + औ 'ञ्' का लोप, 'औरीम्' से 'औ' का 'ई' होकर 'प्राची' बना । ऐसे ही प्राच् + जस् है । "जश्शसोः शिः" २३९वें सूत्र से 'जस् शस्' को शि आदेश होकर "धुट्स्वरादूघुटि नुः" २४०वें सूत्र से 'नु' का आगम "घुटि चासंबुद्धौ" सूत्र से दीर्घ होकर 'प्राञ्चि' बना । आगे रूप सरल हैं ।

प्राक्, प्राग्	प्राची	प्राञ्चि	प्राचे	प्राग्भ्याम्	प्राग्भ्यः
हे प्राक्, प्राग्	हे प्राची	हे प्राञ्चि	प्राचः	प्राग्भ्याम्	प्राग्भ्यः
प्राक्, प्राग्	प्राची	प्राञ्चि	प्राचः	प्राचोः	प्राचाम्
प्राचा	प्राग्भ्याम्	प्राग्भिः	प्राचि	प्राचोः	प्राक्षु

इसी प्रकार से प्रत्यञ्च्, सम्यञ्च्, उदञ्च्, तिर्यञ्च् आदि के रूप चलेंगे ।

सम्यक्, सम्यग्	समीची	सम्यञ्चि	समीचे	सम्यग्भ्याम्	सम्यग्भ्यः
हे सम्यक्, सम्यग्	हे समीची	हे सम्यञ्चि	समीचः	सम्यग्भ्याम्	सम्यग्भ्यः
सम्यक्, सम्यग्	समीची	सम्यञ्चि	समीचः	समीचोः	समीचाम्
समीचा	सम्यग्भ्याम्	सम्यग्भिः	समीचि	समीचोः	सम्यक्षु

छ, ज, झ, ञ और टवर्ग नपुंसकलिंग में अप्रसिद्ध हैं । अब तकारांत नपुंसकलिंग 'सकृत्' शब्द है । सकृत् + सि 'वा विरामे' सूत्र से 'सकृद्' बनकर रूप चलेगा ।

सकृत्, सकृद्	सकृती	सकृन्ति	सकृते	सकृद्भ्याम्	सकृद्भ्यः
हे सकृत्, सकृद्	हे सकृती	हे सकृन्ति	सकृतः	सकृद्भ्याम्	सकृद्भ्यः
सकृत्, सकृद्	सकृती	सकृन्ति	सकृतः	सकृतोः	सकृताम्
सकृता	सकृद्भ्याम्	सकृद्भिः	सकृति	सकृतोः	सकृत्सु

वा नपुंसके ॥३४२॥

अभ्यस्तात्परोऽन्तिरनकारको वा भवति नपुंसकलिङ्गे घुटि परे। ददति, ददन्ति। पुनरपि। ददत्, ददद्। ददती। ददति, ददन्ति। ददता। ददद्भ्यां। ददद्भिः। इत्यादि। थकारान्तोऽप्रसिद्धः। दकारान्तो नपुंसकलिङ्गस्तद् शब्दः। नपुंसकात्स्यमोर्लोपो न च तदुक्तमिति वचनात् त्यदाद्यत्वं न भवति। तत्, तद्। ते। तानि। पुनरप्येवं। अन्यत्र पुल्लिङ्गवत्। एवं यद् शब्दः। थकारान्तोऽप्रसिद्धः। नकारान्तो नपुंसकलिङ्गः सामन् शब्दः। साम। साम्नी, सामनी। सामानि। पृथक्करणान्नपुंसकस्य वा। हे साम, हे सामन्। हे साम्नी, हे सामनी। हे सामानि। पुनरप्येवं। इत्यादि। एवं मर्मन् लोमन् भूमन् प्रभृतयः। चर्मन् शब्दस्य तु भेदः। चर्म। चर्मणी। चर्माणि। अन्यत्र पुल्लिङ्गवत्। एवं वर्मन् कर्मन् शर्मन् प्रभृतयः। इत्यादि। अहन् शब्दस्य तु भेदः। सौ—

ददन्त् + सि

'अभ्यस्तादन्तिरनकारः' २८५वें सूत्र से नकार का लोप होकर 'ददत्' बना।

ददन्त् + जस्

अभ्यस्त से परे घुट् विभक्ति के आने पर नकार का लोप विकल्प से होता है ॥३४२॥

ददत्, ददद्	ददती	ददन्ति, ददति	ददते	ददद्भ्याम्	ददद्भ्यः
हे ददत्, ददद्	हे ददती	हे ददन्ति, ददति	ददतः	ददद्भ्याम्	ददद्भ्यः
ददत्, ददद्	ददती	ददन्ति, ददति	ददतः	ददतोः	ददताम्
ददता	ददद्भ्याम्	ददद्भिः	ददति	ददतोः	ददत्सु

अब थकारांत शब्द अप्रसिद्ध हैं, दकारांत 'तद्' शब्द हैं।

तद् + सि "नपुंसकात्स्यमोर्लोपो न च तदुक्तं" इस सूत्र से 'सि अम्' का लोप होकर 'त्यदाद्यत्वं' सूत्र से अकारांत नहीं हुआ। अतः 'तद तत्' बना।

तद् + औ 'औरीम्' से ई होकर 'त्यदादीनाम् विभक्तौ' से 'अ' होकर 'ते' बना।

तद् + जस्। जस् को 'शि' होकर 'नु' एवं दीर्घ होकर 'तानि' बना आगे पुल्लिंगवत् चलेंगे।

तत्, तद्	ते	तानि	तस्मै	ताभ्याम्	तेभ्यः
हे तत्, तद्	हे ते	हे तानि	तस्मात्	ताभ्याम्	तेभ्यः
तत्, तद्	ते	तानि	तस्य	तयोः	तेषाम्
तेन	ताभ्याम्	तैः	तस्मिन्	तयोः	तेषु

यद् और एतद् के रूप भी इसी प्रकार चलेंगे। थकारांत शब्द अप्रसिद्ध हैं। अब नकारांत 'सामन्' शब्द है।

सामन् + सि 'लिंगान्तनकारस्य' सूत्र से 'न' का लोप होकर 'साम' बना। सामन् + औ 'ईद्योर्वा' सूत्र से औकार को 'ई' आदेश होने से विकल्प से 'अन्' के 'अ' का लोप होकर साम्नी बना और "सामनी" भी बना।

साम	साम्नी, सामनी	सामानि	साम्ने	सामभ्याम्	सामभ्यः
हे साम	हे साम्नी, सामनी	हे सामानि	साम्नः	सामभ्याम्	सामभ्यः
साम	साम्नी, सामनी	सामानि	साम्नः	साम्नोः	साम्नाम्
साम्ना	सामभ्याम्	सामभिः	साम्नि, सामनि	साम्नोः	सामसु

इसी प्रकार से मर्मन्, लोमन्, व्योमन्, भूमन् आदि के रूप चलेंगे।

अहः सः ॥३४३॥

अहन्नित्येतस्य नकारस्य सो भवति विरामे व्यञ्जनादौ च। अहः। ईड्योर्वा। अह्नी, अहनी अहानि। हे अहः ३। पुनरपि। अह्ना। अहोभ्यां। अहोभिः। अहःसु। इत्यादि। पफबभान्ता अप्रसिद्धाः। मकारान्तो नपुंसकलिङ्गः किम्शब्दः। किं। के। कानि। अन्यत्र पुल्लिङ्गवत्। इदं शब्दस्य तु भेदः। इदमियमयं पुंसि।

इदं नपुंसकेऽपि च ॥३४४॥

चर्मन् शब्द के रूप में कुछ अंतर है।

चर्मन् + सि नकार का लोप होकर 'चर्म' बना। चर्मन् + औ 'औ' को ई होकर न् को ण् होकर 'चर्मणी' बना। चर्मण् 'घुटि चासंबुद्धौ' से दीर्घ होकर एवं जस् को शि होकर 'चर्माणि' बना।

चर्म	चर्मणी	चर्माणि	चर्मणे	चर्मभ्याम्	चर्मभ्यः
हे चर्म	हे चर्मणी	हे चर्माणि	चर्मणः	चर्मभ्याम्	चर्मभ्यः
चर्म	चर्मणी	चर्माणि	चर्मणः	चर्मणोः	चर्मणाम्
चर्मणा	चर्मभ्याम्	चर्मभिः	चर्मणि	चर्मणोः	चर्मसु

इसी प्रकार वर्मन्, कर्मन् और शर्मन् के रूप चलेंगे।

अहन् शब्द में कुछ भेद हैं।

अहन् + सि

अहन् शब्द के नकार को विराम और व्यंजनादि विभक्ति के आने पर सकार हो जाता है ॥३४३॥

एवं सि विभक्ति का लोप होकर 'अहः' बना।

अहन् + औ 'ईड्योर्वा' सूत्र से 'अह्नी अहनी' बना। अहन् + भ्याम् नकार को सकार होकर 'अहः + भ्याम्' पुनः संधि होकर 'अहोभ्याम्' बना।

अहन्—दिन

अहः	अह्नी, अहनी	अहानि	अह्ने	अहोभ्याम्	अहोभ्यः
हे अहः	हे अह्नी, अहनी	हे अहानि	अह्नः	अहोभ्याम्	अहोभ्यः
अहः	अह्नी, अहनी	अहानि	अह्नः	अह्नोः	अह्नाम्
अह्ना	अहोभ्याम्	अहोभिः	अह्नि, अहनि	अह्नोः	अहःसु, अहस्सु

प, फ, ब और भांत शब्द अप्रसिद्ध हैं। अब 'मकारांत' किम् शब्द है। किम् + सि

'नपुंसकात्स्यमोर्लोपो न च तदुक्तं' सूत्र से 'किम्' बना। किम् + औ 'किं कः' सूत्र से 'क' आदेश होकर औ 'को' 'ई' होकर 'के' हुआ। पुनः किम् + जस् है। किम् को 'क' जस् को 'शि' 'नु' का आगम और दीर्घ होकर 'कानि' हुआ।

किम्	के	कानि	कस्मात्	काभ्याम्	केभ्यः
किम्	के	कानि	कस्य	कयोः	केषाम्
केन	काभ्याम्	कैः	कस्मिन्	कयोः	केषु
कस्मै	काभ्याम्	केभ्यः			

इदं शब्द में कुछ भेद है। इदं + सि

नपुंसकलिंग में 'सि अम्' विभक्ति के आने पर इदं शब्द को इदं आदेश ही होता है ॥३४४॥

नपुंसकलिङ्गे स्यमि च परे इदम् शब्दस्य इदमादेशो भवति । इदं । इमे । इमानि । इदं । इमे । इमानि । पुनरप्येवं । इत्यादि । यकारान्तोऽप्रसिद्धः । रकारान्तो नपुंसकलिङ्गो वार् शब्दः । वाः । वारी । वारि । पुनरप्येवं । इत्यादि । चत्वार् शब्दस्य तु भेदः । जश्शसोः शिः । चत्वारि । इत्यादि । लवशकारान्ता अप्रसिद्धाः । षकारान्तस्य षष्शब्दस्य पूर्ववत् । सकारान्तो नपुंसकलिङ्गो यशस् शब्दः । यशः । यशसी । सान्तमहतोरित्यादिना दीर्घः । यशांसि । पुनरपि । यशसा । यशोभ्यां । यशोभिः । एवं वचस् ओजस् पयस् तपस् वयस् प्रभृतयः । इत्यादि । सर्पिस् शब्दस्य तु भेदः । सर्पिः । सर्पिषी । सर्पींषि । पुनरप्येवं । सर्पिषा ।

इदं + औ, इदं को 'त्यदादीनाम् विभक्तौ' सूत्र से 'इद' होकर 'द' को 'म' होकर औरीम् से औ को 'ई' होकर 'इमे' बना । इदं + जस् है । जस्, शस् को शि इदं को इम 'धुट्स्वरादघुटि नुः' सूत्र से 'नु' का आगम 'घुटि चासंबुद्धौ' से दीर्घ होकर 'इमानि' बना ।

इदं	इमे	इमानि	अस्मात्	आभ्याम्	एभ्यः
इदं	इमे	इमानि	अस्य	अनयोः	एषाम्
अनेन	आभ्याम्	एभिः	अस्मिन्	अनयोः	एषु
अस्मै	आभ्याम्	एभ्यः			

इत्यादि । यकारांत शब्द अप्रसिद्ध है । अब रकारांत वार् शब्द है ।

वार् + सि, सि का लोप एवं रकार को विसर्ग करके 'वाः' बना । वार् + औ । औ को 'ई' आदेश होकर 'वारी' बना । वार् + जस्, जस् को शि होकर 'वारि' बना । 'रः सुपि' से विसर्ग का निषेध होकर वार्ष बनता है ।

वार्—जल

वाः	वारी	वारि	वारे	वार्भ्याम्	वार्भ्यः
हे वाः	हे वारी	हे वारि	वारः	वार्भ्याम्	वार्भ्यः
वाः	वारी	वारि	वारः	वारोः	वाराम्
वारा	वार्भ्याम्	वार्भिः	वारि	वारोः	वार्षु

चत्वार् शब्द में कुछ भेद है । चत्वार् + जस् । 'जस् शस्' को शि होकर 'चत्वारि' बना । चतुर्ण्णाम् भी बनता है ।

चत्वारि । चत्वारि । चतुर्भिः । चतुर्भ्यः । चतुर्भ्यः । चतुर्णाम्, चतुर्ण्णाम् । चतुर्षु ।

लकारांत, वकारांत, शकारांत शब्द अप्रसिद्ध हैं । षकारान्त षष् शब्द पूर्ववत् है ।

अब सकारांत नपुंसकलिंग 'यशस्' शब्द है । यशस् + सि 'सि' का लोप और 'स्' का विसर्ग होकर 'यशः' बना ।

यशस् + औ । औ को 'ई' होकर 'यशसी' बना।

यशस् + जस् है । 'नु' का आगम होकर 'सान्तमहतोर्नोपधायाः' सूत्र से दीर्घ होकर 'यशांसि' बना ।

यशः	यशसी	यशांसि	यशसे	यशोभ्याम्	यशोभ्यः
हे यशः	हे यशसी	हे यशांसि	यशसः	यशोभ्याम्	यशोभ्यः
यशः	यशसी	यशांसि	यशसः	यशसोः	यशसाम्
यशसा	यशोभ्याम्	यशोभिः	यशसि	यशसोः	यशःसु, यशस्सु

ऐसे ही वचस्, ओजस्, पयस्, तपस् और वयस् आदि के रूप चलते हैं ।

सर्पिस् शब्द है नामि से परे स् को ष् होकर सर्पिष् बना । सर्पिष् + सि = सर्पिः । सर्पिष् + जस् जस् को 'शि' नु का आगम और स्वर को दीर्घ होकर 'सर्पींषि' बना ।

सर्पिस् + भ्याम्

इसुस्दोषां घोषवति रः ॥३४५ ॥

इसुस् दोष् इत्येतेषामन्तो रो भवति घोषवति परे। सर्पिर्भ्याँ। सर्पिःषु, सर्पिष्षु। एवं धनुस् दोस् प्रभृतयः। इत्यादि। अदस् शब्दस्य तु भेदः। अदः। अमू। अमूनि। पुनरप्येवं अन्यत्र पुल्लिङ्गवत्। हकारान्तोऽप्रसिद्धः। इत्यादि।

इति व्यञ्जनान्ता नपुंसकलिङ्गाः ❑

अथ व्यञ्जनान्तेष्वलिङ्गेषु युष्मदस्मदौ उच्येते

युष्मद् सि अस्मद् सि इति स्थिते।

घोषवान् विभक्ति के आने पर इस्, उस् और दोष् शब्द के अन्त में 'र्' हो जाता है ॥३४५ ॥

इस सूत्र से स् को र् होकर 'सर्पिर्भ्याम्' बना।

सर्पिः	सर्पिषी	सर्पींषि	सर्पिषे	सर्पिर्भ्याम्	सर्पिर्भ्यः
हे सर्पिः	हे सर्पिषी	हे सर्पींषि	सर्पिषः	सर्पिर्भ्याम्	सर्पिर्भ्यः
सर्पिः	सर्पिषी	सर्पींषि	सर्पिषः	सर्पिषोः	सर्पिषाम्
सर्पिषा	सर्पिर्भ्याम्	सर्पिर्भिः	सर्पिषि	सर्पिषोः	सर्पिःषु, सर्पिष्षु

धनुष्

धनुः	धनुषी	धनूंषि	धनुषे	धनुर्भ्याम्	धनुर्भ्यः
हे धनुः	हे धनुषी	हे धनूंषि	धनुषः	धनुर्भ्याम्	धनुर्भ्यः
धनु	धनुषी	धनूंषि	धनुषः	धनुषोः	धनुषाम्
धनुषा	धनुर्भ्याम्	धनुर्भिः	धनुषि	धनुषोः	धनुःषु, धनुर्षु

दोष्—भुजा

दोः	दोषी	दोंषि	दोषे	दोर्भ्याम्	दोर्भ्यः
हे दोः	हे दोषी	हे दोंषि	दोषः	दोर्भ्याम्	दोर्भ्यः
दोः	दोषी	दोंषि	दोषः	दोषोः	दोषाम्
दोषा	दोर्भ्याम्	दोर्भिः	दोषि	दोषोः	दोःषु

अदस् शब्द में कुछ भेद है। अदस्+सि

सि का लोप और स् का विसर्ग होकर 'अदः' बना।

अदस्+औ है 'त्यदादीनाम् विभक्तौ' सूत्र से अदस् को 'अद' होकर 'द' को 'म' हुआ 'औ' को 'ठल्वं मात्' से ऊ होकर 'अमू' बना।

अदस्+जस्, 'अद' होकर जस् को 'शि' हुआ, पुनः 'द' को 'म' होकर 'अमानि' बनकर दीर्घ 'आ' को दीर्घ ऊ होकर 'अमूनि' बना।

अदः	अमू	अमूनि	अमुष्मात्	अमूभ्याम्	अमीभ्यः
अदः	अमू	अमूनि	अमुष्य	अमुयोः	अमीषाम्
अमुना	अमूभ्याम्	अमीभिः	अमुष्मिन्	अमुयोः	अमीषु
अमुष्मै	अमूभ्याम्	अमीभ्यः			

त्वन्मदोरेकत्वे ॥३४६ ॥

एकत्वे वर्तमानयोर्युष्मदस्मदोः स्थाने त्वन्मदौ भवतः ।

त्वमहं सौ सविभक्त्योः ॥३४७ ॥

युष्मदस्मदोः सविभक्त्योस्त्वमहमित्येतौ भवतः सौ परे । त्वं । अहं ।

युवावौ द्विवाचिषु ॥३४८ ॥

युष्मदस्मदोः युवावौ द्विवाचिषु भवतः । अन्तलोपे सति—

अमौ चाम् ॥३४९ ॥

युष्मदादिभ्यः परः अम् औ च आम् भवति । सवर्णदीर्घः । युवां । आवां ।

यूयं वयं जसि ॥३५० ॥

युष्मदस्मदोः सविभक्त्योर्यूयं वयमित्येतौ भवतो जसि परे । यूयं । वयं । त्वन्मदोरेकत्वे इति त्वत् अम् । मत् अम् इति स्थिते—

एषां विभक्तावन्तलोपः ॥३५१ ॥

एषां युष्मदादीनां अन्तस्य लोपो भवति विभक्तौ परतः । सवर्णे दीर्घः । त्वां । मां । युवां । आवां ।

हकारांत शब्द अप्रसिद्ध है ।

इस प्रकार से व्यञ्जनांत नपुंसकलिंग समाप्त हुआ । ❑

अब व्यञ्जनान्त अलिंग युष्मद्, अस्मद् शब्द कहे जाते हैं ।

युष्मद् + सि, अस्मद् + सि हैं ।

एकवचन में वर्तमान युष्मद् अस्मद् शब्द को 'त्वद्, मद्' आदेश हो जाता है ॥३४६ ॥

सि विभक्ति सहित युष्मद्, अस्मद् शब्द में 'त्वम् अहं' आदेश हो जाता है ॥३४७ ॥

अतः त्वम्, अहं शब्द बन गये ।

युष्मद् + औ, अस्मद् + औ

युष्मद् अस्मद् को द्विवचन में 'युव, आव' आदेश हो जाता है ॥३४८ ॥

युष्मद् अस्मद् से परे 'अम्' और 'औ' विभक्ति को 'आम्' आदेश हो जाता है ॥३४९ ॥

युव + आम्, आव + आम् सवर्ण को दीर्घ होकर युवाम्, आवाम् बना ।

युष्मद् + जस्, अस्मद् + जस्

जस् विभक्ति के आने पर विभक्ति सहित युष्मद्, अस्मद् शब्द को यूयम्, वयम् आदेश हो जाता है ॥३५० ॥

अतः "यूयं, वयं," बना ।

युष्मद् + अम्, अस्मद् + अम् है । "त्वन्मदोरेकत्वे" सूत्र से त्वत्, मत् आदेश होकर "अमौ चाम्" सूत्र से अम् को 'आम्' आदेश हुआ ।

विभक्ति के आने पर युष्मद्, अस्मद् के अन्त का लोप होता है ॥३५१ ॥

इस सूत्र से त्वत् मत् के, तकार का लोप होकर संधि होकर त्वाम्, माम् बना ।

युष्मद् + शस्, अस्मद् + शस् है ।

आन् शसः ॥३५२॥

युष्मदादिभ्यः परस्य शस् आन् भवति। युष्मान्। अस्मान्।

एत्वमस्थानिनि ॥३५३॥

युष्मदादीनामन्तस्य एत्वं भवत्यस्थानिनि अनादेशिनि प्रत्यये परे। त्वया। मया।

आत्वं व्यञ्जनादौ ॥३५४॥

युष्मदादीनामन्तस्य आत्वं भवति व्यञ्जनादौ विभक्तौ आदेशवर्जिते प्रत्यये परे। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः।

तुभ्यं मह्यं ङयि ॥३५५॥

युष्मदस्मदोः सविभक्त्योः तुभ्यं मह्यमित्येतौ भवतो ङयि परे। तुभ्यं मह्यं। युवाभ्यां। आवाभ्यां।

भ्यसभ्यम् ॥३५६॥

एभ्यो युष्मदादिभ्यः परो भ्यस् अभ्यं भवति। युष्मभ्यं। अस्मभ्यं।

युष्मद् आदि से परे शस् को 'आन्' हो जाता है ॥३५२॥

पुनः ३५१वें सूत्र से अंत दकार का लोप होकर 'युष्मान्, अस्मान्' बना।

युष्मद् + टा अस्मद् + टा, ३४६वें सूत्र से त्वत्, मत् हो गया।

जिसके स्थान पर कोई आदेश न हो वह अनादेश प्रत्यय कहलाता है। टा-ओस् अनादेश वाले प्रत्यय के आने पर युष्मद्, अस्मद् के अन्त को 'ए' हो जाता है ॥३५३॥

मतलब 'टा' को 'अन' आदेश होता है। एवं सूत्र १३६ से त्व के अ का लोप होकर त्वे 'मे' आदेश होकर त्वे + आ, मे + आ संधि होकर 'त्वया, मया' बन गया।

युष्मद् + भ्याम्, अस्मद् + भ्याम् हैं। 'युवावौ द्विवचिषु' सूत्र से युव, आव करके—

आदेश वर्जित व्यञ्जनादि विभक्ति के आने पर युष्मदादि को 'आ' हो जाता है ॥३५४॥

अतः 'युवाभ्याम्, आवाभ्याम्' बना।

युष्मद् + भिस्, अस्मद् + भिस् है। ३५१वें सूत्र से अंत के द् का लोप एवं ३५४वें सूत्र से 'आकार' होकर 'युष्माभिः, अस्माभिः' बना।

युष्मद् + ङे, अस्मद् + ङे है।

ङे विभक्ति के आने पर विभक्ति सहित युष्मद्, अस्मद् को तुभ्यं, मह्यं आदेश हो जाता है ॥३५५॥

अतः तुभ्यं, मह्यं बना।

युष्मद् + भ्यस्, अस्मद् + भ्यस्

युष्मदादि से परे 'भ्यस्' को 'अभ्यं' हो जाता है ॥३५६॥

पुनः ३५१वें सूत्र से युष्मद्, अस्मद् के अंत के द् का लोप होकर एवं १३६वें सूत्र से अ का लोप होकर 'युष्मभ्यं, अस्मभ्यं' बना।

युष्मद् + ङसि, अस्मद् + ङसि है।

'त्वमदोरेकत्वे' सूत्र से त्वत्, मत् आदेश करके—

आदिलोपोऽन्त्यलोपश्च मध्यलोपस्तथैव च।
विभक्तिपदवर्णानां दृश्यते शार्ववर्मिके ॥१॥

अत् पञ्चम्यद्वित्वे ॥३५७॥

एभ्यो युष्मदादिभ्यः परा अद्वित्वे वर्तमाना पञ्चम्यद् भवति। त्वत्। मत्। युवाभ्यां। आवाभ्यां। युष्मत्। अस्मत्।

तव मम ङसि ॥३५८॥

युष्मदस्मदोः सविभक्त्योस्तव मम इत्येतौ भवतो ङसि परे। तव। मम। युवयोः। आवयोः।

साम्याकम् ॥३५९॥

युष्मदादिभ्यः परः सागमयुक्त आम् आकम् भवति। युष्माकं। अस्माकं। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु। एवं नीतक। त्वं युवां यूयं। त्वां युवां युष्मान्। त्वया युवाभ्यां युष्माभिः।

श्लोकार्थ—शार्ववर्म आचार्य के व्याकरण में विभक्ति पद के वर्णों में आदि का लोप, अंत का लोप और कभी मध्य का लोप देखा जाता है ॥१॥

युष्मद् आदि से परे द्विवचन रहित पंचमी विभक्ति को 'अद्' आदेश हो जाता है ॥३५७॥

अतः त्वत् + अत्, मत् + अत् रहा। उपर्युक्त श्लोक के आधार से त्वत्, मत् के त् का लोप होकर १३६वें सूत्र से 'त्व म' के अकार का लोप होकर 'त्वत् मत्' बना। ऐसे ही—

युष्मद् + भ्यस्, अस्मद् + भ्यस् है।

भ्यस् को ३५७वें सूत्र से 'अत्' होकर ३५१वें सूत्र से युष्मद् के द् का लोप एवं १३६वें सूत्र से 'अ' का लोप होकर 'युष्मत्, अस्मत्' बना।

युष्मद् + ङस्, अस्मद् + ङस् है।

ङस् विभक्ति के आने पर विभक्ति सहित युष्मद्, अस्मद् को तव, मम आदेश हो जाता है ॥३५८॥

अतः 'तव, मम' बना।

युष्मद् + ओस्, अस्मद् + ओस है 'युवावौ द्विवाचिषु' सूत्र से 'युव, आव' आदेश होकर "ओसि च" सूत्र से एकार होकर एवं संधि होकर 'युवयोः, आवयोः' बना।

युष्मद् + आम्, अस्मद् + आम्

युष्मद् आदि से परे आम् को सकार सहित 'आकम्' आदेश हो जाता है ॥३५९॥

पुनः ३५१वें सूत्र से दकार का लोप होकर 'युष्माकम्, अस्माकम्' बन गया।

युष्मद् + ङि, अस्मद् + ङि है।

'त्वन्मदोरेकत्वे' सूत्र से 'त्वत्, मत्' होकर ३५१वें सूत्र से त्वत्, मत् के अंत का लोप होकर ३५३वें सूत्र से अंत को एकार होकर संधि होकर त्वे + इ, मे + इ = त्वयि, मयि बना।

युष्मद् + सु, अस्मद् + सु

३५१वें सूत्र से दकार का लोप होकर ३५४वें सूत्र से आकार होकर 'युष्मासु, अस्मासु' बना।

तुभ्यं युवाभ्यां युष्मभ्यं । त्वत् युवाभ्यां युष्मत् । तव युवयोः युष्माकं । त्वयि युवयोः युष्मासु ॥ अहं आवां वयं । मां आवां अस्मान् । मया आवाभ्यां अस्माभिः । मह्यं आवाभ्यां अस्मभ्यं । मत् आवाभ्यां अस्मत् । मम आवयोः अस्माकं । मयि आवयोः अस्मासु । ग्रामो युष्माकं । ग्रामोऽस्माकं । स ग्रामो युष्मभ्यं दीयते । ग्रामोऽस्मभ्यं दीयते । ग्रामो युष्मान् रक्षति । ग्रामोऽस्मान् रक्षति । इति स्थिते—

युष्मदस्मदोः पदं पदात्षष्ठीचतुर्थीद्वितीयासु वस्नसौ ॥३६० ॥

पदात्परं युष्मदस्मदोः पदं षष्ठीचतुर्थीद्वितीयासु बहुत्वे निघ्नन्नं वस्नसावापद्यते यथासंख्यं । ग्रामो वः स्वं । ग्रामो नः स्वं । ग्रामो वो रक्षति । ग्रामो नो रक्षति । इति सिद्धं । ग्रामो युवयोः स्वं । ग्राम आवयोः स्वं । ग्रामो युवाभ्यां दीयते । ग्राम आवाभ्यां दीयते । ग्रामो युवां रक्षति । ग्राम आवां रक्षति । इति स्थिते—

युष्मद्—तुम

त्वम्	युवाम्	यूयम्	त्वत्	युवाभ्याम्	युष्मत्
त्वाम्	युवाम्	युष्मान्	तव	युवयोः	युष्माकम्
त्वया	युवाभ्याम्	युष्माभिः	त्वयि	युवयोः	युष्मासु
तुभ्यम्	युवाभ्याम्	युष्मभ्यम्			

अस्मद्—मैं

अहं	आवाम्	वयम्	मत्	आवाभ्याम्	अस्मत्
माम्	आवाम्	अस्मान्	मम	आवयोः	अस्माकम्
मया	आवाभ्याम्	अस्माभिः	मयि	आवयोः	अस्मासु
मह्यं	आवाभ्याम्	अस्मभ्यम्			

इन युष्मद्, अस्मद् शब्दों की षष्ठी, चतुर्थी और द्वितीया के बहुवचन में वाक्य बनाते समय लघु आदेश भी हो जाते हैं। उन्हें यहाँ बताते हैं।

ग्रामो युष्माकं—तुम्हारा गाँव। ग्रामोऽस्माकम्—हमारा गाँव। स ग्रामो युष्मभ्यम् दीयते—वह गाँव तुम लोगों के लिये दिया जाता है। ग्रामोऽस्मभ्यं दीयते—ग्राम हम लोगों को दिया जाता है। ग्रामो युष्मान् रक्षति—गाँव तुम सबकी रक्षा करता है। ग्रामोऽस्मान् रक्षति—ग्राम हम लोगों की रक्षा करता है। उदाहरण के लिये ये वाक्य दिये गये हैं—

षष्ठी—युष्माकम् चतुर्थी—युष्मभ्यं द्वितीया—युष्मान्

षष्ठी—अस्माकम् चतुर्थी—अस्मभ्यं द्वितीया—अस्मान्

पद से परे षष्ठी, चतुर्थी और द्वितीया के बहुवचन में बने हुए युष्मद् अस्मद् पद को क्रम से 'वस्, नस्' आदेश हो जाता है ॥३६० ॥

अर्थात् युष्मद् को वस् और अस्मद् को नस् आदेश हो जाता है। अतः वस्, नस् के स् को विसर्ग होकर 'वः, नः' बना। उपर्युक्त वाक्यों में युष्माकम्, अस्माकम् आदि के स्थान में इन 'वः नः' का प्रयोग कीजिये।

यथा—ग्रामो वः स्वं—गाँव तुम लोगों का धन है।

ग्रामो नः स्वं—गाँव हम लोगों का धन है। ग्रामो वो दीयते—गाँव तुम सबको दिया जाता है। ग्रामो नो दीयते—गाँव हम लोगों को दिया जाता है। ग्रामो वो रक्षति—गाँव तुम लोगों की रक्षा करता है। ग्रामो नो रक्षति—गाँव हम लोगों की रक्षा करता है।

वाम्नौ द्वित्वे ॥३६१ ॥

पदात्परं युष्मदस्मदोः पदं षष्ठीचतुर्थीद्वितीयासु द्वित्वे निष्पन्नं वाम्नौ आपद्यते यथासंख्यं । ग्रामो वां स्वं । ग्रामो नौ स्वं । ग्रामो वां दीयते । ग्रामो नौ दीयते । ग्रामो वां रक्षति । ग्रामो नौ रक्षति । ग्रामस्तव स्वं । ग्रामो मम स्वं । ग्रामस्तुभ्यं दीयते । ग्रामो मह्यं दीयते । ग्रामस्त्वां रक्षति । ग्रामो मां रक्षति । इति स्थिते—

त्वन्मदोरेकत्वे ते मे त्वा मा तु द्वितीयायां ॥३६२ ॥

युष्मदस्मदोरेकत्वे त्वन्मदीभूतयोः पदं पदात्परं षष्ठीचतुर्थीद्वितीयासु एकत्वे निष्पन्नं ते मे आपद्यते त्वा मा तु द्वितीयायां । ग्रामस्ते स्वं । ग्रामो मे स्वं । ग्रामस्ते दीयते । ग्रामो मे दीयते । ग्रामस्त्वा रक्षति । ग्रामो मा रक्षति । इति सिद्धं ।

न पादादौ ॥३६३ ॥

पादस्यादौ वर्तमानानां युष्मदादीनां पदमेतानादेशान्न प्राप्नोति ।

अब इन्हीं षष्ठी, चतुर्थी और द्वितीया के द्विवचन के आदेश को दिखायेंगे । यथा—ग्रामः युवयोः स्वं—गाँव तुम दोनों का धन है । ग्राम आवयोः स्वं—गाँव हम लोगों का धन है । ग्रामो युवाभ्यां दीयते—गाँव तुम दोनों को दिया जाता है । ग्राम आवाभ्यां दीयते—गाँव हम दोनों को दिया जाता है । ग्रामो युवां रक्षति—गाँव तुम दोनों की रक्षा करता है । ग्राम आवां रक्षति—गाँव हम दो की रक्षा करता है ।

द्विवचन में 'वाम् नौ' आदेश हो जाता है ॥३६१ ॥

पद से परे षष्ठी, चतुर्थी और द्वितीया के द्विवचन में निष्पन्न युष्मद् पद को 'वाम्' और अस्मद् को 'नौ' आदेश हो जाता है । अब आदेश हुए पदों का उदाहरण देखिये । ग्रामो वां स्वं—गाँव तुम दोनों का धन है । ग्रामो नौ स्वं—गाँव हम दोनों का धन है । ग्रामो वां दीयते—गाँव तुम दोनों को दिया जाता है । ग्रामो नौ दीयते—गाँव हम दोनों को दिया जाता है । ग्रामो वां रक्षति—गाँव तुम दो की रक्षा करता है । ग्रामो नौ रक्षति—गाँव हम दोनों की रक्षा करता है । अब षष्ठी, चतुर्थी और द्वितीया के एकवचन के आदेश को देखिये ।

पद से परे षष्ठी, चतुर्थी के एकवचन में युष्मद् को 'ते' और अस्मद् को 'मे' तथा द्वितीया के एकवचन में 'त्वा', 'मा' आदेश होता है ॥३६२ ॥

यथा—ग्रामस्तव स्वं—ग्रामस्ते स्वं, ग्रामो मम स्वं—ग्रामो मे स्वं । ग्रामस्तुभ्यं दीयते—ग्रामो ते दीयते । ग्रामो मह्यं दीयते—ग्रामो मे दीयते । ग्रामस्त्वां रक्षति—ग्रामस्त्वा रक्षति । ग्रामो मां रक्षति—ग्रामो मा रक्षति ।

इस प्रकार से ये उपर्युक्त आदेश सिद्ध हो गये ।

पाद की आदि में ये आदेश नहीं होते हैं ॥३६३ ॥

श्लोकों के पाद की आदि में वर्तमान युष्मद्, अस्मद् को ये उपर्युक्त आदेश प्राप्त नहीं होते हैं । यथा—

वीरो विश्वेश्वरो देवो, युष्माकं कुलदेवता । यहाँ 'युष्माकं' पद द्वितीय पाद की आदि में है । अतः इसे वः आदेश नहीं हुआ । उसी प्रकार से स एव नाथो भगवान् । अस्माकं पापनाशनः ॥ यहाँ 'अस्माकं' पद चतुर्थ पाद की आदि में है । अतः उसे 'नः' आदेश नहीं होगा । उसी प्रकार से आगे के श्लोक में द्वितीय चरण की आदि में युष्माकं को 'वः' एवं चतुर्थ चरण की आदि में अस्माकं को 'नः' नहीं हुआ ।

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं पापनाशनः ॥१॥
भगवानीश्वरो भूयाद्युष्माकं वरदः प्रभुः।
सद्यो निराकृता दूरमस्माकं येन विद्विषः ॥२॥

पादादाविति किं ? पान्तु वः पार्वतीनाथमौलिचन्द्रमरीचयः।

आमन्त्रणात् ॥३६४॥

आमन्त्रणात्परं युष्मदादीनां पदमेतानादेशान्न प्राप्नोति। हे पुत्र तव स्वमिदं। हे पुत्र मम स्वमिदं। हे पुत्र त्वां रक्षति।

चादियोगे च ॥३६५॥

चादीनां योगे युष्मदादीनां पदमेतानादेशान्न प्राप्नोति। पुत्रो युष्माकं च। पुत्रोऽस्माकं च। पुत्रो युष्मभ्यं च दीयते। पुत्रोऽस्मभ्यं च दीयते। पुत्रो युष्मांश्च रक्षति। पुत्रोऽस्मांश्च रक्षति। चादयः कति ? पञ्च। ते के ? च वा ह अह एव इति चादयः।

दृश्यार्थैश्चानालोचने ॥३६६॥

अचक्षुरालोचने वर्तमानैर्दृश्यार्थैर्धातुभिर्योगे युष्मदस्मत्त्वन्मदादीनां वस्नसादयो न भवन्ति। अनालोचनमिति किम् ? आलोचनं चक्षुर्ज्ञानमनालोचनं मनसा ज्ञानं। ग्रामस्त्वां समीक्षते। ग्रामो मां

श्लोकार्थ—विश्व के ईश्वर वीर भगवान् तुम लोगों के कुल देवता हैं। वे ही भगवान् नाथ हैं; हम लोगों के पाप का नाश करने वाले हैं ॥१॥ भगवान् ईश्वर तुम लोगों के लिये वर देने में समर्थ होवें, जिन्होंने तत्काल ही हम लोगों के लिये शत्रुओं को दूर कर दिया है ॥२॥

प्रश्न—पाद की आदि में ये आदेश नहीं होंगे; ऐसा क्यों कहा ?

उत्तर—पांतु वः पार्वतीनाथ, मौलिचन्द्र मरीचयः।

इस श्लोक में 'वः' आदेश प्रथम पाद की आदि में न होकर आदि में पांतु पद है; अतः यहाँ आदेश हो गया।

आमंत्रण से परे भी युष्मद्, अस्मद् के पद को उपर्युक्त आदेश नहीं होते हैं ॥३६४॥

यथा—हे पुत्र ! तव स्वं इदं—हे पुत्र ! तुम्हारा यह धन है। इसमें संबोधन से परे 'तव' को 'ते' नहीं हुआ ऐसे ही आगे सभी के उदाहरण समझ लेना चाहिये।

'च' आदि के योग में भी आदेश नहीं होता है ॥३६५॥

'च' आदि के योग में युष्मद् अस्मद् के पद को उपर्युक्त आदेश नहीं होता है। जैसे—पुत्रो युष्माकं च—और तुम लोगों का पुत्र है। आगे सभी के उदाहरण समझ लीजिये।

चादि शब्द में आदि से कितने लेना ? पाँच लेना। वे कौन हैं ? च, वा, ह, अह और एव पाँच शब्द 'चादि' से लिये गये हैं। इनके योग में स् वः नः आदि आदेश नहीं होते हैं।

अचक्षु से देखने अर्थ में दृश्य अर्थ वाले धातु के योग में उपर्युक्त आदेश नहीं होते हैं ॥३६६॥

यदि देखने अर्थ वाली धातुओं का अर्थ चक्षु से नहीं देखने अर्थ में विद्यमान हो तो देखने अर्थ वाली धातुओं के योग में युष्मद् अस्मद् को वस् नस् आदि आदेश नहीं होते हैं।

प्रश्न—सूत्र में अनालोचन पद क्यों है ? चक्षु के ज्ञान को यहाँ 'आलोचन' शब्द से कहा है और मन से होने वाले ज्ञान को 'अनालोचन' शब्द से कहा है। जैसे ग्रामस्त्वां समीक्षते—गाँव तुमको देख रहा है।

समीक्षते। ग्रामो युष्मभ्यं दीयमानः समीक्षते। ग्रामोऽस्मभ्यं दीयमानः समीक्षते। ग्रामस्त्वां मनसा विलोकयति। वाञ्छतीत्यर्थः। मनसेति किं ? ग्रामो वः पश्यति। ग्रामो नः पश्यति। चक्षुषेत्यर्थः।

इत्यलिंगाः ❑

अथाव्ययान्युच्यन्ते

अव्ययमसंख्यं। तानि कानि ? स्वर्, प्रातर्, पुनर्, अन्तर्, बहिर्, च, वा, ह, अह, एव, प्र, परा, अप, सम्, अनु, अव, निर्, दुर्, वि, आङ्, नि, अति, अपि, अधि, सु, उत्, अभि, प्रति, परि, उप, इत्यादि प्रादयो विंशतिः। विना, नाना, अन्तर्, नो, अथ, अथो, अहो, पृथक्, यावत्, तावत्, मनाक्, वषट्, ईषत्, हि, यदि, खलु, ननु, तिर्यक्, मिथ्या, किल, हन्त, वै, तु।

अव्ययाच्च ॥३६७॥

अव्ययाच्च परासां विभक्तीनां लुग्भवति।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥१॥

इत्यव्ययानि।

यहाँ गाँव चक्षु से नहीं देख रहा है अतः 'त्वा' आदेश नहीं हुआ। ऐसे ही सभी पदों के उदाहरण समझ लेना। यहाँ 'ग्रामस्त्वां समीक्षते' और 'ग्रामो युष्मभ्यं दीयमानः समीक्षते' वाक्यों का यह अर्थ है कि "यह गाँव तुमको मन से देख रहा है। और यह गाँव तुम्हारे लिये वांच्छा कर रहा है।" प्रश्न—मन से देखता है ऐसा क्यों कहा ? उत्तर—'ग्रामो वः पश्यति' यहाँ वः आदेश हुआ है अतः ग्राम तुमको चक्षु से देखता है। ऐसा अर्थ लेना चाहिये। अर्थात् गाँव के निवासी तुम्हें चक्षु से देख रहे हैं ऐसा अभिप्राय है।

यहाँ ये युष्मद् अस्मद् शब्द तीनों लिंगों में समान रूप से चलते हैं इनमें लिंग भेद नहीं है अतएव इन्हें 'अलिंग' कहा है।

इस प्रकार से अलिंग प्रकरण पूर्ण हुआ। ❑

अथ अव्यय प्रकरण कहा जाता है।

अव्यय किसे कहते हैं ? जिनके रूप न चले अर्थात् जिनका किसी भी विभक्ति के आने पर व्यय— परिवर्तन—विनाश न होवे उसे अव्यय कहते हैं। वे अव्यय कितने हैं ? ये अव्यय असंख्य हैं। वे कौन-कौन हैं ? सो बताते हैं। स्वर्, प्रातर्, पुनर्, अंतर्, बहिर्, च, वा, ह, अह, एव इत्यादि। इसी प्रकार से 'प्र' आदि बीस उपसर्ग माने गये हैं वे भी अव्यय हैं जैसे—प्र, परा, अप, सम्, अनु, अव, निर्, दुर्, वि, आङ्, नि, अति, अपि, अधि, सु, उत्, अभि, प्रति, परि, उप ये बीस उपसर्ग हैं। आगे और भी अव्यय हैं—विना, नाना, अन्तर, नो, अथ, अथो, अहो, पृथक्, यावत्, तावत्, मनाक्, वषट्, ईषत्, हि, यदि, खलु, ननु, तिर्यक्, मिथ्या, किल, हंत, वै, तु।

अब—स्वर् + सि है

अव्यय से परे विभक्तियों का लुक् हो जाता है॥३६७॥

इस सूत्र से सि विभक्ति का लोप हुआ पुनः र् का विसर्ग होकर 'स्वः' बना। स्वर् + औ। उपर्युक्त सूत्र से विभक्ति का लोप होकर स्वः बना। इत्यादि।

श्लोकार्थ—जो शब्द तीनों लिंगों में, सातों विभक्तियों में एवं एक, द्वि, बहुवचनों में समान ही रहे जिसमें कोई परिवर्तन न हो वह अव्यय कहलाता है। व्यय की प्राप्त न होवे वह अव्यय कहलाता है॥१॥

इस प्रकार से अव्यय प्रकरण समाप्त हुआ। ❑

अथ प्रत्यया उच्यन्ते

अव्ययसर्वनाम्नः स्वरादन्त्यात्पूर्वोऽक्कः ॥३६८॥

अव्ययानां सर्वनाम्नां चान्त्यात्स्वरात्पूर्वोऽकप्रत्ययो वा भवति कप्रत्ययश्च बहुलं। बहुलमिति किं ?

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति ॥१॥

उच्चकैः। उच्चैः। नीचकैः। नीचैः। सर्वः। सर्वकः। विश्वः। विश्वकः। युष्मकाभिः। अस्मकाभिः। एभिः। इमकैः। अमीभिः। अमुकैः। भवन्तः। भवन्तकः।

विभक्तेश्च पूर्व इष्यते ॥३६९॥

विभक्तेश्च पूर्वोऽकप्रत्ययो वा इष्यते। त्वया त्वयका। मया मयका।

आख्यातस्य चान्त्यस्वरात् ॥३७०॥

आख्यातस्य चान्त्यस्वरात्पूर्वोऽकप्रत्ययो वा भवति। पचति, पचतकि। भवन्ति भवन्तकि। इत्यादि। कप्रत्ययश्च। यावकः। यामकः। मणिकः। वत्सकः। पुत्रकः। अश्वकः। वृक्षकः। देवदत्तकः। इत्यादि।

के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् ॥३७१॥

के प्रत्यये स्त्रीकृताकारे परे पूर्वोऽकार इकारमापद्यते। सर्विका। विश्विका। उष्ट्रिका। पाचिका। मूषिका। कारिका। पाठिका। इत्यादि।

अब प्रत्यय कहे जाते हैं।

अव्यय और सर्वनाम के अन्त्य स्वर से पूर्व 'अक्' प्रत्यय हो जाता है अथवा बहुलता से 'क' प्रत्यय भी हो जाता है ॥३६८॥

बहुलं किसे कहते हैं ?

श्लोकार्थ—कहीं पर प्रवृत्ति होवे, कहीं पर प्रवृत्ति न होवे, कहीं पर विकल्प होवे और कहीं पर अन्य रूप ही हो जावे, इस प्रकार विधि—नियम के विधान को बहुत प्रकार से देखकर 'बहुलता' को चार प्रकार कहते हैं ॥१॥

जैसे—उच्चैस् अव्यय है अक् प्रत्यय अन्त्य स्वर के पूर्व में होने से उच्चकैस् बना विसर्ग होकर उच्चकैः, ऐसे ही नीचैः—नीचकैः, सर्वः सर्वकः। युष्माभिः है अक् प्रत्यय, विभक्ति और अन्त्य स्वर के पूर्व में होने से युष्मकाभिः बना। एभिः को अक् प्रत्यय होकर 'इद' को इम हुआ पुनः अक् प्रत्यय मिलकर भिस् को ऐस् होकर इमकैः बना। 'अमीभिः' में भी अद् को अम् होकर अक् प्रत्यय होकर अमुकैः बना।

विभक्ति से पूर्व अक् प्रत्यय विकल्प से होता है ॥३६९॥

अतः त्वया, त्वयका दो रूप बनेंगे।

आख्यात से अन्त्य स्वर से पूर्व अक् प्रत्यय विकल्प से होता है ॥३७०॥

अतः पचति और पचतकि दोनों बन गये।

'क' प्रत्यय भी होता है। जैसे—यामः यामकः, पुत्रः, पुत्रकः इत्यादि।

'क' प्रत्यय के आने पर स्त्रीलिंग में आकार प्रत्यय करने पर पूर्व के अकार को इकार हो जाता है ॥३७१॥

नदाद्यञ्च् वाह् व्यंसन्त्सखिनान्तेभ्य ई ॥३७२ ॥

स्त्रियां वर्तमानेभ्यो नदादि अञ्च् वाह् उ इ, अंस् अन्त् ऋ सखि नान्तेभ्य ई प्रत्ययो भवति।

ईकारे स्त्रीकृतेऽलोप्यः ॥३७३ ॥

स्त्रियां वर्तमाने ईप्रत्यये परे पूर्वोऽकारो लोप्यो भवति। नदी मही भषी प्लवी कुमारी किन्नरी किशोरी प्रभृतयः। अञ्च्। प्राची प्रतीची समीची उदीची तिरश्चीत्यादि। वाह्। अनड्वही (वा स्त्रीकारे) अनड्वाही प्रष्ठौही इत्यादि। उ। तन्वी। उर्वी पृथ्वी। पट्वी। इ—दाक्षी। दैवदत्ती। धूली। अंस्। श्रेयन्स्—श्रेयसी विदुषी प्रेयसी। अन्त्—

तुदभादिभ्य ईकारे ॥३७४ ॥

तुदादिभ्यो भादिभ्यश्च परो अन्तिरनकारको वा भवति ईप्रत्यये परे। तुदती तुदन्ती स्त्री। भाती भान्ती स्त्री।

स्यात् ॥३७५ ॥

स्यात्परोऽन्तिरनकारको वा भवति ईप्रत्यये परे। भविष्यती। भविष्यन्ती।

न यनञ्यां ॥३७६ ॥

यथा—'सर्वा' शब्द है स्त्रीलिंग का आकार प्रत्यय है अतः क प्रत्यय करने पर सर्वका पुनः इस सूत्र से पूर्व के 'अ' को इकार होकर 'सर्विका' बना। वैसे ही मूषिका, कारिका आदि सभी बन जायेंगे।

स्त्रीलिंग में वर्तमान नदादि अञ्च् वाह् उ, इ अंस् अंत, ऋ, सखि और नकारांत शब्दों से परे 'ई' प्रत्यय हो जाता है ॥३७२ ॥

अतः 'नद' शब्द है स्त्रीलिंग में 'ई' प्रत्यय हुआ पुनः—

स्त्रीलिंग में 'ई' प्रत्यय के होने पर पूर्व के अकार का लोप हो जाता है ॥३७३ ॥

नद के अकार का लोप होकर 'नदी' बना, ऐसे ही कुमार के 'अ' का लोप होकर 'कुमारी' बना।

अञ्च् धातु से बने हुए शब्दों के रूप—प्राञ्च में 'ई' प्रत्यय होकर अनुषंग का लोप होकर अञ्चेरलोपः पूर्वपदस्य दीर्घः इस सूत्र से दीर्घ होकर प्राची बना। ऐसे ही प्रतीची, उदीची, तिश्ची बना।

वाह्—अन्दुही—अनड्वाही ३४०वें सूत्र से विकल्प से वा को उ हुआ है। अतः बना। प्रष्ठौही।

उकारांत शब्दों में—तनु उरु से तन्वी, उर्वी बना।

पृथु से पृथ्वी, पटु से पट्वी आदि।

इकारान्त शब्दों में—दाक्षि से दाक्षी दैवदत्ति से दैवदत्ती बना। अन्स्—श्रेयसी, विदुषी, प्रेयसी बना।

अन्त् से—

ईकारांत स्त्री प्रत्यय के आने पर तुदादि और भादि से परे अंत के नकार का लोप विकल्प से होता है ॥३७४ ॥

तुदती, तुदन्ती, भाती, भान्ती बना।

'स्य' से परे अंत में नकार का लोप विकल्प से होता है। ई प्रत्यय के आने पर ॥३७५ ॥

भविष्यती, भविष्यन्ती बना।

यन् अन् विकरण से परे स्त्रीलिंग ईकार के आने पर अन्त में नकार का लोप नहीं होता है ॥३७६ ॥

यन् अन् विकरणाभ्यां परोऽन्तिरनकारको न भवति ईकारे परे। दीव्यन्ती सीव्यन्ती पचन्ती गच्छन्ती स्त्री इत्यादि। न यनन्भ्यामिति किं ? सुन्वती तन्वती क्रीणती सती आयुष्मती धनवती इत्यादि। ऋ। कर्त्री हर्त्री भर्त्री क्रोष्ट्री इत्यादि। सखि। सखी। इवर्णावर्णयोर्लोपः।

नान्तात् स्त्रीकारे नित्यमवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ ॥३७७।

अवमसंयोगादनोऽलोपो नित्यं भवति स्त्रीकारे परे। राज्ञी दण्डिनी गोमिनी तपस्विनी यशस्विनी।

वरुणेन्द्रमृडभवशर्वरुद्रादान् ॥३७८॥

एभ्यः परो आन् प्रत्ययो भवति। तेभ्यश्च ई प्रत्ययः। वरुणानी शर्वाणी मृडानी इन्द्राणी भवानी रुद्राणी।

नान्तसंख्यास्वस्रादिभ्यो न ॥३७९॥

नान्तेभ्यः संख्यादिभ्यः स्वस्रादिभ्यश्च ईप्रत्ययो न भवति। पञ्चदश। तिस्रः। चतस्रः। आदि शब्दात् सीमा दामा। बहवो राजानो यस्यां पुर्यां सा बहुराजा। स्वसा माता दुहितेत्यादि।

इति प्रत्ययान्ताः ❑

अतः दीव्यन्त का दीव्यन्ती, पचन्त् का पचन्ती बना।

प्रश्न—यन्, अन् विकरण के आने पर 'न' का लोप नहीं होता ऐसा क्यों कहा ? तो सुन्वती, क्रीणन्ती सन्त्-सती आदि।

धनवन्त्—धनवती बनता है। इसकी सिद्धि के लिये ऋकारान्त—कर्तृ-कर्त्री, हर्त्री, भर्त्री बना।

सखि—सखी बना। नकारांत में—दण्डिन् तपस्विन्—दण्डिनी, तपस्विनी बना।

राजन् + ई, स्त्रीलिंग में—

नकारांत से स्त्रीलिंग में प्रत्यय करने पर 'व म', का संयोग न होने से अन् के 'अ' का लोप हो जाता है ॥३७७॥

अतः राजन् + ई = राज्ञी बना।

वरुण, इन्द्र, मृड भव, शर्व, रुद्र शब्दों से ई प्रत्यय के आने पर आन् का आगम हो जाता है ॥३७८॥

अतः वरुणानी, इन्द्राणी, शर्वाणी आदि बना।

नकारांत संख्यावाची शब्द और स्वसृ आदि से स्त्रीलिंग में 'ई' प्रत्यय नहीं होता है ॥३७९॥

पंच, दश, तिस्रः, चतस्रः आदि बने।

आदि शब्द से सीमन् दामन् है तो सीमा, दामा बना।

बहुत राजा हैं जिस पुरी में उसे कहते हैं बहुराजा नगरी। ऐसे ही स्वसा, माता दुहिता आदि शब्दों में स्त्रीलिंग प्रत्यय नहीं होते हैं।

इस प्रकार से स्त्रीलिंग प्रत्यय प्रकरण समाप्त हुआ। ❑

---

१. स्त्रीकारे नित्यं ॥३८३॥ अवमसंयोगादनोऽलोपो नित्यं भवति स्त्रीकारे परे स चालुप्तवद्भवति पूर्वस्थवर्णस्य विधौ कर्तव्ये। राज्ञी। इति समीचीनं दृश्यते।

अथ कारकं किञ्चिदुच्यते

किं कारकं ? करोति क्रियां निर्वर्तयतीति कारकं। कस्मिन्नर्थे प्रथमा विभक्तिः ? कर्तरि प्रथमा। कः कर्ता ?

यः करोति स कर्ता ॥३८० ॥[1]

यः क्रियां करोति स कर्तृसंज्ञो भवति। देवदत्तः करोति। मुनिरधीते। यज्ञदत्तौ लुनीतः। यती पठतः। विष्णुमित्रा गच्छन्ति। साधवोऽनुतिष्ठन्ति। इत्यादि। कस्मिन्नर्थे द्वितीया ? कर्मणि द्वितीया। किं कर्म ?

यत्क्रियते तत्कर्म ॥३८१ ॥[2]

कर्त्रा यत्क्रियते तत्कारकं कर्मसंज्ञं भवति। कुम्भं करोति। काष्ठं छिनत्ति। मार्गं रुणद्धि। स्तनौ पिबति। गुरून् वन्दते। इत्यादि।

द्वितीयैनेन ॥३८२ ॥

एनप्रत्ययान्तेन योगे लिङ्गाद् द्वितीया भवति।

अदूरे एनोऽपञ्चम्या दिग्वाचिनः ॥३८३ ॥

अदूरार्थे दिग्वाचिनः परं एनप्रत्ययो भवति अपञ्चम्याः। अपञ्चम्या इति कोऽर्थः ? द्वितीयायाः। गणनया पञ्चमी विभक्तिः षष्ठी। तेन षष्ठ्यर्थे द्वितीया भवति। अदूरवर्तीन्यां पूर्वस्यां दिशीत्यर्थः ॥ पूर्वेण ग्रामं। उत्तरेण गिरिं। दक्षिणेन नदीं। पश्चिमेन केदारमित्यादि। चकारान्निकषासमयाहाधिगन्तरान्तरेण संयुक्ताद् लिङ्गाद् द्वितीया भवति। निकषा ग्रामं। समया वनम्। हा देवदत्तम्। धिग् यज्ञदत्तं। अन्तरा गार्हपत्यमाहवनीयं च वेदिः। अन्तरेण पुरुषाकारं न किञ्चिल्लभते।

अथ किंचित् कारक प्रकरण कहा जाता है।

कारक किसे कहते हैं ? जो क्रिया को करता है, बनाता है वह कारक है। किस अर्थ में प्रथमा विभक्ति होती है ? कर्ता अर्थ में प्रथमा विभक्ति होती है। कर्ता किसे कहते हैं ?

जो क्रिया को करता है वह कर्ता कहलाता है ॥३८० ॥

जो क्रिया को करता है उस की कर्तृ संज्ञा होती है। जैसे 'देवदत्त करता है', मुनि पढ़ते हैं, दो यज्ञदत्त काटते हैं। दो मुनि पढ़ते हैं। विष्णुमित्र जाते हैं। बहुत से साधु पीछे बैठते हैं। इत्यादि।

अकारान्तादव्ययीभावात्परयोस्तृतीयसप्तम्योः स्थाने अम् वा भवति। उपकुम्भं, उपकुम्भेन। उपकुम्भं, उपकुम्भाभ्यामित्यादि। निरन्तरायं, निरन्तरायेण। उपकुम्भं, उपकुम्भे। उपकुम्भयोः। इत्यादि। निरन्तरायं, निरन्तराये। अपञ्चम्या इति किं ? उपकुम्भात्। निरन्तरायात्। इत्यादि। स्त्रीष्वधिकृत्य अधिकृत्यस्याधिरादेशः। शक्तिमनतिक्रम्य अनतिक्रम्यस्य यथादेशः। इत्यादिषु समासे कृते।

अन्यस्माल्लुक् ॥४५१ ॥

अकारान्त अव्ययीभाव से पंचमी को छोड़कर सभी विभक्तियों को 'अम्' हो जाता है ॥४४९ ॥

अतः 'उपकुम्भं' बना। ऐसे ही अन्तरायस्य अभावः—निरन्तरायं, गृहस्य समीपं-उपगृहं, गजस्य समीपं-उपगजं। भार्यायाः समीपं-उपभार्यं 'स्वरो ह्रस्वो नपुंसके' सूत्र से ह्रस्व हो गया। ऐसे ही वादस्य अभावो निर्वादं, मक्षिकाणाम् अभावो निर्मक्षिकं बना।

शीतस्य अतिक्रमः—अतिशीतं, क्रमस्य अतिक्रमः—अतिक्रमं, दिनंदिनं प्रति—प्रतिदिनं, गृहं गृहं प्रति—प्रतिगृहं आदि। ऐसे ही पुरुषस्य अनुगमः—अनुपुरुषं, अनुतटं आदि। ग्रामस्यांतः—अंतर्ग्रामं, ग्रामस्य मध्ये—मध्येग्रामं, ग्रामस्य बहिः बहिर्ग्रामं, पर्वतस्योपरि उपरिपर्वतं, वनस्य बहिः—बहिर्वणं अंतर्वणं आदि।

अकारांत अव्ययीभाव से परे तृतीया और सप्तमी के स्थान में विकल्प से अम् होता है ॥४५० ॥

उपकुंभं, उपकुम्भेन	उपकुंभभ्याम्	उपकुम्भैः
उपकुंभं, उपकुम्भै	उपकुम्भयोः	उपकुम्भेषु।
ऐसे ही, निरन्तरायं निरन्तरायेण	निरन्तराभ्यां	निरन्तरायैः

इत्यादि। अपञ्चम्याः ऐसा क्यों कहा ? तो पंचमी में उपकुम्भात्, निरन्तरायात् बनता है। इत्यादि।

स्त्रीषु अधिकृत्य, शक्तिमनतिक्रम्य, ऐसा विग्रह है। यहाँ अधिकृत्य को 'अधि' एवं अनतिक्रम्य को 'यथा' आदेश हुआ है।

स्त्री + सु अधि + सि विभक्ति का लोप होकर अव्यय को पूर्व में करके अधिस्त्री, यथाशक्ति बना। गोरप्रधानस्य सूत्र से अधिस्त्री, को ह्रस्व करके लिंग संज्ञा होकर विभक्तियाँ आईं।

अकारांत से भिन्न अन्य अव्ययीभाव से परे विभक्तियों का लुक् हो जाता है ॥४५१ ॥

अकारान्तादन्यस्माद्व्ययीभावात्परासां विभक्तीनां लुग् भवति। अधिस्त्रि। यथाशक्ति। एवमधिगायत्रि। अधिसरस्वति। अधिधारति। अधिनदि। आत्मनः अधि अध्यात्मं। गुरोरनतिक्रमेण यथागुरु। वध्वा अनतिक्रमेण यथावधु। चम्वा अनतिक्रमेण यथाचमु। गिरेरनतिक्रमेण यथागिरि। वध्वा अनुगमः अनुवधु। अनुकण्डु। अनुनदि। अनुस्त्रि। अनुपटु। अनुवायु। अनुगुरु। अनुपितृ अनुमातृ अनुकर्तृ। कर्तुः समीपमुपकर्तृ। एवमुपगिरि। उपरवि। उपयति। उपगुरु उपतरु। उपवधु। उपचमु उपनदि। उपस्त्रि। उपगु। उपनु। कर्तुरतिक्रमः अतिकर्तृ। एवमतिरि। अतिगु। अतिनु।

समं भूमिपदात्योः ॥४५२॥

भूमिपदात्योः परयोः समत्वं इत्येतस्य समभित्यादेशो भवति। भूमेः समत्वं समंभूमि। पदातीनां समत्वं समंपदाति।

सुविनिर्दुर्भ्यः स्वपिसूतिसमानाम् ॥४५३॥

सुविनिर्दुर्भ्यः परस्य स्वपिसूतिसमानां सकारस्य षकारो भवति। सुषमं। विषमं। निष्षम। दुष्षमं। अपरसमं इत्यादि।

द्वन्द्वैकत्वम् ॥४५४॥

समाहारद्वन्द्वस्यैकत्वं नपुंसकलिङ्गं च स्यात्। अर्कश्च अश्वमेधश्च अर्काश्वमेधौ। तयोः समाहारः अर्काश्वमेधं। एव तक्षायस्कार। हसमयूर। मथुरापाटलिपुत्रं। पाणिपादं। बदरामलकं। सुखदुःखं। शुकश्च हंसश्च मयूरश्च कोकिलश्च शुकहंसमयूरकोकिलं। इत्यादि।

तथा द्विगोः ॥४५५॥

तथा समाहारद्विगोरप्येकत्वं नपुंसकलिङ्गं च स्यात्।

अतः अधिस्त्रि यथाशक्ति अधिगायत्रि, अधिसरस्वति आदि बन गये। ऐसे ही आत्मनः अधि—अध्यात्मं। आत्मन् शब्द को अकारांत होकर नपुंसकलिंग में एकवचन हो गया। गुरोः अनतिक्रमेण—यथा गुरु। वध्वा अनुगमः अनुवधु। कर्तुः समीपं—उपकर्तृ गोः समीपं—उपगु। ह्रस्व हो गया। इसी प्रकार से ऊपर में बहुत से शब्द बने हैं देख लेना चाहिये।

भूमेः समत्वं, पदातीनां समत्वं है।

भूमि पदाति से परे समत्वं को समं आदेश हो जाता है ॥४५२॥

समंभूमि, समं पदाति।

सु, वि, निर्, दुर् से परे स्वपि, सूति और समान के सकार को षकार हो जाता है ॥४५३॥

स्वपि में—सुषुप्तः, विषुप्तः, निष्षुप्तः दुष्षुप्तः। सूति में—सुषूतिः, विषूतिः, निःषूतिः दुःषूतिः।

समान में—सुषमं, विषमं, निष्षमं, दुष्षमं। इन्हीं चारों स परे क्यों कहा ? तो अपरसमं में सकार को षकार नहीं हुआ है। इत्यादि।

अर्कश्च अश्वमेधश्च—अर्काश्वमेधौ तयोः समाहारः—

समाहार द्वन्द्व में एकत्व एवं नपुंसकलिंग हो जाता है ॥४५४॥

अतः अर्काश्वमेधं बना। ऐसे ही शुकश्च मयूरश्च तक्षायस्कारश्च तयोः समाहार 'तक्षायस्कारं' हंसश्च मयूरश्च हंसमयूरौ तयोः समाहारः हसमयूरं, पाणी च पादौ च पाणिपादौ तयोः समाहार पाणिपादं इत्यादि।

उसी प्रकार से समाहार द्विगु में भी नपुंसकलिंग एकवचन हो जाता है ॥४५५॥

यथा— पञ्चानां गवां समाहारः पञ्चगो, चतुर्णां एषां समाहारः चतुष्पि ।

समासान्तर्गतानां वा राजादीनामदन्तता ॥४५६॥

समासान्तर्गतानां राजादीनामदन्तता अत्रत्ययो भवति। वा समुच्चये। पञ्चानां गवां समाहारः पञ्चगवं। चतुर्णां पथां समाहारः चतुष्पथं।

न सूत्रे क्वचित् ॥४५७॥

क्वचित्सूत्रे द्वन्द्वैकत्वं भवति, नपुंसकलिङ्गत्वं न स्यात्। विरामव्यञ्जनादौ। एवं षचिवचिसिचिरुचिमुचेश्च। इत्यादि।

पुंवद्भाषितपुंस्कानूङ्पूरण्यादिषु स्त्रियां तुल्याधिकरणे ॥४५८॥

स्त्रियां वर्तमानं भाषितपुंस्कं अनूङन्तं पूर्वपदभूतं पुंवद्भवति स्त्रिया वर्तमाने तुल्याधिकरणे पूरण्यादिगणवर्जिते उत्तरपदे परे। शोभना भार्या यस्यासौ शोभनभार्यः। एवं दीर्घजङ्घभार्यः। इत्यादि। भाषितपुंस्कमिति किं ? द्रोणीभार्यः। अनूङ् इति किम् ? ब्रह्मबन्धूभार्यः। अपूरण्यादिष्विति किं ? कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। के पूरण्यादयः ? पूरणी पञ्चमी कल्याणी मनोज्ञा सुभगा दुर्भगा स्वकान्ता कुब्जा वामना।

संज्ञापूरणीकोपधास्तु न ॥४५९॥

स्त्रियां वर्तमाना भाषितपुंस्कानूङन्ताः संज्ञापूरणीप्रत्ययान्ताः कोपधाः पूर्वपदभूताः पुंवद्रूपा न भवन्ति

समास के अन्तर्गत राजादि शब्द अकारांत हो जाते हैं ॥४५६॥

यहाँ सूत्र में 'वा' शब्द समुच्चय के लिये है अतः पञ्चगो से 'अ' प्रत्यय होकर अव् होकर लिंग संज्ञा एवं विभक्ति आकर 'पंचगवं' बना। ऐसे ही चतुष्पथि में "इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च" सूत्र से इकार का लोप, लिंग संज्ञा होकर 'चतुष्पथं' बना।

किसी सूत्र में द्वंद्व में एकत्व होता है, किन्तु नपुंसकलिंग नहीं होता है ॥४५७॥

विराम और व्यंजन का समास करके डि विभक्ति एकवचनान्त है। किन्तु नपुंसकलिङ्ग नहीं है यदि नपुंसकलिङ्ग होता तो वारि शब्दवत् न का आगम होकर आदिनि हो जाता न कि आदौ।

तुल्याधिकरण में पूरणी आदि गण को छोड़कर स्त्रीलिंग में वर्तमान अकारांत रहित भाषितपुंस्क को पुंवद् हो जाता है ॥४५८॥

जैसे—शोभना भार्या यस्य सः शोभनभार्या बना। पुनः ४३२वें सूत्र से अन्त को अकारांत होकर शोभनभार्यः बना। ऐसे ही दीर्घजंघभार्यः इत्यादि। भाषितपुंस्क हो ऐसा क्यों कहा ? भाषितपुंस्क नहीं हो तो ह्रस्व नहीं होगा जैसे—द्रोणीभार्यः यहाँ द्रोणी शब्द भाषितपुंस्क नहीं है नित्य ही स्त्रीलिंग है।

अनूङ् ऐसा क्यों कहा ? तो ब्रह्मबन्धूभार्यः यहाँ बन्धू शब्द ऊकारांत है उसे ह्रस्व नहीं हुआ। पूरणी आदि गण को छोड़कर ऐसा क्यों कहा ? पूरणी आदि गण के शब्दों को भी ह्रस्व नहीं होगा। जैसे—कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमाः। रात्रयः। पूरणी आदि गण में कौन-कौन है ? पूरणी, पञ्चमी, कल्याणी, मनोज्ञा, सुभगा, दुर्भगा, स्वकान्ता, कुब्जा, वामना। ये शब्द पूरणी आदि गण में माने गये हैं।

संज्ञा पूरणी प्रत्ययांत 'क' की उपधा वाले पूर्वपदभूत पुंवद् रूप नहीं होते हैं ॥४५९॥

स्त्रीलिंग में वर्तमान तुल्याधिकरण पद में पूरणी आदि गण वर्जित उत्तर पद के होने पर स्त्रीलिंग में वर्तमान भाषित पुंस्क से अकारांत रहित, संज्ञा पूरणी प्रत्ययांत वाले एवं 'क' की उपधा वाले शब्दों को पूर्वपद में ह्रस्व नहीं होता है। जैसे दत्ता भार्या यस्यासौ दत्ताभार्य पञ्चमी भार्या यस्यासौ पञ्चमीभार्यः,

स्त्रियां वर्तमाने तुल्याधिकरणे पदे पूरण्यादिगणवर्जिते उत्तरपदे परे। दत्ता भार्या यस्यासौ दत्तभार्यः। पञ्चमीभार्यः। पाचिकाभार्यः। गोरप्रधानस्येत्यादिना ह्रस्वः। इत्यादि।

कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते ॥४६०॥

स्त्रियां वर्तमाना भाषितपुंस्का अनूङन्ताः संज्ञापूरणीप्रत्ययान्ताः कोपधा अपि कर्मधारयसमासे तु पुंवद्भवन्ति स्त्रियां वर्तमाने तुल्याधिकरणे पूरण्यादिगणवर्जिते उत्तरपदे परे। शोभना चासौ भार्या च शोभनभार्या। एवं दत्तभार्या। पाचकभार्या। पञ्चमभार्या इत्यादि। भाषितपुंस्कमिति किं ? खट्वावृन्दारिका। अनूङिति किं ? ब्रह्मवधूदारिका।

आकारो महतः कार्यस्तुल्याधिकरणे पदे ॥४६१॥

महत आकारः कार्यस्तुल्याधिकरणे पदे परे। महांश्चासौ वीरश्च महावीरः। अन्तरङ्गत्वात् व्यञ्जनान्तस्य यत्सुभोरिति न्यायादनुषङ्गलोपः। प्रथमतोऽनुषङ्गस्य लोपे कृते सति पश्चात् येन विधिरस्तदन्तस्येति न्यायात् तकारस्याकारः। सर्वत्र सवर्णे दीर्घः। एवं महापुरुषः। महापर्वतः। महादेशः।

नस्य तत्पुरुषे लोपः ॥४६२॥

पाचिकाभार्या यस्यासौ पाचिकाभार्यः। इनमें "गोरप्रधानस्य" इत्यादि सूत्र से अन्त को ह्रस्व हुआ है। इस प्रकार से इनमें बहुवीहिसमास में पूर्व को ह्रस्व नहीं हुआ अन्त को ह्रस्व हुआ है। किन्तु आगे कर्मधारय समास में पूर्व को ह्रस्व होगा तथा अन्त को ह्रस्व नहीं होगा। सो ही दिखाते हैं।

कर्मधारय समास में पुंवद् भाव हो जाता है ॥४६०॥

स्त्रीलिंग में वर्तमान तुल्याधिकरण में पूरणी आदि गण वर्जित उत्तर पद में होने पर स्त्रीलिंग में वर्तमान भाषितपुंस्क, ऊकारांत रहित संज्ञा पूरणी प्रत्ययांत वाले 'क' की उपधा सहित भी कर्मधारय समास में पुंवद् हो जाते हैं। शोभना चासौ भार्या च—शोभन-भार्या। दत्ता चासौ भार्या च—दत्तभार्या, पाचिका चासौ भार्या च—पाचकभार्या, पंचमी चासौ भार्या च—पंचमभार्या। पाचिका और पंचमी में पुंवद् भाव होने से स्त्री प्रत्यय के निमित्त से हुआ इकार और दीर्घ 'ई' प्रत्यय का लोप हो गया है। इत्यादि। भाषित पुंस्क ऐसा क्यों कहा ? जैसे—खट्वा चासौ वृन्दारिका च खट्वा वृन्दारिका, इसमें 'खट्वा' भाषित पुंस्क नहीं है सतत स्त्रीलिंग ही है। ऊकारांत न हो ऐसा क्यों कहा ? ब्रह्म-वधू चासौ दारिका च—ब्रह्मवधू दारिका, इसमें ऊकारांत होने से ह्रस्व नहीं हुआ।

महांश्चासौ देवश्च, ऐसा विग्रह हुआ, महन्त+सि, देव+सि विभक्ति का लोप होकर—

तुल्याधिकरण पद के आने पर महत् के अंत को आकार होता है ॥४६१॥

यहाँ अन्तरंग विधि होने से "व्यञ्जनान्तस्य यत्सुभोः" ४३०वें सूत्र से अनुषंग का लोप हुआ। पहले अनुषंग का लोप करने पर पश्चात् जिससे विधि होती है वह उसके अंत की होती है इस न्याय से तकार को आकार हुआ है। अतः मह आ देव सर्वत्र सवर्ण को दीर्घ हो जाता है। 'महादेव' रहा। लिंग संज्ञा होकर विभक्ति आकर 'महादेवः' बना, इसी प्रकार से महांश्चासौ पुरुषश्च महापुरुषः, महांश्चासौ पर्वतश्च-महापर्वतः, महादेशः इत्यादि।

तत्पुरुष के अंतर्गत नञ् समास का कथन है

न सवर्णः, न ब्राह्मणः है

नञ् संज्ञक तत्पुरुष समास में नकार का लोप हो जाता है ॥४६२॥

तत्पुरुषसमासे नस्य नकारमात्रस्य लोपो भवति। न सवर्णः असवर्णः। न ब्राह्मणः अब्राह्मणः। एतल्लक्षणं तत्पुरुषस्यैव, अन्येषां समासानां कथमिदं लक्षणं ? न विद्यते घोषो ध्वनिर्येषां ते अघोषाः ? तथा तत्पुरुष इहोपलक्षणं। उपलक्षणं किम् ? स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणं। यथा दधि काकेभ्यो रक्षति।

स्वरेऽक्षरविपर्ययः ॥४६३॥

तत्पुरुषे समासे नस्य अक्षरविपर्ययो भवति स्वरे परे। न अजः अनजः। एवमनर्घ्यः। अनर्थः। अनकारः। अनिन्द्रः। अनुदकमित्यादि।

कोः कत् ॥४६४॥

कुशब्दस्य कदादेशो भवति तत्पुरुषे स्वरे परे। स्वपदविग्रहो नास्तीत्यन्यपदविग्रहः। कुत्सितश्चासौ अश्वश्च कदश्वः। कदन्नं। कदुष्ट्रः। तत्पुरुष इति किम् ? कुत्सिता उष्ट्रा यस्मिन्देशे स कूष्ट्रो देशः।

का क्वीषदर्थेऽक्षे ॥४६५॥

ईषदर्थे वर्तमानस्य कुशब्दस्य कादेशो भवति तत्पुरुषे समासे अक्षशब्दे च परे। कु ईषल्लवणं कालवणं। काम्लं। कामधुरं। काज्यं। काक्षीरं। कादधि। कु ईषत् तन्त्रं कातन्त्रम्। काक्षेण वीक्षते।

कवश्नोष्णे ॥४६६॥

अतः 'न्' का लोप होकर अकार शेष रहा और असवर्णः, अब्राह्मणः बन गया।

यह लक्षण तत्पुरुष समास का ही है। अन्य समासों का यह लक्षण कैसे है ? यहाँ इस समास को तत्पुरुष का लक्षण कहना यह उपलक्षण है। उपलक्षण क्यों है ? अपने और अपने सदृश के ग्रहण करने वाले को उपलक्षण कहते हैं। जैसे दही की कौवे से रक्षा करता है यहाँ पर अन्य मार्जार कुत्ता आदि उपलक्षण है उनका भी निषेध हुआ समझना चाहिये।

न विद्यते घोषो ध्वनिर्येषां ते अघोषाः बन गया।

न अजः, न अर्घ्यः है।

स्वर के आने पर नकार का अक्षर विपर्यय हो जाता है ॥४६३॥

तत्पुरुष समास में अगले स्वर में नकार चला जाता है और अकार शेष रह जाता है। जैसे अनजः, अनर्घ्यः अनर्थः, अनकारः न इन्द्रः अनिन्द्रः, न उदकम्—अनुदकम्। इत्यादि।

कुत्सितश्चासौ अश्वश्च ऐसा विग्रह हुआ है।

तत्पुरुष समास में स्वर को आने पर 'कु' को 'कत्' हो जाता है ॥४६४॥

इसमें भी स्वपद से विग्रह नहीं होता है अतः अन्य पद से विग्रह किया है। कत्+अश्वः = संधि होकर कदश्वः बना। ऐसे ही कुत्सितं च तदन्नं—कदन्नं, कुत्सितश्चासौ उष्ट्रश्च—कदुष्ट्रः। तत्पुरुष में ही कु को कत् होता है ऐसा क्यों ? तब तो कुत्सिता उष्ट्राः यस्मिन् देशे स कूष्ट्रो देशः। यहाँ बहुव्रीहि समास होने से 'कु' ही रहा 'कत्' नहीं हुआ।

ईषत् अर्थ में और अक्ष शब्द के आने पर 'कु' को 'का' आदेश हो जाता है ॥४६५॥

तत्पुरुष समास में किंचित् अर्थ में वर्तमान कु शब्द को 'का' आदेश हो जाता है और अक्ष शब्द परे होने पर भी हो जाता है। कु ईषत् लवणं-कालवणं, कु ईषत् आम्लं काम्लं कु मधुरं कामधुरं, काक्षीरं, कादधि, कु ईषत् तंत्रं (सूत्रं) कातन्त्रं, काक्षं।

उष्ण शब्द से परे 'कु' को 'कव' हो जाता है ॥४६६॥

ईषदर्थे वर्तमानस्य कुशब्दस्य कवादेशो भवति तत्पुरुषे चोष्णशब्दे परे। चकारोऽत्र विकल्पार्थः। कु ईषच्च तत् उष्णं च कवोष्णं। पक्षे कोष्णं। कदुष्णं।

पथि च ॥४६७॥

तत्पुरुषसमासे कुशब्दस्य कादेशो भवति पथिन्शब्दे च परे। कुत्सितश्चासौ पन्थाश्च कापथः। समासान्तर्गतेत्यादिना अत्प्रत्ययः। नस्तु क्वचिन्नलोपः। इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च। इति इकारलोपः।

पुरुषे तु विभाषया ॥४६८॥

कुशब्दस्य कादेशो भवति वा तत्पुरुषे पुरुषशब्दे परे। कुत्सितश्चासौ पुरुषश्च कापुरुषः। कुपुरुषः।

याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् ॥४६९॥

ईकारश्च आकारश्च याकारौ। याकारौ स्त्रीकृतौ ह्रस्वौ भवतः समासे क्वचिल्लक्ष्यानुरोधात्। रेवत्या मित्रं रेवतिमित्रं। एवं रोहिणिमित्रं। इष्टकानां चितं इष्टकचितं। इषीकाणां तूलं इषीकतूलं। इत्यादि।

ह्रस्वस्य दीर्घता ॥४७०॥

ह्रस्वस्य दीर्घता भवति समासे क्वचिल्लक्ष्यानुरोधात्। दात्राकारौ कर्णौ यस्यासौ दात्राकर्णः। द्विगुणाकर्णः।

ईषत् अर्थ में वर्तमान कु शब्द को 'का' आदेश हो जाता है तत्पुरुष समास मे उष्ण शब्द के आने पर। यहाँ सूत्र मे चकार शब्द विकल्प के लिये है। कु ईषच्च तदुष्णं च कव + उष्णं = कवोष्णं। द्वितीय पक्ष में—कु को 'का' होकर 'कोष्णं' बना।

पथि शब्द के आने पर भी 'का' आदेश हो जाता है ॥४६७॥

तत्पुरुष समास मे 'कु' शब्द को 'का' आदेश हो जाता है। कुत्सितश्चासौ पन्थाश्च—कापथः 'समासांतर्गतानां वा' इत्यादि सूत्र से पथिको अप्रत्यय हो गया एवं 'नस्तुक्वचित्' सूत्र से नकार का लोप 'इवर्णावर्णयोर्लोपः' इत्यादि सूत्र से इकार का लोप, लिंगसंज्ञा, सि विभक्ति आकर 'कापथः' बना।

पुरुष शब्द के परे 'का' आदेश विकल्प से होता है ॥४६८॥

कुत्सितश्चासौ पुरुषश्च कापुरुषः, कुपुरुषः बना।

स्त्रीलिंग के ईकार और आकार क्वचित् ह्रस्व हो जाते हैं ॥४६९॥

सूत्र से 'याकारौ' शब्द है वह ईकाराश्च आकारश्च ई को य् होकर याकारौ बना है। समास में कहीं पर लक्ष्य के अनुरोध से ईकार, आकार ह्रस्व हो जाते हैं। जैसे—रेवत्याः मित्रं, रेवती + ङस् मित्र सि विभक्ति का लोप होकर ह्रस्व होकर रेवतिमित्र लिंग सज्ञा होकर विभक्ति आकर 'रेवतिमित्रं' बना। वैसे ही रोहिण्याः मित्रं—रोहिणिमित्रं। इष्टकानां चितं इष्टकचितं, इषीकाणां तूलं इषीकतूलं। इत्यादि।

दात्राकारौ कर्णौ यस्य असौ—बहुव्रीहि समास मे—

विभक्ति का लोप होकर 'दात्रकर्ण' रहा।

समास में कहीं पर ह्रस्व को दीर्घता हो जाती है ॥४७०॥

लक्ष्य के अनुरोध से कहीं पर ह्रस्व को दीर्घ हो जाता है अतः 'दात्राकर्ण' लिंग संज्ञा, विभक्ति आकर 'दात्राकर्णः' बना। ऐसे ही द्विगुणाकारौ कर्णौ यस्यासौ—द्विगुणाकर्णः।

नहिवृतिवृषिरुचिसहितनिरुहिषु क्विबन्तेषु प्रादिकारकाणाम् । ।४७१ ।।

प्रादीनां कारकाणामेषु क्विबन्तेषु दीर्घता भवति नह्यादिषु धातुषु परतः । उपानत् । उपावृत् । प्रावृट् । कर्मावित् । नीरुक् । प्रतीषट् । परीतत् । वीरुत् । इत्यादि ।

अनव्ययविसृष्टस्तु सकारं कपवर्गयोः ।।४७२ ।।

अनव्ययविसृष्टस्तु सकारमाप्नुते कपवर्गयोः परतः । अयस्कारः अयस्कल्पः । अयस्पाशः । अयस्काम्यति । अयस्काम इत्यादि । कारकल्पपाशकाम्यकेषु सकारो दृश्यते ।

बहुव्रीह्यव्ययीभावौ द्वन्द्वतत्पुरुषौ द्विगुः ।
कर्मधारय इत्येते समासाः षट् प्रकीर्तिताः ।।१ ।।
वर्धमानकुमारेणार्हता पूज्येन वज्रिणा ।
कौमारे ऋषभेणापि कुमाराणां हितैषिणां ।।१ ।।
मुष्टिव्याकरणं नाम्ना कातन्त्रं वा कुमारकं ।
कालापकं प्रकाशात्मब्रह्मणामधिधायकं ।।२ ।।
प्रकाशितं शीघ्रबोधसंपदे श्रेयसां पदं ।
समासानां प्रकरणं भावसेन इहाभ्यधात् ।।३ ।।

इति समासाः ।

अथ तद्धितं किंचिदुच्यते

कपटोरपत्यं । भृगोरपत्यं । विदेहस्यापत्यं । उपगोरपत्यं । इति स्थिते—

नहि वृति आदि क्विबन्त वाले धातुओं के आने पर प्र आदि पूर्वपद के स्वर को दीर्घ होता है ।।४७१ ।।

उप आदि उपसर्ग से परे नहि, वृति, वृषि, व्यधि, रुचि, सहि, तनि, रुहि धातुओं से क्विप् प्रत्यय हुआ है पुनः क्विप् प्रत्यय का सर्वापहारी लोप होकर रूप बन गया है उसमें पूर्व पद को दीर्घ करने के लिये यह सूत्र लगा है । जैसे—

उप नह् दीर्घ होकर 'उपानह्' बना लिंग संज्ञा होकर सि विभक्ति आकर 'उपानत्' बना । वैसे ही सर्वत्र दीर्घ हुआ है । उपवृत्-उपावृत प्रवृप-प्रावृट् । कर्माणि विध्यति इति कर्मव्यध् संप्रसारण होकर अर्थात् य् को इ होकर कर्मविध् दीर्घ होकर 'कर्माविध्' बना । निरुच्-नीरुक् प्रति सह्-प्रतीषट्-परीतन्-परीतत् विरुह्-वीरुत् बना ।

कवर्ग पवर्ग के आने पर अव्यय से रहित विसर्ग सकार हो जाता है ।।४७२ ।।

जैसे अयः कार-अयस्कारः, अयः कल्प-अयस्कल्पः, अयस्पाशः अयस्काम्यति अयस्कामः इत्यादि । कार, कल्प, पाश और काम्यक में सकार दिख रहा है ।

श्लोकार्थ—बहुव्रीहि, अव्ययीभाव, द्वंद्व, तत्पुरुष, द्विगु और कर्मधारय इस प्रकार से ये छह समास कहे गये हैं ।।१ ।।

इस प्रकार से समास का प्रकरण समाप्त हुआ ।

अब किंचित् तद्धित का वर्णन किया जाता है ।

कपटोः अपत्य-कपटु का लड़का, भृगोः अपत्यं विदेहस्य अपत्य उपगोः अपत्यं । ऐसा विग्रह हुआ है ।

वाणपत्ये ॥४७३॥

षष्ठ्यन्तान्नाम्नोऽण् प्रत्ययो भवति वा अपत्ये अभिधेये। तत्स्थाइत्यादिना विभक्तिलोपः।

वृद्धिरादौ सणे ॥४७४॥

स्वराणामादिस्वरस्य वृद्धिर्भवति सणकारानुबन्धे तद्धिते परे। का वृद्धिः ?

आरुत्तरे च वृद्धिः ॥४७५॥

अवर्ण ऋवर्ण इवर्ण उवर्णनामा आर उत्तरे—(ऐ औ) च द्वे सन्ध्यक्षरे वृद्धिसंज्ञा भवन्ति। प्रयोगात्—अवर्णस्य आकारो वृद्धिः। ऋवर्णस्य आर् वृद्धिः। इवर्णस्य एकारस्य च ऐकारो वृद्धिः। उवर्णस्य ओवर्णस्य च औकारो वृद्धिः।

उवर्णस्यौत्वमापाद्यं ॥४७६॥

उवर्णस्य ओत्वमापादनीयं तद्धिते स्वरे ये च परे।

कार्याववावावादेशावोकारौकारयोरपि ॥४७७॥

ओकारेऔकारयोरवावौ आदेशौ भवतस्तद्धिते स्वरे ये च परे। काप्टव। भार्गवः। वैदेहः। औपगवः। औपगवौ औपगवा इति। पुरुषशब्दवत्। एवं यास्कः यास्कौ। वेदः वेदौ। आङ्गिरसः। कौत्सः। वासिष्ठः। गौतमः। ब्राह्मणः। ऐदम इत्यादि। पञ्चालस्यापत्यं।

रूढादण् ॥४७८॥

षष्ठ्यंत नाम से पुत्र के अर्थ में 'अण्' प्रत्यय विकल्प से होता है ॥४७३॥

कपटु + ङस् "तत्स्था लोप्या विभक्तयः" ४२१वें सूत्र से विभक्ति का लोप होकर कपटु अण् रहा। 'ण्' का अनुबंध लोप हो गया। यहाँ अपत्य शब्द पुत्र वाचक है और तीनों लिंग में समान चलता है।

सकार णकार अनुबन्ध सहित तद्धित प्रत्यय के आने पर स्वरों में आदि के स्वर को वृद्धि हो जाती है ॥४७४॥

वृद्धि किसे कहते हैं ?

अवर्ण, ऋवर्ण, इवर्ण, उवर्ण को क्रम से 'आ' आर ऐ औ वृद्धि होती है ॥४७५॥

अर्थात् अवर्ण को आकार वृद्धि होती है, ऋवर्ण को आर इवर्ण और एकार को ऐकार, उवर्ण और ओ को औकार वृद्धि होती है। अतः कापटु अ रहा।

तद्धित के स्वर और य प्रत्यय के आने पर उवर्ण को 'ओ' हो जाता है ॥४७६॥

तद्धित के स्वर और यकार प्रत्यय के आने पर ओ को अव्, औ को आव् करना चाहिये ॥४७७॥

अतः 'कापटव' लिंग संज्ञा होकर सि विभक्ति आकर 'काप्टवः' बना। वैसे ही भृगोः अपत्यंभार्गवः, विदेहस्यापत्यं-वैदेहः, उपगोरपत्यं-औपगवः।

आगे ये रूप पुरुष शब्दवत् चलेंगे।

एवं यस्कस्य अपत्यं यास्कः, वेदस्य अपत्यं वैदः, अंगिरसः अपत्यं आंगिरसः कुत्सस्यापत्यं कौत्सः, वसिष्ठस्यापत्यं वासिष्ठः, गोतमस्यापत्यं—गौतमः, ब्रह्मणः अपत्यं ब्राह्मणः अस्यापत्यं ऐदमः।

अपत्य अर्थ में रूढ शब्द से परे अण् प्रत्यय होता है ॥४७८॥

देशसमाननामानः क्षत्रिया रूढाः । रूढशब्दात्परो अण् प्रत्ययो भवति अपत्येऽभिधेये ।

इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च ॥४७९ ॥

इवर्णावर्णयोर्लोपो भवति तद्धिते स्वरे ये च परे । पाञ्चालः । पञ्चालस्यापत्ये पाञ्चालौ । बहुत्वे—

रूढानां बहुत्वेऽस्त्रियामपत्यप्रत्ययस्य ॥४८० ॥

रूढानां बहुत्वे विहितस्योस्त्र्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति । निमित्ताभावे नैमित्तिकाभाव इति वृद्धेरपि लोपो भवति । पाञ्चालाः । एवं विदेहाः । मगधाः । अङ्गाः । अस्त्रियामिति किं ? पाञ्चाल्यः । वैदेह्यः । मागध्यः । इत्यादि । भृगोरपत्यं ।

ऋषिभ्योऽण् ॥४८१ ॥

ऋषिवाचिभ्यः परोऽण् भवति अपत्येऽर्थे । भार्गवः । भार्गवौ । बहुत्वे—

भृग्वत्र्यङ्गि रस्कुत्सवसिष्ठगोतमेभ्यश्च ॥४८२ ॥

पञ्चालस्यापत्यम् । जनपद समान नाम वाले क्षत्रिय रूढ कहलाते हैं । पुत्र के वाच्य अर्थ में रूढ शब्द से अण् प्रत्यय होता है । अतः यहाँ ।

पञ्चाल + ङस् विभक्ति का लोप, पञ्चाल + अ, वृद्धि होकर पाञ्चाल अ,

तद्धित के स्वर और यकार प्रत्यय के आने पर इवर्ण और अवर्ण का लोप हो जाता है ॥४७९ ॥

तब पाञ्चाल् + अ = पाञ्चाल बना पुनः लिंग संज्ञा होकर सि विभक्ति आकर 'पाञ्चालः' बना । द्विवचन में दो पुत्र के वाचक द्विवचन में—पञ्चालस्यापत्ये—पाञ्चालौ बना बहुवचन में अपत्य प्रत्यय करके पञ्चालस्यापत्यानि 'पाञ्चाल' बना ।

रूढ शब्दों के बहुवचन में किया गया अपत्य प्रत्यय यदि स्त्रीलिंग में नहीं है तो उस प्रत्यय का लुक् हो जाता है ॥४८० ॥

एवं अपत्य प्रत्यय का लोप होने पर उसके निमित्त से जो पूर्व स्वर को वृद्धि हुई थी उसका भी लोप हो गया क्योंकि 'निमित्त के अभाव में नैमित्तिक का भी अभाव हो जाता है' ऐसा नियम है । अतः 'पञ्चाल' रहा । लिंग संज्ञा और जस् विभक्ति आकर 'पञ्चालाः' बना अर्थ वही निकलेगा कि पञ्चाल राजा के बहुत से लड़के । ऐसे बहुवचन में विदेहस्यापत्यानि 'विदेहाः' मगधस्यापत्यानि, मगधाः अंगस्यापत्यानि अंगाः । सूत्र में स्त्रीलिंग को छोड़कर ऐसा क्यों कहा ? तो जैसे पञ्चाल-स्थापत्यं कन्या स्त्रीलिंग (लड़की वाचक) में पाञ्चाली द्विवचन में पाञ्चाल्यौ, बहुवचन में पाञ्चाल्यः बनेगा यहाँ कन्या वाचक प्रत्यय में बहुवचन के प्रत्यय का लोप नहीं होगा । विदेहस्यापत्यानि कन्याः स्त्रीलिंगे 'वैदेह्यः' मगधस्यापत्यानि कन्याः मागध्यः इत्यादि । अर्थात् स्त्रीलिंग वाचक अपत्यप्रत्यय यदि बहुवचन में आता है तो उसका लोप नहीं होता है ।

भृगोरपत्यं, है ।

अपत्य अर्थ में ऋषिवाची शब्द से परे अण् प्रत्यय होता है ॥४८१ ॥

भार्गवः, भार्गवौ, बहुवचन में—

भृगु, अत्रि, अंगिरस्, कुत्स, वसिष्ठ गोतम से बहुवचन में किये गये स्त्रीलिंग रहित अपत्य प्रत्यय को 'लुक्' हो जाता है ॥४८२ ॥

भृग्वादिभ्यो बहुत्वे विहितस्यास्त्र्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति। **भृगवः**। अत्रय.। अङ्गिरस.। गोतमा इत्यादि। अस्त्रियामिति किं ? भार्गव्यः। णटकारानुबन्धादिति नदादित्वादीप्रत्ययः। गर्गस्यापत्यं इति स्थिते—

ण्यो गर्गादेः ॥४८३॥

गर्गादिर्गणाद् ण्यो भवति अपत्येऽभिधेये।

इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च ॥४७९॥

इवर्णावर्णयोर्लोपो भवति तद्धिते स्वरे ये च परे। गार्ग्यः। गार्ग्यौ। वत्सस्यापत्यं वात्स्यः। वात्स्यौ। कौत्स्यः। **कौत्स्यौ**। बहुत्वे—

गर्गयस्कविदादीनां च ॥४८४॥

गर्गादीनां यस्कादीनां विदादीनां च बहुत्वे विहितस्य अस्त्र्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति। गर्गाः। वत्साः। कुत्साः। उभयत्र ण्यो लुक्। उर्वाः। यस्काः। विदाः। अणो लुक्। इत्यादि।

कुर्वादेर्यण् ॥४८५॥

अतः भृगोरपत्यानि भृग्वः इस अपत्य का लोप होकर उसके निमित्त से होने वाली वृद्धि का भी लोप हो गया।

अत्रेरपत्यानि अत्रयः, अंगिरसस्यापत्यानि आंगिरसः गोतमस्यापत्यानि गोतमाः इत्यादि। सूत्र में 'अस्त्रियां' ऐसा क्यों कहा ? भृगोरपत्यानि स्त्रीलिंगे वाचके भार्गव्यः बन गया। ण् अनुबंध और टकार का अनुबंध होने से नदादि गण में कहे जाने से स्त्रीलिंगवाची 'ई' प्रत्यय हो गया है।

गर्गस्यापत्यं ऐसा विग्रह है।

गर्गादि गण से अपत्य अर्थ में 'ण्य' प्रत्यय होता है ॥४८३॥

गर्ग + ङस् विभक्ति का लोप होकर ण्य प्रत्यय में णकार का अनुबंध होकर णानुबंध से पूर्व स्वर को वृद्धि हुई 'गार्ग य' रहा।

स्वर प्रत्यय और यकार प्रत्यय के आने पर इ वर्ण अ वर्ण का लोप हो जाता है ॥४७९॥[1]

यहाँ पूर्व के अकार का लोप होकर गार्ग्य बना। लिंग संज्ञा होकर विभक्ति आकर 'गार्ग्यः' द्विवचन में 'गार्ग्यौ' बना। वत्सस्यापत्यं वात्स्यः वात्स्यौ, कुत्सस्यापत्य कौत्स्यः कौत्स्यौ। बहुवचन में---

गर्गादि, यस्कादि और विदादि बहुवचन में किये गये स्त्रीलिंग रहित अपत्य प्रत्यय का 'लुक्' हो जाता है ॥४८४॥

अपत्य प्रत्यय का लोप होकर गर्गाः, वत्साः, कुत्साः बना इन दोनों में 'ण्य' का लोप हुआ है। उर्वाः, यस्काः विदाः यहाँ अण् प्रत्यय का लोप हुआ है।

कुरु आदि से यण् प्रत्यय हो जाता है ॥४८५॥

कुरु आदि गण से अपत्य अर्थ में यण् प्रत्यय होता है।

कुरोः अपत्यं कौरव्यः। लहस्यापत्यं लाह्यः॥

---

१. यह सूत्र पहले आ चुका है।

कुर्वादिर्गणात् यण्प्रत्ययो भवति अपत्येऽर्थे। कुरोरपत्यं कौरव्यः। लहस्यापत्यं लाह्यः।

कुञ्जादेरायनण् स्मृतः ॥४८६॥

कुञ्जादेर्गणात् आयनण् प्रत्ययो भवति अपत्येऽर्थे तदन्ते ण्यश्च स्मृतः। अस्त्रीनडादिबहुत्वे। कुत एतत् ? स्मृतग्रहणाधिक्यात्। कुञ्जस्यापत्यं कौञ्जायन्यः कौञ्जायन्यौ। एवं ब्राध्नायन्यः ब्राध्नायन्यौ। स्त्रियां तु। कौञ्जायनी। नडादेस्तु। नाडायनः। चारायणः। मौञ्जायनः। शाकटायनः। बहुत्वे। कौञ्जायनाः कुञ्जस्यापत्यानि। एवं ब्राध्नायनाः।

स्त्र्यत्र्यादेरेयण् ॥४८७॥

स्त्रियामादादिभ्योऽत्र्यादेश्च एयण् भवति अपत्येऽभिधेये। विनताया अपत्यं वैनतेयः। एवं सौपर्णेयः। कौन्तेयः। कौन्तेयः। अत्रेरपत्यं आत्रेयः आत्रेयौ। बहुत्वे। अग्निसंज्ञायामेत्वमयादेशश्च। अत्रयः भृग्वत्र्यङ्गिरेत्यादिना अपत्यप्रत्ययस्य लुक्। सत्यामग्निसंज्ञायां इरेदुरोर्ज्जसि। इत्येत्वं जसि। एवं सौभ्रेयः। गाङ्गेयः। भद्रबाहोरपत्यं।

कुञ्जस्यापत्यं है। कुञ्ज + ङस् विभक्ति का लोप,

अपत्य अर्थ में कुंजादि गण से 'आयनण्' प्रत्यय होता है ॥४८६॥

और उसके अंत में 'ण्य' प्रत्यय भी हो जाता है।

कुञ्ज + आयनण् पूर्व स्वर को वृद्धि होकर 'कौञ्जायन' बना। ण्य प्रत्यय होकर 'इवर्णावर्णयोर्लोपः' सूत्र से न के अ का लोप होकर लिंग संज्ञा, एवं सि विभक्ति आकर कौञ्जायन्यः बना द्विवचन में कौञ्जायन्यौ बना।

इसी प्रकार से ब्रध्नस्यापत्यं ब्राध्नायन्यः बना। स्त्रीलिंग में—ण्य प्रत्यय नहीं हुआ है एवं स्त्री वाचक 'ई' प्रत्यय हुआ है अतः 'कौञ्जायनी' बना। नडादि गण में 'ण्य' प्रत्यय न होकर केवल मात्र आयनण् प्रत्यय होकर नाडायनः बना।

चरस्यापत्यं चारायणः मुञ्जस्यापत्यं मौञ्जायनः शकटस्यापत्यं शाकटायनः। बहुवचन में कुञ्जस्यापत्यानि 'ण्य' प्रत्यय न होकर कौञ्जायनाः ब्राध्नायनाः बना।

विनतायाः अपत्यं है ?

स्त्रीलिंग वाचक अदादि से और अत्रि आदि से अपत्य अर्थ में 'एयण्' प्रत्यय हो जाता है ॥४८७॥

विनता + ङस्। एयण् प्रत्यय होने पर विभक्ति का लोप, णानुबंध, 'इवर्णावर्णयोर्लोपः' सूत्र से आ का लोप होकर पूर्व स्वर को वृद्धि हुई है अतः वैनतेय बना लिंग संज्ञा होकर विभक्ति आने से 'वैनतेयः' बना। ऐसे ही सुपर्णायाः अपत्यं—सौपर्णेयः कुन्त्याः अपत्यं कौन्तेयः, अत्रेःअपत्यं आत्रेयः आत्रेयौ बना। बहुवचन में ४८२वें सूत्र से अत्रि के अपत्य प्रत्यय का लुक् होकर 'अत्रि' रहा। अग्नि संज्ञा होकर "इरेदुरोर्ज्जसि" १६३वें सूत्र से अत्रे + जस् 'ए अय्' से संधि होकर 'अत्रयः' बना।

सुभ्रायाः अपत्यं सौभ्रेयः, गंगायाः अपत्यं गांगेयः सिंहिकायाः अपत्यं सैंहिकेयः।

भद्रबाहोः अपत्यं है।

एयेऽकद्रूवादिस्तु लुप्यते ॥४८८ ॥

एये प्रत्यये परे उवर्णो लुप्यते नतु कद्रूशब्दस्य। भाद्रबाहेयः। कामण्डलेयः। अकद्रूवा इति किम्। काद्रवेयः।

सर्वनाम्नः संज्ञाविषये स्त्रियां विहितत्वात् ॥४८९ ॥

सर्वनाम्नः परः संज्ञाविषये एयण् भवति अपत्येऽभिधेये। सर्वा काचित् स्त्री। सर्वाया अपत्यं सार्वेयः। इत्यादि।

इणतः ॥४९० ॥

अकारान्तान्नाम्न इण् प्रत्ययो भवति अपत्येऽभिधेये। दक्षस्यापत्यं दाक्षिः। एवं दाशरथिः। आर्जुनिः। दैवदत्तिः। अस्यापत्यं इः इत्यादि।

कद्रू को छोड़कर उकारांत शब्द से एयण् प्रत्यय के आने पर उ वर्ण का लोप हो जाता है ॥४८८ ॥

अतः भाद्रबाह् एय लिंग संज्ञा होकर विभक्ति आकर भाद्रबाहेयः बना ऐसे कमंडलोरपत्यं—कामण्डलेयः।

कद्रू को छोड़कर ऐसा क्यों कहा ? कद्रू के ऊको "उवर्णस्त्वोत्वमापाद्यः" सूत्र से ओ होकर एयण् प्रत्यय से काद्रवेयः बना।

सर्वा नाम की कोई स्त्री है अतः सर्वायाः अपत्यं है।

सर्वनाम से परे संज्ञा अर्थ में अपत्य वाचक एयण् प्रत्यय होता है ॥४८९ ॥

सर्वा + ङस् एयण् विभक्ति का लोप होकर 'वृद्धिरादौ सणे' सूत्र से वृद्धि होकर "इवर्णावर्णयोर्लोपः" से 'आ' का लोप होकर सार्वेय बना लिंग संज्ञा होकर विभक्ति के आने से सार्वेयः बना। इत्यादि।

दक्षस्यापत्यं है

अकारांत शब्द से अपत्य अर्थ में इण् प्रत्यय होता है ॥४९० ॥

अतः दक्ष + ङस् विभक्ति का लोप होकर, वृद्धि होकर अवर्ण का लोप होकर लिंग संज्ञा हुई और विभक्ति आकर दाक्षिः बना। इसी प्रकार से दशरथस्यापत्यं—दाशरथिः अर्जुनस्यापत्यं आर्जुनिः देवदत्तस्यापत्यं दैवदत्तिः।

'अ' के एकाक्षरी कोश में अनेक अर्थ होते हैं 'अ' के अरहंत, विष्णु आदि 'अ' का रूप पुरुषवत् चलते हैं।

जैसे—अः	औ	आः	आत्	आभ्याम्	एभ्यः
अम्	औ	आन्	अस्य	अयोः	आनाम्
एन	आभ्याम्	ऐः	ए	अयोः	एषु।
आय	आभ्याम्	एभ्यः			

अतः अस्य अपत्यं है। 'इणतः' ४९० से इण् प्रत्यय हुआ। 'वृद्धिरादौ सणे' से अ को वृद्धि होकर 'आ' हुआ। 'इवर्णावर्णयो' सूत्र से आ का लोप होकर 'इ' रहा लिंगसंज्ञा होकर सि विभक्ति आई 'इ' को अग्निसंज्ञा होकर मुनिवत् रूप चलेंगे। 'इः' बना। इत्यादि।

उपबाहोरपत्यं, भद्रबाहोरपत्यं है।

बाह्वादेश्च विधीयते ॥४९१ ॥

बाह्वादेर्गणादिण् प्रत्ययो भवति अपत्येऽभिधेये । उपबाहोरपत्यमौपबाहविः । भाद्रबाहविः ।

नस्तु क्वचित् ॥४९२ ॥

नस्य लोपो भवति क्वचित् लक्ष्यानुरोधात् ॥ उडुलोम्नोऽपत्यं औडुलोमिः । एवमाग्निशर्मिः ।

मनोः षण्ष्यौ ॥४९३ ॥

षष्ठ्यन्तान्मनुशब्दात्परौ षण्ष्यौ प्रत्ययौ भवतः अपत्यार्थे । मनोरपत्यं मानुषः । मनुष्यः । मानवः । वाणपत्ये इति अण् भवति ।

कुर्वादेर्यण् ॥४८५ ॥

कुर्वादेर्गणात् यण् प्रत्ययो भवति अपत्येऽर्थे । पक्षे कुरोरपत्यं कौरव्यः । वाणपत्ये इति अण् भवति । कौरवः । लहस्यापत्यं लाह्यः ।

क्षत्रादियः ॥४९४ ॥

षष्ठ्यन्तात् क्षत्रशब्दात्पर इयः प्रत्ययो भवति अपत्येर्थे । क्षत्रियः ।

बाहु आदि गण से अपत्य अर्थ में इण् प्रत्यय होता है ॥४९१ ॥

पूर्ववत् विभक्ति का लोप, वृद्धि 'उ' को ओ, ओ को अव् होकर औपबाहवि लिंग संज्ञा होकर विभक्ति आकर 'औपबाहविः' बना, वैसे ही भाद्रबाहविः बना ।

उडुलोम्नः अपत्यं, अग्निशर्मणः अपत्यं हैं । 'बाह्वादेश्च विधीयते' सूत्र से इण् प्रत्यय होकर पूर्ववत् सारे कार्य होंगे यथा—उडुलोमन् + ङस् विभक्ति का लोप, वृद्धि हुई ।

कहीं लक्ष्य के अनुरोध से नकार का लोप हो जाता है ॥४९२ ॥

इस सूत्र से नकार का लोप 'इवर्णा' इत्यादि से 'अ' का लोप होकर लिंग संज्ञा एवं विभक्ति आकर 'औडुलोमिः' बना । वैसे ही 'आग्निशर्मिः' बना ।

मनोरपत्यं है

षष्ठ्यंत मनु शब्द से परे अपत्य अर्थ में षण् और ष्य और अण् प्रत्यय होते हैं ॥४९३ ॥

मनु + ङस् षण णानुबंध से पूर्वस्वर को वृद्धि लिंग संज्ञा, विभक्ति आकर 'मानुषः' बना । 'ष्य' प्रत्यय से मनुष्यः । अण् प्रत्यय से मानवः बना ।

कुरु आदि गण से अपत्य अर्थ में यण् प्रत्यय होता है[1] ॥४८५ ॥

कुरोः अपत्यं—कुरु + ङस् यण् "वृद्धिरादौ सणे" ४७४वें सूत्र से वृद्धि होकर एवं उवर्ण को ओ, ओ को अव् होकर लिंग संज्ञा होकर विभक्ति आने से 'कौरव्यः' बना । 'वाणपत्ये' सूत्र ४७३वें से अणः प्रत्यय होकर पूर्ववत् सारी क्रियायें होकर 'कौरवः' बना ।

लहस्यापत्यं है यण् प्रत्यय से 'लाह्यः' बना ।

क्षत्रस्यापत्यं है ।

षष्ठ्यंत क्षत्र शब्द से परे अपत्य अर्थ में 'इय' प्रत्यय हो जाता है ॥४९४ ॥

"इवर्णावर्ण" इत्यादि से 'अ' का लोप होकर लिंग संज्ञा होकर विभक्ति आने से 'क्षत्रियः' बना ।

---

१. यह सूत्र पहले आ चुका है ।

कुलादीनः ॥४९५ ॥

कुलशब्दात्परः ईन प्रत्ययो भवति जातार्थे । कुले जातः कुलीनः । इत्यादि ।

रागान्नक्षत्रयोगाच्च समूहात्तस्य देवता ।
तद्वेत्त्यधीते तस्येदमेवमादेरणिष्यते ॥१ ॥

रागात् अण् । कुसुम्भेन रक्तं कौसुम्भं । एवं हारिद्रं वस्त्रं । कौंकुमं । मांजिष्ठं । काषायं । नक्षत्रयोगात् । पुष्येण चन्द्रयुक्तेन युक्तः कालः ।

पुष्यतिष्ययोर्नक्षत्रे ॥४९६ ॥

नक्षत्रार्थे वर्तमानयोः पुष्यतिष्ययोर्यकारस्य लोपो भवति अणि परे । इति यकारलोपः । मत्स्यस्य यस्य स्त्रीकारे ईये चागस्त्यसूर्ययोः ॥ इति सूत्राद्य इति अनुवर्तते । पौषः कालः । पौषी रात्रिः । पौषमहः । एवं तैषी मासः । तैषी रात्रिः । तैषमहः । चित्रया चन्द्रयुक्तया युक्तः कालः चैत्रः । वैशाखः । एवं ज्येष्ठः । आषाढः । श्रावणः । भाद्रपदः । आश्वयुजः । कार्तिकः । मार्गशिरः । माघः । फाल्गुनः । एवं सर्वत्र । समूहात् । युवतीनां समूहो यौवतं । एवं हास । काकं । क्षात्र । शौद्र । आर्षं । मार्गं । सास्य देवता । जिनो देवता अस्य इति जैनः । एवं शैवः । वैष्णवः । ब्राह्मणः । बौद्धः । कापिलः । सौरः । ऐन्द्रः । तद्वेत्ति । जिनं वेत्तीति जैन इत्यादि । छन्दो वेत्त्यधीते वा छान्दसः । व्याकरणं वेत्त्यधीते वा वैयाकरणः । भारतः । तस्येद ।

कुल शब्द से जात (जन्म) अर्थ में 'ईन' प्रत्यय होता है ॥४९५ ॥

अतः कुले जातः कुल में उत्पन्न हुआ 'कुलीनः' । यहाँ अकार का लोप हुआ है । इत्यादि ।

आगे अनेक अर्थों में अण् प्रत्यय होता है उसे श्लोक द्वारा प्रकट करते हैं ।

श्लोकार्थ—राग से, नक्षत्र के योग से, समूह अर्थ से, वह इसका देवता है इस अर्थ से, वह इसको जानता है पढ़ता है इस अर्थ से, यह उसका है इस अर्थ से, इस प्रकार आदि शब्द से और भी अर्थों से 'अण्' प्रत्यय माना गया है ॥१ ॥

राग—रंग अर्थ मे अण् के उदाहरण—

कुसुंभेन रक्तं वस्त्रं, कुसुंभ + टा अण् विभक्ति का लोप होकर पूर्व स्वर को वृद्धि होकर कौसुंभ 'अ' का लोप होकर लिंग संज्ञा होकर सि विभक्ति आने से 'कौसुंभं' बना, इसी प्रकार हरिद्रया रक्तं हारिद्रं, कुंकुमेन रक्तं—कौंकुमं, मंजिष्ठेन रक्तं मांजिष्ठं, कषायेन रक्तं काषायं बना ।

नक्षत्र के योग में अण् प्रत्यय होने से—

पुष्येण चन्द्रयुक्तेन युक्तः कालः ऐसा विग्रह हुआ है ।

पुष्य + टा अण् विभक्ति का लोप होकर वृद्धि होकर पौष्य अ है ।

अण् प्रत्यय के आने पर नक्षत्र अर्थ में वर्तमान पुष्य तिष्य के यकार का लोप हो जाता है ॥४९६ ॥

"मत्स्यस्य यस्य स्त्रीकारे ईये चागस्त्यसूर्ययोः"

यह सूत्र अनुवृत्ति मे चला आ रहा है ।

पौष्य के यकार का लोप होकर अण् का अकार मिल गया और लिंग संज्ञा होकर विभक्ति आकर 'पौषः' बना । स्त्रीलिंग में पौषी और नपुंसकलिंग में पौषं बनेगा । जैसे—

पौषः कालः, पौषी रात्रिः पौषम् अहः । इसी प्रकार से तिष्य को तैषः बन गया । तीनों लिंगों में ये रूप चलते हैं ।

मृगस्य इदं मांसं मार्गं । सौकरं । कौमारं । पुत्रस्येदं पौत्रं । दैवं । पौरुषं । यून इदं यौवन । **एवमादिर्यस्येति गणो गृह्यते ।** चक्षुषा गृह्यते चाक्षुषं रूपं । एवं श्रावणः शब्दः । रासनो रसः । स्पार्शनः स्पर्शः । दृषदि पिष्टा दार्षदाः सक्तवः । उलूखलेन क्षुण्णा औलूखलास्तण्डुलाः । अश्वैरुह्यते रथः आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटं । चतुर्दश्यां दृष्टश्चातुर्दशो राक्षसः । त्रिविद्य एव त्रैविद्यः । पटोर्भावः पाटवं । लाघवं । कौशलमित्यादि ।

तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि ।
पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ॥२ ॥

तेन दीव्यति तेन संसृष्टं तेन तरति तेन चरतीत्यर्थे पण्यात् शिल्पात् नियोगाच्च क्रीतादेरायुधादअपीतीकण् प्रत्ययो भवति । तेन दीव्यतीत्यत्र इकण् । अक्षैर्दीव्यति आक्षिकः । एवं गिरिणा दीव्यति गैरिकः । दाण्डिकः । तेन संसृष्टमित्यादि । दध्ना संसृष्टं दाधिकमौदनं । एवं क्षैरिकः । तात्रिकः । घार्तिकः । शाङ्गवैरिकः । सार्पिषिकः । लावणिकः । मारिचिकः । तेन तरतीत्यत्रापि । उडुपेन तरतीति औडुपिकः । एवं वाहित्रिकः । द्रोण्या तरतीति द्रौणिकः । गौपुच्छिकः । नावा तरतीति नाविकः ।

'चित्रयाचन्द्रयुक्तया युक्तः कालः' ऐसा विग्रह है ।

चित्रा + टा 'नक्षत्रयोगा' अण् पूर्व को वृद्धि आकार का लोप होकर लिंग संज्ञा होकर विभक्ति आकर 'चैत्रः' बना । ऐसे ही विशाखया चन्द्रयुक्तया युक्तः काल, वैशाखः । ज्येष्ठया चन्द्रयुक्तया युक्तः काल, ज्येष्ठः । आषाढया चन्द्रयुक्तया युक्तः कालः आषाढः । श्रवणेन चन्द्रयुक्तेन युक्तः कालः 'श्रावणः' । भाद्रपदया चन्द्रयुक्तया युक्तः कालः भाद्रपदः । अश्वयुजा चन्द्रयुक्तेन युक्त, कालः, आश्वयुजः । कार्तिकः, मार्गशिरः, माघः फाल्गुनः इत्यादि इसी प्रकार से सर्वत्र समझ लेना ।

समूह अर्थ में अण्—युवतीनां समूहो अण् प्रत्यय होकर युवति + आम् विभक्ति का लोप, पूर्व स्वर को वृद्धि, इकार का लोप, लिंग संज्ञा होकर सि विभक्ति आकर नपुंसक लिंग में 'यौवतं' बना । एवं हंसानां समूहः, हांसं, ऋषीणां समूहः आर्षं, मृगानां समूह मार्गं । इत्यादि ।

वह इसके देवता हैं इस अर्थ में अण् ।

जिनो देवता अस्य इति, जिन + सि विभक्ति का लोप होकर पूर्व स्वर को वृद्धि एवं अकार का लोप होकर लिंग विभक्ति आने से 'जैनः' बना । ऐसे ही शिवो देवता अस्य इति शैवः आदि बन गये ।

तद् वेत्ति उसको जानता है इस अर्थ में अण्—

जिनं वेत्ति इति जिन + अम् विभक्ति का लोप, पूर्व स्वर को दीर्घ अकार का लोप, लिंग संज्ञा होकर सि विभक्ति आकर 'जैनः' बना । छन्दो वेत्ति अधीते वा—छन्द को जानता है या पढ़ता है इस अर्थ में 'छांदसः' बना, व्याकरणं वेत्ति अधीते वा वैयाकरणः । यहाँ ५६४वें सूत्र से ऐ का आगम हुआ है ।

तस्येदं- उसका यह है इस अर्थ में अण् प्रत्यय होता है । मृगस्य इद मार्गं, सूकरस्य इदं मांस सौकर । पुत्रस्य इदं पौत्र, देवस्य इदं दैवं, पुरुषस्येदं पौरुषं । यूनः इदं यौवनं । आदि शब्द से अन्य और भी अर्थों में अण् प्रत्यय होता है जैसे चक्षुषा गृह्यते चक्षुष् + टा विभक्ति का लोप होकर वृद्धि होकर 'चाक्षुष' बना । ऐसे ही श्रवणाभ्यां श्रूयते श्रावणः शब्दः रसनया गृह्यते रासनः स्पर्शेन गृह्यते स्पार्शः । दृषदि पिष्टा दार्षदाः । पत्थर पर पीसा गया सत्तु, मसाला आदि । उलूखलेन क्षुण्णाः—उलूखल से कूटा गया, 'औलूखलाः' तण्डुलाः । अश्वैः ऊह्यते रथः आश्वः ।

चरतीत्यत्रापि। शिबिकया चरतीति शैबिकिकः, एवं आक्षिकः। औष्ट्रिकः। शृङ्गवेरेण चरतीति शार्ङ्गवैरिकः। पण्यात्। ताम्बूलं पण्यमस्य ताम्बूलिकः। एवमपिशब्दग्रहणात् यथाशिष्टप्रयोगं भवति। गन्धः पण्योऽस्येति गान्धिकः। एवं सार्पिषिकः। वास्त्रिकः। राजतिकः। लौहितिकः। शिल्पात्। मृदङ्गं शिल्पमस्येति मार्दङ्गिकः। एवं पाणविकः। शाङ्खिकः। काहलिकः। वैणिकः। त्रैवलिकः। वांशिकः। तालिकः। नियोगात्। शुल्कं नियोगो यस्येति शौल्किकः। एवं भाण्डागारिकः। माहानसिकः। प्रातीहारिकः। क्रीतादेः। सहस्रेण क्रीतं साहस्रिकं। एवं शातिकं। लाक्षिकं। सुवर्णेन क्रीतं सौवर्णिकं। आदिशब्दात्। लक्षेण युक्तो लाक्षिकः। दैवेन प्रवृत्तो दैविकः। कार्षापणेन अर्हतीति कार्षापणिकः। आयुधादपि। चक्रमायुधमस्येति चाक्रिकः एवं कौन्तिकः। तौमरिकः। खाड्गिकः। क्रीतादेरित्यत्रादि

चतुर्दश्यां दृष्टः चातुर्दशः राक्षस आदि। त्रिविद्य एव तीन विद्याओं के पारंगत 'त्रैविद्यः' पटोर्भावः पाटवं, लघोर्भावः लाघवं कुशलस्य भावः कौशलं। इत्यादि।

आगे कुछ अर्थों में इकण् प्रत्यय होता है। उसे श्लोक के अर्थ से प्रकट करते हैं।

श्लोकार्थ—उससे खेलता है, उससे मिश्रित है, उससे तैरता है, उससे आचरण करता है, इन प्रकरणों से इकण् प्रत्यय होता है। आगे पण्य से, शिल्प अर्थ से, नियोग से, क्रीतादि से और आयुधादि से भी इकण् प्रत्यय होता है॥१॥ 'तेन दीव्यति' अर्थ में इकण् प्रत्यय होता है उसके उदाहरण—अक्षैर्दीव्यति—पाशों से खेलता है। अक्ष + भिस् इकण्।

विभक्ति का लोप होकर पूर्वस्वर को दीर्घ हुआ और अकार का लोप होकर 'आक्षिकः' बना। एवं गिरणा दीव्यति 'गैरिकः' दण्डेन दीव्यति दाण्डिकः बना।

तेन संसृष्टं-उससे मिश्रित अर्थ में इकण्—

दध्ना संसृष्टं। दधि + टा इकण् विभक्ति का लोप, स्वर को दीर्घ, इकार का लोप होकर दाधिकं बना। एवं क्षीरेण संसृष्टं क्षैरिकं तक्रेण संसृष्टं-ताक्रिकं, घृतेन संसृष्टं-घार्तिकं। इत्यादि।

'तेन तरति' उससे पार होता है इस अर्थ में इकण्—

उडुपेन तरति—उडुप + टा इकण् पूर्ववत् सारे कार्य होकर औडुपिकः छोटी नौका से पार होता है। वैसे ही द्रोण्या तरतीति द्रौणिकः।

तेन चरति—उससे आचरण करता है या चलता है इस अर्थ में इकण्। शिबिकया चरतीति शैबिकिकः। उष्ट्रेण चरतीति औष्ट्रिकः। पण्य अर्थ में इकण्—

तांबूलं पण्यं अस्य—तांबूल है व्यापार जिसका—तांबूलिकः। श्लोक में 'अपि' शब्द के ग्रहण से यथाशिष्ट प्रयोग करना चाहिये। वस्त्रं पण्यं अस्य इति वास्त्रिकः। रजतं पण्यं अस्य इति राजतिकः। इत्यादि।

शिल्प अर्थ में इकण्—

मृदंगं शिल्पं अस्य इति मार्दंगिकः बना मृदंगवादनं शिल्पं अस्य ऐसा विग्रह करना। नियोग (अधिकार) अर्थ में इकण्—

शुल्कं नियोगो अस्येति शौल्किकः। इत्यादि।

क्रीतादि अर्थ में इकण्—सहस्रेण क्रीतं, साहस्रिकं।

आदि शब्द से इकण्—लक्षेण युक्तो लाक्षिकः। दैवेन प्रवृत्तो दैविकः। इत्यादि।

ग्रहणात्तस्येति षष्ठ्यन्तान्नाम्नः परो वाप एतस्मिन्नर्थे इकण् प्रत्ययो भवति। प्रष्टस्य वापः प्राष्टिकं क्षेत्रं। वाप इति कोऽर्थः ? क्षेत्रं। कुम्भस्य वापः कौम्भिकमित्यादि।

नावस्तार्ये विषाद्वध्ये तुलया सम्मितेऽपि च तत्र साधौ यः ॥४९७॥

नावस्तृतीयान्तात्तार्येऽर्थे विषात्तृतीयान्ताद्वध्येऽर्थे तुलया तृतीयान्तात्सम्मितेऽर्थेऽपि च तत्रेति सप्तम्यन्तात्साधावर्थे यः प्रत्ययो भवति। नावा तार्यमिदं नाव्यं। विषेण वध्यो विष्यः। तुलया सम्मितं तुल्यं। कर्मणि साधुः कर्मण्यः। अपि चेति वचनाद् गिरिणा तुल्यो हस्ती गिरितुल्यः। तुल्यः सदृशः कुशलो योग्यो हितश्चेति साधुरुच्यते।

ईयस्तु हिते ॥४९८॥

हितार्थे ईयः प्रत्ययो भवति। वत्सेभ्यो हितो वत्सीयो गोधुक्। एवमश्वीयः। जनकेभ्यो हितो जनकीयः। जननीयः। त्वदीयः। मदीयः। युष्मदीयः। इदमीयः।

आयुध अर्थ में इकण्—

चक्र आयुधं अस्य इति चाक्रिकः। इत्यादि।

क्रीतादेः इस प्रकार से ग्रहण करने से षष्ठ्यंत नाम से परे वापः—बोना इस अर्थ में इकण् प्रत्यय हो जाता है। प्रष्टस्य वापः प्राष्टिकं क्षेत्रं। वापः शब्द का क्या अर्थ है ? 'खेत' जिसमें अनाज बोया जाता है। कुंभस्य वापः कौंभिकं इत्यादि—अर्थात् एक घड़े भर बीज बोया।

उपर्युक्त प्रकरण में सभी उदाहरण के शब्दों में हिन्दी में कुछ-कुछ ही उदाहरण दिये गये हैं सारे के सारे रूप मूल संस्कृत में देख लेना चाहिये।

नाव शब्द से तिरने अर्थ में, विष से वध्य अर्थ में, तुला से संमित अर्थ में, तत्र से साधु अर्थ में 'य' प्रत्यय होता है ॥४९७॥

तृतीयान्त नाव शब्द से तैरने अर्थ में, तृतीयान्त विष शब्द से वध्य अर्थ में, तृतीयान्त तुला शब्द से मापने अर्थ में, 'तत्र' इस सप्तम्यंत शब्द से साधु अर्थ में 'य' प्रत्यय होता है। नावा तार्यमिदं नौ + टा "तत्स्था लोप्या विभक्तयः" सूत्र से विभक्ति का लोप होकर 'औ' को आव् होकर 'नाव्य' बना "कृतद्धितसमासाश्च" सूत्र से लिंग होकर 'सि' विभक्ति में 'नाव्यं' बना। ऐसे ही विषेणवध्यः विष + टा विभक्ति का लोप, "इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च" सूत्र से अकार का लोप, लिंग संज्ञा होकर सि विभक्ति में 'विष्यः' बना, तुलयाः सम्मितः, तुला + टा विभक्ति का लोप, आकार का लोप, लिंग संज्ञा होकर 'तुल्यं' बना, कर्मणि साधु कर्मन् + ङि विभक्ति का लोप, नकार को णकार, लिंग संज्ञा होकर सि विभक्ति से 'कर्मण्यः' बना। सूत्र में 'अपि च' वचन है उससे और भी रूप बन जाते हैं। जैसे—गिरिणा तुल्या हस्ती 'गिरि + टा' तुल्य + सि विभक्ति का लोप, लिंग संज्ञा होकर विभक्ति आकर 'गिरितुल्यः' बना। यहाँ साधु शब्द से तुल्य, सदृश, कुशल, योग्य और हित शब्द लिये जाते हैं।

हित अर्थ में 'ईय' प्रत्यय होता है ॥४९८॥

वत्सेभ्यो हितः, वत्स + भ्यस्, विभक्ति का लोप होकर "इवर्णावर्णयोर्लोपः" इत्यादि सूत्र से अकार का लोप होकर लिंग संज्ञा हुई, पुनः सि विभक्ति में 'वत्सीयः' बना। वत्सीयः—गोधुक् = ग्वाला। ऐसे ही अश्वेभ्यो हितः = अश्वीयः, जनकेभ्यो हितः = जनकीयः, जननीभ्यो हितः = जननीयः, तुभ्यं हितः, मह्यं हितः, युष्मद् + भ्यस् अस्मद् + भ्यस्, विभक्तियों का लोप होकर "त्वमदोरेकत्वे" ....सूत्र से एकवचन में 'त्वत् मत्' आदेश होकर तीसरा अक्षर होकर त्वदीयः, मदीयः बना। बहुवचन में अस्मभ्यं हितः 'अस्मदीयः' युष्मभ्यं हितः 'युष्मदीयः' बना।

तत्र जातस्तत आगतो वा ॥४९९ ॥

इत्यादिषु च ईयः प्रत्ययो भवति । शालायां जातः शालीयः । शालाया आगतः शालीयः ।

यदुगवादिभ्यः ॥५०० ॥

उवर्णान्ताद्गवादिभ्यश्च हितार्थे यद्भवति । कृकवाकुभ्यो हितः कृकवाकव्यः । वधूभ्यो हितो वधव्यः । गोभ्यो हितो गव्यः । पटुभ्यो हितः पटव्यः । हविर्भ्यो हिता हविष्यास्तण्डुलाः । गवादय इति के । गो हविस् इष्टका बर्हिस् मेधा स्रज् स्रुच् इति । गवादिगणः ।

उपमाने वतिः ॥५०१ ॥

उपमानेऽर्थे वतिः प्रत्ययो भवति । राजेव वर्त्तते राजवत् । ब्राह्मणस्येव वृत्तमस्येति ब्राह्मणवत् । मथुरायामिव पाटलिपुत्रे प्रासादा मथुरावत् । देवमिव त्वां पश्यामि देववत् । इत्यादि । सर्वत्र द्रव्यगुणक्रियाभिः साम्यमुपमानमस्तीति वत्प्रत्ययेन भवितव्यं । द्रव्ये । देवदत्त इव धनवान् देवदत्तवत् । एवं कुबेरवत् । बलिवत् । गुणे । यतिरिव गुणवान् यतिवत् । जलमिव शैत्यं जलवत् । अग्निरिव औष्ण्यमग्निवत् । श्रीखण्ड इव सुरभिः श्रीखण्डवत् । क्रियायां । ब्राह्मण इव वर्त्तते ब्राह्मणवत् । एवं पिशाचवत् ।

तत्वौ भावे ॥५०२ ॥

वहाँ पैदा हुआ अथवा वहाँ से आया इत्यादि अर्थ में 'ईय' प्रत्यय होता है ॥४९९ ॥

शालायां जातः शाला + ङि, विभक्ति का लोप, अवर्ण का लोप, लिंग संज्ञा, पुनः विभक्ति आने से 'शालीयः' बना । शालाया आगतः, शाला + ङस्, विभक्ति का लोप होकर, अवर्ण का लोप हुआ और लिंग संज्ञा होकर विभक्ति आकर 'शालीयः' बना ।

उवर्णान्त और गवादि से हित अर्थ में 'यत्' प्रत्यय होता है ॥५०० ॥

कृकवाकुभ्यो हितः, कृकवाकु + भ्यस्, विभक्ति का लोप हुआ 'उवर्णस्त्वोत्वम्' इत्यादि से ठकार को 'ओ' होकर अव् होकर, लिंग संज्ञा होकर सि विभक्ति में 'कृकवाकव्यः' बना । वधूभ्यो हितः = वधव्यः, गोभ्यो हितः = गव्यः, पटुभ्यो हितः = पटव्यः । हविर्भ्यो हितः, हविस् + भ्यस् विभक्ति का लोप स् को ष् होकर बहुवचन में 'हविष्याः' बना इसका अर्थ है हवन करने योग्य तंदुल । गवादि से क्या-क्या लेना ? गो, हविस्, अष्टका, बर्हिस् मेधा, स्रज् और स्रुच् शब्द गवादि गण में लिये जाते हैं ।

उपमान अर्थ में 'वति' प्रत्यय होता है ॥५०१ ॥

राजा इव वर्तते, राजन् + सि विभक्ति का लोप होकर 'लिंगांतनकारस्य' से नकार का लोप हो गया पुनः 'राजवत्' बना । ब्राह्मणस्येव वृत्तमस्य—ब्राह्मण के समान है चारित्र इसका = 'ब्राह्मणवत्' बना । मथुरा में पाटलिपुत्र के समान भवन हैं अतः 'मथुरावत्' बना । देवमिव त्वां पश्यामि 'देववत्' इत्यादि । सभी जगह द्रव्य, गुण और क्रियाओं से समान उपमा रहती है जिसकी, उसमें 'वत्' प्रत्यय होना चाहिये । द्रव्य में—देवदत्त इव धनवान् = देवदत्तवत् । ऐसे ही कुबेरवत्, बलिवत् बना । गुण अर्थ में—यतिरिव गुणवान् = यतिवत्, जलमिव शैत्यं = जलवत्, अग्निवत् श्री खण्ड इव सुरभिः = श्रीखण्डवत् । क्रिया अर्थ में—ब्राह्मण इव वर्तते = ब्राह्मणवत् । पिशाच इव वर्तते = पिशाचवत् ।

भाव अर्थ में 'त' और 'त्व' प्रत्यय होते हैं ॥५०२ ॥

भावेऽभिधेये तल्वौ भवतः। शब्दस्य प्रवृत्तिनिमित्तं भावो भवति। तप्रत्ययस्य स्त्रियां वृत्तिः। त्वप्रत्ययस्य नपुंसके वृत्तिः। पटस्य भावः पटता पटत्वं। एवं अश्वता अश्वत्वं। गोता गोत्वं। इति द्रव्यभावः। शुक्लता शुक्लत्वं। रूपता रूपत्वं। रसता रसत्वं। ज्ञानता ज्ञानत्वं। सुखता सुखत्वं इति गुणभावः। उत्क्षेपणता उत्क्षेपणत्वं। गमनता गमनत्वं। इति क्रियाभावः।

यण् च प्रकीर्तितः ॥५०३॥

भावेऽभिधेये यण् प्रकीर्तिततस्तल्वौ च। जडस्य भावो जाड्यं जडता जडत्वं। एवं ब्राह्मण्यं ब्राह्मणता ब्राह्मणत्वं।

अघुट्स्वरवत्तद्धिते ये ॥५०४॥

तद्धिते ये परे अघुट्स्वरवत्कार्यं भवति। अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वमित्युक्तं। विदुषां भावो वैदुष्यं। प्रकीर्तितग्रहणाधिक्यादन्यस्मिन्नर्थेऽपि यण् प्रकीर्तितस्तल्वौ च भवतः। ब्राह्मणस्य कर्म ब्राह्मण्यं ब्राह्मणता ब्राह्मणत्वं। पुनःपुनर्भावः पौनःपुन्यं। क्वचिदुभयपदवृद्धिः। पौनः पौन्यं। सौभाग्यं। अणि च पदद्वये वृद्धौ आग्निमारुतं। कर्म। सौहार्दं।

शब्द की प्रवृत्ति के निमित्त भाव होता है। 'त' प्रत्यय स्त्रीलिंग में होता है एवं 'त्व' प्रत्यय नपुंसकलिंग में होता है। पटस्य भावः, पट + ङस्, विभक्ति का लोप होकर 'त' प्रत्यय हुआ। पुनः "स्त्रियामादा" — सूत्र से 'आ' प्रत्यय होकर लिंग संज्ञा हुई सि विभक्ति में 'पटता' बना। वैसे ही नपुंसक लिंग में 'पटत्वं' बना। ऐसे ही अश्वस्य भावः = अश्वता, अश्वत्वं। गोः भावः = गोता, गोत्वं। इन शब्दों में द्रव्य से भाव प्रत्यय हुआ है।

गुण से भाव प्रत्यय—शुक्लस्य भावः = शुक्लता, शुक्लत्वं।
रूपस्य भावः = रूपता, रूपत्वं। रसस्य भावः = रसता, रसत्वं।
ज्ञानस्य भावः = ज्ञानता, ज्ञानत्वं। सुखता सुखत्वं।
क्रिया से भाव प्रत्यय—उत्क्षेपणस्य भावः = उत्क्षेपणता, उत्क्षेपणत्वं।
गमनस्य भावः = गमनता, गमनत्वं। इत्यादि।

भाव अर्थ में 'यण्' प्रत्यय होता है ॥५०३॥

त और त्व भी होते हैं। जडस्य भावः, विभक्ति का लोप होकर ण् अनुबन्ध होने से वृद्धि हो गई एवं "इवर्णावर्ण" इत्यादि सूत्र से अवर्ण का लोप होकर, लिंग संज्ञा होकर विभक्ति आने से 'जाड्यं' बना, त, त्व, प्रत्यय से 'जडता, जडत्वं' बना। ऐसे ही ब्राह्मणस्य भावः = 'ब्राह्मण्यं, ब्राह्मणता, ब्राह्मणत्वं' बना। सुजनस्य भावः = सुजनता, सुजनत्वं, सौजन्यं। दक्षिणस्य भावः = दाक्षिण्यं, स्थिरस्य भावः = स्थैर्यं। गम्भीरस्य भावः = गांभीर्यं।

तद्धित का यण् प्रत्यय आने पर अघुट्स्वरवत् कार्य होता है ॥५०४॥

विदुषां भावः, विद्वन्स् + आम् विभक्ति का लोप होकर अघुट् स्वर आदि विभक्ति के आने पर वन्स् के 'व' शब्द को उकार हो गया, नकार का लोप हो गया। पूर्वस्वर की वृद्धि होकर लिंग संज्ञा होकर 'वैदुष्यं' बना। ५०३ सूत्र में 'प्रकीर्तित' शब्द अधिक है उससे अन्य अर्थ में भी यण् प्रत्यय होता है और 'त, त्व' प्रत्यय होता है। जैसे ब्राह्मणस्य कर्म = ब्राह्मण्यं, ब्राह्मणता, ब्राह्मणत्वं। पुनः पुनर्भावः = पौनः पुन्यं,

---

१. भवतः अस्मात् अभिधानप्रत्ययाविति भावः।

तदस्यास्तीति मन्वन्वीन् ॥५०५ ॥

तदिति प्रथमान्तादस्यास्तीत्येतस्मिन्नर्थे मन्तु वन्तु विन् इन् इत्येते प्रत्यया भवन्ति। गावोऽस्य सन्तीति गोमान्। आयुरस्यास्तीति आयुष्मान्। इतिशब्दस्य विवक्षार्थत्वात् अवर्णान्तात् अवर्णोपधात् मकारान्तात् मकारोपधात् धुडन्तात् अशिडन्तात् परो वन्त् प्रत्ययो भवति। अशिडन्तादित्युक्ते सति तद्वचनं सामान्यमेव। तत्र हकारो वर्जनीयः। अवर्णान्तात्—वृक्षाऽस्यास्तीति वृक्षवान्। शालास्यास्तीति शालावान्। इत्यादि। अवर्णोपधात्—तक्षास्यास्तीति तक्षवान्। कर्मास्यास्तीति कर्मवान्। क्वचिन्नकारलोपः। मकारान्तात्—इदमस्यास्तीति इदंवान्। किमस्यास्तीति किंवान्। इत्यादि। मकारोपधात्—लक्ष्मीरस्यास्तीति लक्ष्मीवान्। एवं धर्मवान्। इत्यादि। धुडन्तात्। विद्युदस्यास्तीति विद्युत्वान्। वर्गप्रथमा इत्यादिना तृतीये प्राप्ते सति। तसोर्न तृतीयो मत्वर्थे इत्यनेन सूत्रेण तृतीयत्वं न भवति। अशिडन्तादिति किं ? आयुरस्यास्तीति आयुष्मान्।

असन्तमायामेधास्रग्भ्यो वा विन् ॥५०६ ॥

एभ्यः परो विन् प्रत्ययो वा भवति। यशोऽस्यास्तीति यशस्वी। पक्षे वन्त् यशस्वान्। अत्र सकारस्य दकारो विसर्गश्च न भवति। तपोऽस्यास्तीति तपस्वी। तपस्वान्। एवं तेजस्वी तेजस्वान्। धुटां तृतीयः। धुटां तृतीयो भवति घोषवति सामान्ये। लृवर्णतवर्गलसा दन्त्या इति न्यायात् सकारस्य दकारे प्राप्ते सति—

'वह इसके है' इस अर्थ में मन्तु, वन्तु, विन्, इन् ये चार प्रत्यय होते हैं ॥५०५ ॥

गावः अस्य सन्ति इति—गायें इसके पास हैं। गो + जस् विभक्ति का लोप होकर 'गोमन्त्' बना लिंग संज्ञा होकर सि विभक्ति आई अतः 'गोमान्' बना। ऐसे ही आयुः अस्य अस्तीति = 'आयुष्मान्' बना। यहाँ सूत्र का 'इति' शब्द विवक्षित अर्थ को कहता है मतलब—अवर्णांत से परे, अवर्ण उपधा वालों से परे, मकारांत से परे, मकार उपधावाले से परे, धुट् अन्तवाले शब्दों से परे, अशिट् अन्त वाले से परे, 'वन्त्' प्रत्यय होता है। शिट् अन्त में न होवे ऐसा कहने से यहाँ सामान्य कथन समझना अतः हकार को छोड़ देना चाहिये।

अवर्णान्त—वृक्षो अस्यास्ति इति, वृक्ष + सि, वन्तु विभक्ति का लोप होकर 'उ' अनुबन्ध होकर वृक्षवन्त् बना, लिंग संज्ञा होकर विभक्ति आने से 'वृक्षवान्' शब्द बना। ऐसे ही शाला अस्य अस्तीति = शालावान् इत्यादि।

अवर्ण उपधा से—तक्षा अस्यास्ति इति, तक्षन् + सि, वन्तु विभक्ति का लोप, नकार का लोप होकर पूर्ववत् 'तक्षवान्' बना। कर्म अस्यास्ति इति कर्मन् + सि वन्तु = कर्मवान्।

मकारान्त—इदं अस्यास्तीति = इदंवान्, किमस्यास्तीति = किंवान्। मकारोपधा से—लक्ष्मी + सि, वन्तु = लक्ष्मीवान्, धर्मोस्यास्तीति धर्मवान् इत्यादि।

धुट् अन्त वाले शब्दों से—विद्युत् अस्यास्तीति = विद्युत्वान् यहाँ "वर्ग प्रथमाः पदान्ताः स्वर घोषवत्सु तृतीयात्" इस ६८वें सूत्र से तकार को तृतीय अक्षर दकार प्राप्त था किन्तु "तसो र्न तृतीयो मत्वर्थे" इस ५०७वें सूत्र से तृतीय अक्षर नहीं हुआ। वृत्ति में 'शिट् अन्त में न हो' ऐसा क्यों कहा ? तो जैसे आयुरस्यास्ति इति आयुष्मान् आयुष शब्द षकारान्त होने से वन्तु प्रत्यय न होकर मन्तु प्रत्यय हुआ है।

असन्त् माया, मेधा और स्रज् शब्दों से 'विन्' प्रत्यय विकल्प से होता है ॥५०६ ॥

अस् है अन्त में जिसके ऐसे शब्दों से और उपर्युक्त शब्दों से विन् एवं वन्तु प्रत्यय होते हैं। यशो अस्यास्तीति, यशस् + सि विन्, विभक्ति का लोप होकर यशस्विन् बना। लिंग संज्ञा होकर सि विभक्ति में 'यशस्वी' बना। पक्ष में वन्तु प्रत्यय से यशस्वान् बना। यहाँ सकार को दकार एवं विसर्ग नहीं होता है। ऐसे ही 'तेजो अस्य अस्तीति' तेजस्वान्, तेजस्वी, "धुटां तृतीयः" इस २७५वें सूत्र से धुट् सकार को घोषवान् सामान्य के आने पर तृतीय अक्षर होता है, पुनः "लृवर्णतवर्गलसा दन्त्याः" इस न्याय से सकार को दकार प्राप्त होने पर—

तसोर्न तृतीयो मत्वर्थे ॥५०७॥

तकारसकारयोस्तृतीयो मत्वर्थे न भवति। मत्वर्थे इति कोऽर्थः ? अस्त्यर्थे। पश्चात् रेफसोर्विसर्जनीये प्राप्ते सकृद् बाधितो विधिर्बाधित एव सत्पुरुषवत्। मायास्यास्तीति मायावी मायावान्। मेधास्यास्तीति मेधावी मेधावान्। स्रगस्वास्तीति स्रग्वी स्रग्वान्। व्यञ्जनान्तस्य यत्सुभारिति न्यायात् चवर्गदृगादीनां चेति गत्वमनेन न्यायेन अघोषे प्रथमः। वर्गप्रथमास्तृतीयान्। बहुलमिन् भवति। ज्ञानमस्यास्तीति ज्ञानी। दण्डोऽस्यास्तीति दण्डी। शिखास्यास्तीति शिखी। देवोऽस्यास्तीति देवी। इत्यादि।

तदस्य संजातं तारकादेरितच् ॥५०८॥

तदिति प्रथमान्तादस्य संजातमित्यस्मिन्नर्थे तारकादेराकृतिगणात् पर इतच् प्रत्ययो भवति। तारका संजाता अस्येति तारकितं नभः। एवं कण्टकितः करः। पल्लवितो वृक्षः।

संख्यायाः पूरणे डमौ ॥५०९॥

संख्यायाः पूरणेऽर्थे डमौ भवतः। एकादशपर्यन्तं संख्या। ततः परमसंख्या॥ संख्यादेर्नान्ताया मो भवति। शेषायाश्च डो भवति। तत्कथं ? वाशब्दात्। वाशब्दः क्वास्ते ? वाणपत्ये इत्यत्र।

मत्वर्थ में तकार और सकार को तृतीयाक्षर नहीं होता है ॥५०७॥

इस सूत्र से सकार को तृतीय अक्षर नहीं हुआ पुनः "रेफसोर्विसर्जनीयः" इस १३०वें सूत्र से सकार को विसर्ग प्राप्त था किन्तु "सकृद् बाधितो विधिर्बाधित एव" जिसकी विधि एक बार बाधित कर दी जाती है वह बाधित ही रहता है पुनः उसमें दूसरी विधि भी बाधित ही रहती है जैसे सत्पुरुष का वचन एक होता है। अतः तेजस्वान् रहा है।

मत्वर्थ शब्द से क्या अर्थ लेना ? अस्ति का अर्थ लेना अर्थात् मत्वर्थ से कहे गये प्रत्यय अस्ति अर्थ के वाचक होते हैं।

माया अस्यास्तीति = मायावी, मायावान्। मेधावी, मेधावान्। स्रक् अस्यास्ति इति = स्रग्वी। स्रग्वान्।

"व्यंजनांतस्य यत्सुभोः" इस ४३०वें सूत्र के न्याय से और "चवर्ग दृगादीनां च" २५४वें सूत्र से स्रज् के ज् को गकार हो गया है।

'बहुलमिन् भवति' इस नियम के अनुसार ज्ञानम् अस्य अस्तीति ज्ञानिन्, लिंग संज्ञा होकर सि विभक्ति के आने से 'ज्ञानी' बना।

दण्डो अस्यास्ति इति = दण्डी, शिखा अस्यास्तीति = शिखी।

देवो अस्यास्तीति, देविन् = देवी। इत्यादि।

'वह इसके हुआ' इस अर्थ में तारकादि शब्दों से 'इतच्' प्रत्यय होता है ॥५०८॥

'तत्' इस प्रथमान्त से 'इसके हुआ' इस अर्थ में तारका आदि आकृति गण से परे 'इतच्' प्रत्यय होता है। तारकाः संजाताः अस्य इति, तारका + जस्, विभक्ति का लोप होकर "इवर्णावर्णयोर्लोपः" इत्यादि सूत्र से आकार का लोप होकर लिंग संज्ञा होकर 'तारकितं' बना, इसका अर्थ है आकाश अर्थात् तारा उदित हो रहें जिसके ऐसा तारकित आकाश। ऐसे ही कण्टकाः संजाता अस्येति 'कण्टकितः' करः।

पल्लवाः संजाता अस्येति = पल्लवितः-वृक्षः।

संख्या के पूरण अर्थ में 'ड' और 'म' प्रत्यय होते हैं ॥५०९॥

एकादश पर्यंत संख्या कहलाती है इसके आगे असंख्या हो जाती है। संख्यादि नकारांत से 'म' प्रत्यय होता है और शेष संख्या से 'ड' प्रत्यय होता है। ऐसा क्यों ? 'वा' शब्द से ऐसा नियम है। 'वा' शब्द कहाँ है ? 'वाणपत्ये' ४७३वें सूत्र में 'वा' शब्द है उससे उपर्युक्त नियम समझ लेना चाहिये।

डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥५१० ॥

डानुबन्धे प्रत्यये परे अन्त्यस्वरादेर्लोपो भवति। एकादशानां पूरण एकादश एकादशी एकादशं। द्वादशः एवं। अत्र आत्वं निपातः। त्रयोदशः। अत्र त्रयस्तु निपातः। चतुर्दशः। पञ्चदशः। पञ्चमः। पंचमी। पञ्चमं। एवं सप्तमः। अष्टमः। नवमः। दशमः। इत्यादि।

द्वेस्तीयः ॥५११ ॥

द्वेस्तीयो भवति पूरणेऽर्थे। द्वयोः पूरणो द्वितीयः। द्वितीया। द्वितीयं।

त्रेस्तृ च ॥५१२ ॥

त्रेस्तीयो भवति तृआदेशश्च पूरणेऽर्थे। त्रयाणां पूरणस्तृतीयः। तृतीया। तृतीयं।

अन्तस्थो डे र्षोः ॥५१३ ॥

रेफषकारयोरन्तस्थो भवति डे परे। चतुर्णां पूरणश्चतुर्थः। चतुर्थी। चतुर्थं।

तवर्गस्य षटवर्गाट्टवर्गः ॥५१४ ॥

षकारटवर्गान्तात्परस्य तवर्गस्य टवर्गो भवति आन्तरतम्यात्। षण्णां पूरणः षष्ठः षष्ठी षष्ठं।

कतिपयात्कतेश्च ॥५१५ ॥

एकादशानां पूरणः, एकादशन् + आम् ड् अ। विभक्ति का लोप,

अनुबंध प्रत्यय के आने पर अन्त्यस्वरादि अवयव का लोप हो जाता है ॥५१० ॥

हन् धातु को छोड़कर अकार से परे 'हि' का लोप हो जाता है ॥४४ ॥

अकारात्परस्य हेर्लोपो भवति अहन्तेः। भव, भवतात्, भवताद् भवतं भवत। भवानि भवाव भवाम। भावे—भूयतां। कर्मणि—अनुभूयतां।

आदातामाथामादेरिः ॥ ४५ ॥

अकारात्परयोः आतां आथां। इत्येतयोरादिरिर्भवति। अनुभूयेतां। अनुभूयन्तां। अनुभूयस्व अनुभूयेथां अनुभूयध्वं। अनुभूयै अनुभूयावहै अनुभूयामहै। एधतां एधेतां एधन्तां। एधस्व एधेथां एधध्वं। एधै एधावहै एधामहै। भावे—एध्यतां। कर्मणि—एध्यतां एध्येतां एध्यन्तां। पचतु पचतात् पचताद् पचतां पचन्तु। पचतां पचेतां पचन्तां। भावे—पच्यतां। कर्मणि—पच्यतां पच्येतां पच्यन्तां।

भूतकरणवत्यश्च ॥ ४६ ॥

भूतमतीतं करणं क्रिया यस्य तद्भूतकरणं साधनं तद्विद्यते यासां ता भूतकरणवत्यः। भूतकरणवत्यो ह्यस्तन्यद्यतनीक्रियातिपत्तयोऽतीते काले भवन्ति। ह्यो भवः कालो ह्यस्तनः तत्र ह्यस्तनी भवति।

अड् धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु ॥ ४७ ॥

भव, भवतात्।

भवतु भवतात्, भवतां, भवन्तु। भव, भवतात्। भवतं भवत। भवानि भवाव भवाम।

भाव में—भूयतां। कर्म में—अनुभूयतां। अनुभूय आतां है।

अकार से परे आतां, आथां की आदि को इकार हो जाता है ॥४५॥

अनुभूयेतां, अनुभूयन्तां।

अनुभूयतां अनुभूयेतां अनुभूयन्तां। अनुभूयस्व, अनुभूयेथां अनुभूयध्वं। अनुभूयै अनुभूयावहै अनुभूयामहै।

पंचमी—एधतां	एधेतां	एधन्तां	पचतु, पचतात्	पचतां	पचंतु
एधस्व	एधेथां	एधध्वं	पच, पचतात्	पचतं	पचत
एधै	एधावहै	एधामहै	पचानि	पचाव	पचाम।

भाव में—एध्यतां।

कर्म में—

आत्मने—पचतां	पचेतां	पचन्तां	पच्यतां	पच्येतां	पच्यन्तां
पचस्व	पचेथां	पचध्वं	पच्यस्व	पच्येथां	पच्यध्वं
पचै	पचावहै	पचामहै	पच्यै	पच्यावहै	पच्यामहै।

भाव में—पच्यतां।

भूतकरण वती ह्यस्तनी आदि विभक्तियाँ हैं ॥४६॥

अतीत काल की क्रिया है जिसमें उसे भूतकरण कहते हैं वह भूतकरण साधन जिनके पाया जाता है वे क्रियायें भूतकरणवती अर्थात् अतीत काल वाली कहलाती हैं। ह्यस्तनी, अद्यतनी और क्रियातिपत्ति ये विभक्तियाँ अतीत काल में होती है। ह्यः—बीता हुआ कल का काल 'ह्यस्तनः' कहलाता है उस अर्थ में 'ह्यस्तनी' विभक्ति होती है।

'भू' धातु से दि विभक्ति आई इकार का अनुबंध होकर अन् विकरण और गुण हुआ। 'भव् अ द्' रहा।

ह्यस्तनी, अद्यतनी, क्रियातिपत्ति के आने पर धातु की आदि में 'अट्', का आगम होता है ॥४७॥

धातोरादावडागमो भवति ह्यस्तन्यद्यतनीक्रियातिपत्तिषु परतः ।

पदान्ते धुटां प्रथमः ॥ २५ ॥*

पदान्ते वर्तमानानां धुटां अन्तरतमः प्रथमो भवति । अभवत् अभवतां अभवन् । अभवः अभवतं अभवत । अभवं अभवाव अभवाम । भावे—अभूयत । कर्मणि—अन्वभूयत अन्वभूयेतां अन्वभूयन्त । अड् धात्वादिसूत्रबाधनार्थमुत्तरयोगः ।

स्वरादीनां वृद्धिरादेः ॥४८ ॥

स्वरादीनां धातूनां आदिस्वरस्य वृद्धिर्भवति ह्यस्तन्यादिषु परतः । ऐधत ऐधेतां ऐधन्त । ऐधथा ऐधेथां ऐधध्वं । ऐधे ऐधावहि ऐधामहि । भावे—ऐध्यत । कर्मणि—ऐध्यत ऐध्येतां । ऐध्यन्त । अपचत् अपचतां अपचन् । अपचत अपचेतां अपचन्त । भावे—अपच्यत । कर्मणि—अपच्यत अपच्येतां अपच्यन्त ।

पद के अंत में धुट् को प्रथम अक्षर होता है ॥२५ ॥

'अभवत्' बन गया । सि विभक्ति के इकार का अनुबंध होकर अभवः बना । व, म के आने पर पूर्व स्वर को दीर्घ होकर अभवाव अभवाम बना । अन् के आने पर भी धुट् २६वें से अकार का लोप हुआ है ।

अभवत् अभवतां अभवन् । अभवः अभवतं अभवत । अभवम् अभवाव अभवाम । भाव अर्थ में—अभूयत ।

कर्म में—	अन्वभूयत	अन्वभूयेतां	अन्वभूयन्त
	अन्वभूयथाः	अन्वभूयेथां	अन्वभूयध्वं
	अन्वभूये	अन्वभूयावहि	अन्वभूयामहि

यहाँ अट् का आगम करने के बाद में यदि उपसर्ग का प्रयोग हो तो धातु के बाद में अट् का आगम होता है । इसको बाधित करने के लिये आगे का सूत्र कहते हैं ए ध् + अ त है ।

कहने का मतलब यह है कि यदि व्यञ्जन से धातु का आरम्भ तो अट् होता स्वर से वृद्धि हो उपसर्ग पूर्वक धातु का प्रयोग हो तो उपसर्ग के बाद धातु से पहले अट् हो ।

ह्यस्तनी आदि के आने पर स्वर है आदि में जिसके ऐसे धातु के आदि स्वर को वृद्धि हो जाती है ॥४८ ॥

भाव अर्थ में—ऐध्यत ।

अतः—	ऐधत	ऐधेतां	ऐधन्तां
	ऐधथाः	ऐधेथां	ऐधध्वं
	ऐधे	ऐधावहि	ऐधामहि ।

अपचत् अपचतां अपचन् । अपचः अपचतं अपचत । अपचम् अपचाव अपचाम ।

आ०—अपचत अपचेतां अपचन्त । अपचथाः अपचेथां अपचध्वं । अपचे अपचावहि अपचामहि ।

भाव में—अपच्यत । कर्म में—

	अपच्यत	अपच्येतां	अपच्यन्त
	अपच्यथाः	अपच्येथां	अपच्यध्वं
	अपच्ये	अपच्यावहि	अपच्यामहि

मास्मयोगे ह्यस्तनी च ॥ ४९ ॥

मास्मयोगे ह्यस्तन्यद्यतनी च भवति ।

न मामास्मयोगे ॥ ५० ॥

मायोगे मास्मयोगे च धातोरादावडागमो न भवति । मास्म भवत् मास्म भवतां मास्मभवन् ॥ मास्म एधत मास्म एधेतां मास्म एधन्त । मास्म पचत् मास्म पचतां मास्म पचन् ॥ मास्म पचत मास्म पचेतां मास्म पचन्त । भावे—मास्म भूयत । कर्मणि—मास्मानुभूयत मास्मानुभूयतां मास्मानुभूयन्त । श्रु श्रवणे ।

श्रुवः शृ च ॥ ५१ ॥

श्रुवो धातोर्नुप्रत्ययो भवति सार्वधातुके परे शृ आदेशश्च । शृणोति शृणुतः शृण्वन्ति । अन्विकरणः कर्त्तरीति निर्देशात् द्वित्वबहुत्वयोश्च परस्मै सप्तम्यां च हि वचने च गुणो न भवति । उत्तरत्र प्रदर्श्यते । शृणुयात् शृणुयातां शृणुयुः । शृणोतु । न णकारानुबन्धचेक्रीयितयेति श्रुवस्तातण्प्रत्यये गुणनिषेधः । शृणुतात् शृणुतां शृण्वन्तु ।

नोश्च विकरणादसंयोगात् ॥ ५२ ॥

मास्म के योग में ह्यस्तनी, अद्यतनी विभक्तियाँ होती हैं ॥४९ ॥

मा और मास्म के योग में धातु की आदि में अट् का आगम नहीं होता है ॥५० ॥

मास्म भवत्, मास्म भवतां, मास्म भवन् ।

मास्म एधत । मास्म पचत । भाव में—मास्म भूयत ।

कर्म में—मास्म अनुभूयत । इत्यादि ।

श्रु धातु सुनने अर्थ में है ।

श्रु धातु से 'नु' विकरण होता है सार्वधातुक के आने पर, एवं श्रु को 'शृ' आदेश होता है ॥५१ ॥

शृणोति	शृणुतः	शृण्वन्ति
शृणोषि	शृणुथः	शृणुथ
शृणोमि	शृणुवः	शृणुमः ।

"अन् विकरणः कर्तरि" इस निर्देश से द्विवचन और बहुवचन में परस्मैपद की सप्तमी में 'हि' विभक्ति गुण नहीं होती है यह बात आगे बतलायेंगे ।

यह श्रु धातु "स्वादि गण" की है अतः इसमें अन् विकरण न होकर 'नु' विकरण होता है ।

सप्तमी में—	शृणुयात्	शृणुयातां	शृणुयुः
	शृणुयाः	शृणुयातं	शृणुयात
	शृणुयाम्	शृणुयाव	शृणुयाम

पञ्चमी में—"णकारानुबंध चेक्रीयतयोः" इस सूत्र से श्रु धातु से तातण् प्रत्यय होने पर गुण का निषेध हो गया है । अतः शृणुतात् बना । शृणु हि है ।

असंयोग से पूर्व नु विकरण से परे 'हि' का लोप हो जाता है ॥५२ ॥

असंयोगात् पूर्वान्नुविकरणात् परस्य हेर्लोपो भवति। शृणु शृणुतात् शृणुतं शृणुत। शृणवानि शृणवाव शृणवाम। अशृणोत् अशृणुतां अशृण्वन्। कर्मणि—

नाम्यन्तानां यणादियियेत्राशीश्चिव्वेक्रीयितेषु ये दीर्घः ॥ ५३ ॥

नाम्यन्तानां धातूनां दीर्घो भवति यणादिषु य च्वौ च परे। श्रूयेत श्रूयते। श्रूयतां। अश्रूयत। इत्यादि। षिधु गत्यां। षिधू शास्त्रे माङ्गल्ये च।

धात्वादेः षः सः ॥ ५४ ॥

धात्वादेः षस्य सो भवति। सेधति। स्थासेनयसेधतिसिवसञ्ज्वङ्गजां अडभ्यासान्तरश्चेति सस्य षत्वं। प्रतिषेधति। तत्र सेधतेर्गताविति वचनाद्गतौ न षत्वं। परिसेधति। सेधतः। सेधन्ति। सेधेत्। सेधतु। असेधत्। णीङ् प्रापणे।

णो नः ॥ ५५ ॥

धात्वादेर्णस्य नो भवति। नयति नयतः नयन्ति नयते नयेते नयन्ते। नयेत्। नयेत। नयतु। नयतां। अनयत्। अनयत। भावे—नीयते। कर्मण्येवं। स्रंस् ध्वंस् अवस्रंसने। ध्वंस् गतौ च। मनोरनुस्वारो धुटि इति नकारस्यानुस्वारः। स्रंसते स्रंसेते स्रंसन्ते। ध्वंसते। ध्वंसेते।

पंचमी में—शृणोतु, शृणुतात् शृणुतां शृण्वन्तु।
शृणु शृणुतात् शृणुतं शृणुत
शृणवानि शृणवाव शृणवाम।

यण् आदि, य, च्वि प्रत्यय के आने पर नाम्यंत धातु को दीर्घ हो जाता है ॥५३॥

वर्तमाना—	श्रूयते	श्रूयेते	श्रूयन्ते	सप्तमी—	श्रूयेत	श्रूयेयातां	श्रूयेरन्
	श्रूयसे	श्रूयेथे	श्रूयध्वे		श्रूयेथाः	श्रूयेयाथां	श्रूयेध्वं
	श्रूये	श्रूयावहे	श्रूयामहे		श्रूयेय	श्रूयेवहि	श्रूयेमहि
पंचमी—	श्रूयतां	श्रूयेतां	श्रूयन्तां	ह्य—	अश्रूयत	अश्रूयेतां	अश्रूयन्त
	श्रूयस्व	श्रूयेथां	श्रूयध्वं		अश्रूयथाः	अश्रूयेथां	अश्रूयध्वम्
	श्रूयै	श्रूयावहै	श्रूयामहै		अश्रूये	अश्रूयावहि	अश्रूयामहि

षिधु धातु गति अर्थ में है। 'षिधू' शास्त्र और मंगल अर्थ में है।

धातु के आदि का षकार सकार हो जाता है ॥५४॥

सिध् है अन् विकरण और गुण होकर 'सेधति' बना। स्था, आस् सेधति, सिच् सञ्जि ष्वंजि इनमें अट् अभ्यासांतर (व्यवधान रहने पर भी) सकार को षकार हो जाता है। जैसे प्रतिषेधति।

धातु पाठ में गत्यां पढ़ा है इसलिये जहाँ गति से भिन्न अर्थ है वहाँ ष नहीं होता जैसे परिसेधति, बना।

सेधति, सेधतः सेधन्ति। सेधसि सेधथः सेधथ। सेधामि सेधावः सेधामः। सेधेत्। सेधतु। असेधत्।

णीङ् धातु ले जाने अर्थ में है।

धातु की आदि का णकार नकार हो जाता है ॥५५॥

यह धातु उभयपदी है अतः परस्मैपद आत्मने पद दोनों में रूप चलेंगे।

वर्त—नयति	नयतः	नयन्ति	नयते	नयेते	नयते
नयसि	नयथः	नयथ	नयसे	नयेथे	नयध्वे

अनिदनुबन्धानामगुणेऽनुषङ्गलोपः ॥ ५६ ॥

इदनुबन्धवर्जितानां धातूनां अनुषङ्गलोपो भवति अगुणे प्रत्यये परे कर्मणि। स्रस्यते स्रस्येते स्रस्यन्ते। एवं भ्रस्यते। ध्वस्यते। अत एव वर्जनादिदनुबन्धानां धातूनां गुणागुणेऽपि गुणागुणे प्रत्यये परे। ग्रथि वकि कौटिल्ये। शकि शङ्कायां। ग्रन्थते। वङ्क्ते। शङ्क्ते। ग्रन्थ्यते ग्रन्थ्येते। शङ्क्यते। शङ्क्येते शङ्क्यन्ते। वङ्क्यते। वङ्क्येते। वङ्क्यन्ते। टुनदि समृद्धौ। नन्दति नन्दतः नन्दन्ति। नन्द्यते। वदि अभिवादनस्तुत्योः। वन्दते वन्देते वन्दन्ते। कर्मणि—वन्द्यते। दंश दशने। षञ्ज स्वङ्गे। ष्वञ्ज परिष्वङ्गे। रञ्ज रागे।

दंशिषञ्जिष्वञ्जिरञ्जीनामनि ॥ ५७ ॥

एतेषामनि विकरणे परेऽनुषङ्गलोपो भवति। दशति। दशेत्। दशतु। अदशत्। भावे—दश्यते। सजति। सजेत्। सजतु। असजत्। सज्यते। परिष्वजते। रजति। रजेदित्यादि।

	नयामि	नयावः	नयामः	नये	नयावहे	नयामहे
सप्त—	नयेत्	नयेताम्	नयेयुः	नयेत	नयेयातां	नयेरन्
	नयेः	नयेतं	नयेत	नयेथाः	नयेयाथां	नयेध्वं
	नयेयम्	नयेव	नयेम	नयेय	नयेवहि	नयेमहि
पंच—	नयतु, नयतात्	नयतां	नयन्तु	नयतां	नयेतां	नयन्तां
	नय, नयतात्	नयतं	नयत	नयस्व	नयेथां	नयध्वं
	नयानि	नयाव	नयाम	नयै	नयावहै	नयामहै
ह्य—	अनयत्	अनयतां	अनयन्	अनयत	अनयेतां	अनयन्त
	अनयः	अनयतं	अनयत	अनयथाः	अनयेथां	अनयध्वं
	अनयम्	अनयाव	अनयाम	अनये	अनयावहि	अनयामहि

भाव में नीयते। कर्म में—नीयते। नीयेत। नीयतां। अनीयत। स्रन्स् भ्रन्स धातु नष्ट होने के अर्थ में है। ध्वन्स धातु गति अर्थ में है। "मनोरनुस्वारो धुटि" इस सूत्र से नकार को अनुस्वार हो गया। स्रंसते, भ्रंसते, ध्वंसते। ऐसे चारों विभक्तियों में चलेंगे।

इत् अनुबंध से रहित धातु के अनुषंग का लोप हो जाता है ॥५६॥

कर्मणि प्रयोग में गुण रहित प्रत्यय के आने पर अनुषंग का लोप होता है अतः स्रस्यते स्रस्येते स्रस्यंते। भ्रस्यते। ध्वस्यते। इसी नियम से वर्जित होने से गुणी अगुणी प्रत्यय के आने पर इत् अनुबन्ध वाले धातु को 'नु' का आगम होता है। 'ग्रथि, वकि' धातु कुटिलता अर्थ में है 'शकि' शंका अर्थ में है। इन तीनों धातुओं में इकार का अनुबंध है अतः नु का आगम होकर ग्रन्थते वङ्क्ते, शङ्क्ते। कर्मणि प्रयोग में—ग्रन्थ्यते, वङ्क्यते। शङ्क्यते। इनके पूरे रूप चारों में चलेंगे।

'टुनदि' धातु समृद्धि अर्थ में है टु और इकार का अनुबंध हुआ है। नु का आगम होकर नन्दति, नन्दतः नंदन्ति बना। कर्म में—नंद्यते। 'वदि' धातु अभिवादन और स्तुति अर्थ में है। वन्दते वन्देते वन्दन्ते। आदि। कर्म में—वंद्यते। दंश धातु काटने अर्थ में है। षञ्ज स्वंग अर्थ में है षञ्ज, आलिंगन अर्थ में है। रञ्ज धातु राग अर्थ में है।

अन् विकरण के आने पर दंश् षञ्ज् ष्वंज रञ्ज् धातु के अनुषंग का लोप हो जाता है ॥५७॥

अतः दशति, दशेत्, दशतु, अदशत् बनेंगे। भाव में—दश्यते। षंज्—सजति, सजेत् सजतु असजत्। सज्यते, परिष्वजते। रजति इत्यादि।

रञ्जेरिनि मृगरमणार्थे वा ॥ ५८ ॥

मृगरमणार्थे रञ्जेरनुषङ्गलोपो वा भवति इनि परे। रजति कश्चित्तमन्यः प्रयुङ्क्ते। धातोश्च हेतौ इति इन् भवति। रजयति। पक्षे रञ्जयति। ष्ठिवु क्षिवु निरसने। क्लमु ग्लानौ। चमु छमु जमु जिमु अदने।

ष्ठिवुक्लमाचामाञ्चामनि ॥ ५९ ॥

ष्ठिवु क्लम आचम् इत्येतेषामुपधाया दीर्घो भवति। परस्मैपदेऽनि परे। क्रियायोग प्रादय उपसर्गसंज्ञा भवन्ति। निष्ठीवति निष्ठीवतः निष्ठीवन्ति। क्लामति। भावे—क्लम्यते। आचामति। आचम्यते। आङिति किं ? चमति। विचमति। क्रमु पादविक्षेपे।

क्रमः परस्मै ॥ ६० ॥

क्रमो दीर्घो भवति परस्मैपदे अनि परे। क्रामति। परस्मै इति किं ?

प्रोपाभ्यामारम्भे ॥ ६१ ॥

लक्षणसूत्रे लक्षणं व्यभिचरन्त्याचार्याः। प्रोपाभ्यां परः क्रम् आरम्भेऽर्थे आत्मनेपदी भवति। प्रक्रमते। उपक्रमते। प्रक्रम्यते उपक्रम्यते। षुस्नुद्रुप्रुक्ष्वगम्लृसृपृ गतौ। इषु इच्छायां। यमु उपरमे।

मृग को रमण कराने अर्थ में प्रेरणार्थक इन् के आने पर रञ्ज् का विकल्प से अनुषंग लोप होता है ॥५८ ॥

मृगं रजति कश्चित् तम् अन्यः प्रयुंक्ते कोई मृग के साथ रमण करता है और उसको कोई प्रेरणा से रमण—क्रीडा कराता है ।

"धातोश्च हेतौ इन्" इस सूत्र से इन् प्रत्यय होता है रजि बना पुनः अन् विकरण और गुण होकर 'रजयति' बना। पक्षे—अनुषंग लोप न होने पर रञ्जयति बना।

'ष्ठिवु क्षिवु' धातु थूकने अर्थ में हैं। क्रमु धातु ग्लानि अर्थ में है। चमु छमु जमु जिमु धातु भोजन करने अर्थ में हैं।

परस्मैपद अन् के आने पर ष्ठिवु क्लम् आचम् धातु की उपधा को दीर्घ हो जाता है ॥५९ ॥

क्रिया के योग में प्रादि उपसर्ग संज्ञक हो जाते हैं। ष्ठी वति नि पूर्वक 'निष्ठीवति' बना। क्लम् से क्लामति आङ् उपसर्ग पूर्वक चम् आचामति बना। कर्मप्रयोग मे—क्लम्यते, आचम्यते। आङ् उपसर्ग पूर्वक चम् हो ऐसा क्यों कहा ? चमति विचमति में दीर्घ नहीं हुआ। क्रमु धातु पाद विक्षेपण करने अर्थ में है। क्रम् अ ति ।

परस्मैपद अन् के आने पर क्रम् को दीर्घ हो जाता है ॥६० ॥

क्रामति। परस्मैपद में ऐसा क्यों कहा ?

प्र, उप से परे क्रम् धातु आरंभ अर्थ में आत्मनेपदी हो जाता है ॥६१ ॥

आचार्य, लक्षण सूत्र में लक्षण को व्यभिचरित कर देते हैं। अतः प्र, उप से परे क्रम धातु आरंभ अर्थ में आत्मनेपदी हो जाता है। प्रक्रमते, उपक्रमते। कर्म में—प्रक्रम्यते उपक्रम्यते।

षु स्नु द्रु प्रु क्ष्वच्, गम्लृ, सृ पृ धातु गति अर्थ में हैं। इषु धातु इच्छा अर्थ में है। यमु धातु उपरम अर्थ में है।

गमिष्यमां छः ॥ ६२ ॥

गम इषु यम् एषामन्त्यस्य छो भवत्यनि परे। गच्छति। इच्छति। यच्छति। गम्यते। इष्यते। यम्यते। पा पाने।

पः पिबः ॥ ६३ ॥

पाधातोः पिबादेशो भवत्यनि परे। पिबति। दामागायतिपिबतिस्थास्यतिजहातीनामीकारो व्यञ्जनादौ चेत्याकारस्य ईकारः। पीयते। घ्रा गन्धोपादाने।

घ्रो जिघ्रः ॥ ६४ ॥

घ्राधातोर्जिघ्रादेशो भवत्यनि परे। जिघ्रति। घ्रायते। ध्मा शब्दाग्निसंयोगयोः।

ध्मो धमः ॥६५ ॥

ध्माधातोर्धमादेशो भवत्यनि परे। धमति। ध्मायते। स्था गतिनिवृत्तौ।

स्थस्तिष्ठः ॥६६ ॥

स्थाधातोस्तिष्ठादेशो भवत्यनि परे। तिष्ठति। स्थीयते। म्ना अभ्यासे।

म्नो मनः ॥६७ ॥

म्नाधातोर्मनादेशो भवत्यनि परे। मनति। म्नायते। दाण् दाने।

दाणो यच्छः ॥६८ ॥

दाण्धातोर्यच्छादेशो भवत्यनि परे। प्रयच्छति। प्रदीयते। दृशिर् प्रेक्षणे।

अन् के आने पर गम् इषु यम के अन्त को 'छ' आदेश हो जाता है ॥६२ ॥

ग छ् अ ति। छ को द्वित्व और प्रथम अक्षर होकर 'गच्छति' बना। इच्छति। यच्छति। कर्म में—गम्यते। इष्यते। यम्यते बना। चारों में रूप बनेंगे। पा धातु पीने अर्थ में है।

अन् विकरण के आने पर पा धातु को पिब् आदेश हो जाता है ॥६३ ॥

अ का अनुबंध होकर पिबति पिबतः पिबन्ति। कर्मणि प्रयोग में—पा यण् ते। दा, मा, गायति पिबति, स्थास्यति, जहाति इन धातु से व्यञ्जनादि विभक्ति प्रत्यय के आने पर आकार को ईकार हो जाता है। पीयते, मीयते, गीयते आदि बन जाते हैं।

घ्रा धातु सूंघने अर्थ में है। घ्रा अन् ति।

अन् के आने पर घ्रा को जिघ्र् आदेश हो जाता है ॥६४ ॥

जिघ्रति। घ्रायते। ध्मा धातु शब्द और अग्नि के संयोग में है।

अन् के आने पर ध्मा को धम् आदेश हो जाता है ॥६५ ॥

धमति। कर्म में—ध्मायते। स्था धातु ठहरने अर्थ में है।

स्था को तिष्ठ् आदेश हो जाता है ॥६६ ॥

अन् के आने पर। तिष्ठति। स्थीयते। म्ना धातु अभ्यास अर्थ में है। म्ना अ ति।

म्ना को मन् आदेश हो जाता है ॥६७ ॥

मनति। कर्म में—म्नायते। दाण् धातु देने अर्थ में है।

दाण् को यच्छ् आदेश होता है ॥६८ ॥

अन् के आने पर। यच्छति। प्रपूर्वक कर्म में—प्रदीयते। दृशिर् धातु देखने अर्थ में है।

दृशेः पश्यः ॥६९ ॥

दृशेर्धातोः पश्यादेशो भवत्यनि परे । पश्यति । दृश्यते । ऋ प्रापणे । ऋ सृ गतौ ।

अर्तेः ऋच्छः ॥७० ॥

अर्तेः ऋच्छादेशो भवत्यनि परे । ऋच्छति ।

गुणोर्तिसंयोगाद्योः ॥७१ ॥

अर्तेः संयोगादेश्च धातोर्गुणो भवति । यकारादौ प्रत्यये परे । अर्य्यते ।

सर्तेर्धावः ॥७२ ॥

सर्तेर्धावादेशो भवत्यनि परे । धावति । यणाशिषोर्य इति इकारागमः । स्रियते । ननु धावुगतावित्ययमपि धातुरस्ति । जवाभिधाने यथा स्यात् । तेन प्रियामनुसरति । शद्लृ शातने ।

शदेः शीयः ॥७३ ॥

शदेः शीयादेशो भवत्यनि परे ।

शदेरनि ॥७४ ॥

शदेरनि परे आत्मनेपदं भवति । यदि धातुः रुचादिर्भवत्यनि परे । शीयते शीयेते शीयन्ते । कर्मणि-शद्यते । पक्षे कश्चित्तमन्यः प्रयुङ्क्ते शादयति । षद्लृ विशरणगत्यवसादनेषु ।

सदेः सीदः ॥७५ ॥

अन् के आने पर दृश् को पश्य् होता है ॥६९ ॥

पश्यति । कर्म में—दृश्यते । ऋ धातु प्राप्त कराने अर्थ में है । ऋ सृ गति अर्थ में है ।

अन् के परे ऋ धातु को ऋच्छ् हो जाता है ॥७० ॥

ऋच्छति । ऋ य ते इस स्थिति में—

यकारादि प्रत्यय के आने पर ऋ और संयोगादि धातु को गुण हो जाता है ॥७१ ॥

ऋ को गुण होकर अर्-अर्यते य् को द्वित्व होकर अर्य्यते । सृ अ ति ।

अन् के आने पर सृ को धाव् हो जाता है ॥७२ ॥

धावति । कर्म में—सृ य ते । "यणाशिषोर्य" नियम से इकार का आगम हो गया । स्रियते बना । धावु गति अर्थ में है यह भी एक धातु है पुनः सृ को धावु आदेश क्यों किया ? यदि दौड़ने अर्थ में है तब तो धावु स्वतंत्र धातु है अन्यथा चलने अर्थ में सृ को धाव् आदेश होता है । सृ का रूप भी चलता है प्रियामनुसरति—प्रिया का अनुसरण करता है ।

शद्लृ धातु शातन अर्थ में है ।

अन् के आने पर शद् को शीय् आदेश होता है ॥७३ ॥

अन् के आने पर शद् को आत्मने पद हो जाता है ॥७४ ॥

अन् के आने पर शद् धातु रूचादि गण में हो जाती है । शीयते शीयेते । कर्म में—शद्यते । पक्ष में—शीयते तं कोऽपि प्रेरयति कोई अन्य उसको प्रेरित करता है । 'शादयति' बना ।

षद्लृ धातु विशरण, गति और अवसादन अर्थ में है ।

अन् के आने पर सद् को सीद् होता है ॥७५ ॥

सदेः सीदादेशो भवत्यनि परे। सीदति सीदतः सीदन्ति। इति भ्वादयः ॥

अथ अदादिगणः

अद् प्सा भक्षणे। पूर्ववत् वर्तमानादीनां।

अदादेर्लुग्विकरणस्य ॥७६॥

अदादेर्गणाद्विकरणस्य लुग्भवति।

अघोषेष्वशिटां प्रथमः ॥७७॥

अघोषेषु प्रत्ययेषु परे अशिटां धुटां प्रथमो भवति। अत्ति अत्तः अदन्ति। अत्सि अत्थः अत्थ। अद्मि अद्वः अद्मः। शीङ् स्वप्ने।

शीङः सार्वधातुके ॥७८॥

शीङो गुणो भवति सार्वधातुके परे। शेते शयाते।

आत्मने चानकारात् ॥७९॥

अनकाराच्चात्मनेपदे अन्तेर्नकारस्य लोपो भवति।

शेतेरिरन्तेरादिः ॥८०॥

शेतेः परस्य अन्तेरादिरिर्भवति। शेरते। शेषे शयाथे शेध्वे। शये शेवहे शेमहे। ब्रूञ् व्यक्तायां वाचि।

सीदति सीदतः सीदंति। इन सभी धातुओं के अनंतर सार्वधातुक वर्णों विभक्तियों में चलते हैं।
इस प्रकार से भ्वादि गण का प्रकरण समाप्त हुआ।

अब अदादि गण प्रारंभ होता है।

अद् प्सा, भक्षण अर्थ में है। पूर्ववत् वर्तमान आदि में चलते हैं।
अद् अ ति है।

अदादि गण से अन् विकरण का लुक् हो जाता है ॥७६॥

अघोष प्रत्ययों के आने पर अशिद् धुट् को प्रथम अक्षर होता है ॥७७॥

इसलिये अत्ति अत्तः। 'अद् अ अन्ति' विकरण का लुक् होकर अदन्ति बना।
अत्ति अत्तः अदन्ति। अत्सि अत्थः अत्थ। अद्मि अद्वः अद्मः। शीङ् धातु शयन करने अर्थ में है। डानुबंध धातु आत्मनेपदी होते हैं।

सार्वधातुक में शीङ् धातु को गुण होता है ॥७८॥

'शे अ ते' विकरण का लुक् होकर शेते।
शे + आते = शयाते।

आत्मनेपद में अन्ते के नकार का लोप हो जाता है ॥७९॥

शेते से परे अन्ते की आदि में रकार का आगम होता है ॥८०॥

शेरते। शेषे शयाथे शेध्वे।
शेते शयाते शेरते। शेषे शयाथे शेध्वे। शये शेवहे शेमहे।
ब्रूञ् धातु स्पष्ट बोलने अर्थ में है।

ब्रुव ईड्वचनादिः ॥८१॥

ब्रुव ईड् भवति वचनादिर्भूत्वा व्यञ्जनादौ गुणिनि सार्वधातुके परे। नाम्यन्तयोरिति गुणः। ब्रवीति।

द्वित्वबहुत्वयोश्च परस्मै ॥८२॥

सर्वेषां धातूनां विकरणानां च सार्वधातुके परस्मैपदे पञ्चम्युत्तमवर्जिते द्वित्वबहुत्वयोश्च गुणो न भवति। ब्रूतः।

स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ ॥८३॥

इवर्णउवर्णान्तस्य धातोरियुवौ भवतः स्वरादावगुणे। ब्रुवन्ति। ब्रवीषि ब्रूथः ब्रूथ। ब्रवीमि ब्रूवः ब्रूमः।

ब्रुवस्त्यादीनामडादयः पञ्च ॥८४॥

ब्रूधातोः परेषां त्यादिपञ्चकानामडादयः पञ्च भवन्ति। अट् अतुस् उस् थल् अथुस् इत्येते वक्तव्याः।

तत्सन्निधौ ब्रुव आहः ॥८५॥

तेषामडादीनां सन्निधौ ब्रूधातोराहादेशश्च भवति। आह आहतुः आहुः।

थल्याहेः ॥८६॥

थलि परे आहेरित्येतस्य हकारस्य धकारो भवति। आत्थ आहथुः।

सर्वेषामात्मनेसार्वधातुकेऽनुत्तमे पञ्चम्याः ॥८७॥

व्यञ्जनादि गुणी सार्वधातुक के परे ब्रू धातु से ईट् आगम होता है ॥८१॥

नाम्यंत को गुण होकर ब्रो ई अ ति। अन् विकरण का लुक् होकर संधि होकर 'ब्रवीति' बना।

द्विवचन, बहुवचन को परस्मै पद में गुण नहीं होता है ॥८२॥

सभी धातु को और विकरण को पञ्चमी के उत्तम पुरुष से वर्जित सार्वधातुक परस्मैपद में द्विवचन, बहुवचन को गुण नहीं होता है।

अतः 'ब्रूतः' बना।

स्वरादि वाली अगुणी विभक्ति के आने पर धातु के इवर्ण, उवर्ण को इय् उव् हो जाता है ॥८३॥

अतः 'ब्रुवन्ति' बना।

ब्रवीति ब्रूतः ब्रुवन्ति। ब्रवीषि ब्रूथः ब्रूथ। ब्रवीमि ब्रूवः ब्रूमः।

ब्रू धातु से परे ति आदि पाँच विभक्तियों में क्रम से अट् आदि पाँच आदेश होते हैं ॥८४॥

ति तस् अन्ति सि थस् इनको अट् अतुस् उस् थल् अथुस् ये पाँच आदेश होते हैं।

इन अट् आदि की सन्निधि होने पर ब्रू धातु को आह् आदेश होता है ॥८५॥

ब्रू को आह् एवं ति को 'अट्' आदेश होकर 'आह' बना है। ऐसे ही आह, आहतुः, आहुः।

थल् के आने पर आह् के हकार को धकार हो जाता है ॥८६॥

पुनः ध् को प्रथम अक्षर होकर 'आत्थ' आहथुः बना।

पंचमी के उत्तम पुरुष से वर्जित सार्वधातुक आत्मने पद के आने पर सभी धातु और विकरण को गुण नहीं होता है ॥८७॥

सर्वेषां धातूनां विकरणानां च सार्वधातुके आत्मनेपदे परे पञ्चम्युत्तमवर्जिते गुणो न भवति। ब्रूते ब्रुवाते ब्रुवते। ब्रूषे ब्रुवाथे ब्रूध्वे। ब्रुवे ब्रूवहे ब्रूमहे। अद्यात् अद्यातां अद्युः। अद्याः अद्यातं अद्यात। अद्यां अद्याव अद्याम। शयीत शयीयातां शयीरन्। शयीथाः शयीयाथां शयीध्वं। शयीय शयीवहि शयीमहि।

सप्तम्यां च ॥८८॥

सर्वेषां धातुविकरणानां गुणो न भवति सप्तम्यां च परस्मैपदे परे। ब्रूयात् ब्रूयातां ब्रूयुः। ब्रूयाः ब्रूयातं ब्रूयात। ब्रूयां ब्रूयाव ब्रूयाम। ब्रुवीत ब्रुवीयातां ब्रुवीरन्। ब्रुवीथाः ब्रुवीयाथां ब्रुवीध्वं। ब्रुवीय ब्रुवीवहि ब्रुवीमहि। अत्तु अत्तात् अत्तां अदन्तु।

हुधुड्भ्यां हेर्धिः ॥८९॥

हुधुड्भ्यां परस्य हेर्धिर्भवति। अद्धि अत्तात् अत्तं अत्त। अदानि अदाव अदाम। शेतां शयातां शेरतां। शेष्व शयाथां शेध्वं। शयै शयावहै शयामहै। ब्रवीतु ब्रूतात् ब्रूतां ब्रुवन्तु।

हौ च ॥९०॥

सर्वेषां धातूनां गुणो न भवति हौ च परे। ब्रूहि ब्रूतात् ब्रूतं ब्रूत। ब्रवाणि ब्रवाव ब्रवाम। ब्रूतां ब्रुवातां ब्रुवतां। ब्रूष्व ब्रुवाथां ब्रूध्वं। ब्रवै ब्रवावहै ब्रवामहै।

अदोदि ॥९१॥

अदः परयोर्दिस्योरादेरद् भवति।

अवर्णस्याकारः ॥९२॥

धातोरादेरवर्णस्याकारो भवति ह्यस्तन्यादिपरतः। आदत् आत्तां आदन्। आदः आत्तं आत्त। आदं आद्व आद्म। अशेत अशयातां अशेरत। अशेथाः अशयाथां अशेध्वं। अशयि अशेवहि अशेमहि।

अतः ब्रूते। ब्रू + आते हैं ८३वें सूत्र से ब्रुव् होकर ब्रुवाते ब्रुवते बना। बहुवचन में आत्मने पद में ७९वें सूत्र से नकार का लोप हुआ है।

ब्रूते, ब्रुवाते ब्रुवते। ब्रूषे ब्रुवाथे ब्रूध्वे। ब्रुवे ब्रूवहे ब्रूमहे।

अद् धातु सप्तमी में—अद्यात् शयीत।

सप्तमी के परस्मैपद में सभी धातुओं और विकरण को गुण नहीं होता है ॥८८॥

अतः ब्रूयात् ब्रूयातां ब्रूयुः। आत्मने पद में ब्रू को ब्रुव् होकर ब्रुवीत ब्रुवीयातां ब्रुवीरन्। अद् पंचमी में—अत्तु अत्तां अदन्तु।

हु और धुड् से परे हि को 'धि' हो जाता है ॥८९॥

अद् धि = अद्धि। 'ब्रू हि' है।

'हि' के आने पर सभी धातुओं को गुण नहीं होता है ॥९०॥

ब्रूहि। ब्रू आनि आव आम। पंचमी के उत्तम पुरुष में गुण होकर ब्रवाणि ब्रवाव ब्रवाम बन गये आत्मने पदे में भी ब्रू, ऐ आवहै आमहै। गुण होकर ब्रवै, ब्रवावहै ब्रवामहै।

अद् अ दि, 'अद् द्' रहा अन् का लुक् हो गया है।

अद् से परे दि और सि की आदि में अद् का आगम हो जाता है ॥९१॥

धातु के आदि के अवर्ण को आकार हो जाता है ॥९२॥

ह्यस्तनी, अद्यतनी, क्रियातिपत्ति विभक्ति के आने पर। अतः आदत् आत्तां आदन्। आदः आत्तं

अब्रवीत् अबूतां अबुवन्। अबवीः अबूतं अबूत। अबुवं अबूव अबूम। अबूत अबुवातां अबुवत। अबूथाः अबुवाथां अबूध्वं। अबुव अबूवहि अबूमहि। भावकर्मणोः। अद्यते अद्येते अद्यन्ते।

अयीर्ये ॥९३॥

शेतेः ईकारोऽय् भवति ये परे। शय्यते शय्येते। ञिष्वप् शये। धात्वादेः षः सः।

ब्रुवो वचिः ॥९४॥

ब्रुवो वचिर्भवति अगुणे सार्वधातुके परे।

स्वपिवचियजादीनां यण्परोक्षाशीःषु ॥९५॥

स्वपिवचियजादीनामन्तस्थायाः सम्प्रसारणं भवति यणूपरोक्षाशीःषु परतः। किं सम्प्रसारणं ?

सम्प्रसारणं य्वृतोन्तस्थानिमित्ताः ॥९६॥

अन्तस्थानिमित्ता इउऋऌः सम्प्रसारणसंज्ञा भवन्ति। सुप्यते सुप्येते सुप्यन्ते। यज देवपूजा-संगतिकरणदानेषु। इज्यते इज्येते इज्यन्ते। असु भुवि। अस्ति। उच्यते उच्येते उच्यन्ते।

आत्त। आदं आद्व आद्म। अशेत अशयातां अशेरत। अशेथाः अशयाथां, अशेध्वं। अशयि अशेवहि अशेमहि।

ब्रू धातु से दि और सि में सूत्र ८१ से ईट् का आगम और गुण होकर अब्रवीत्, अब्रवीः बना। स्वर वाली विभक्ति में ऊ को उव् हुआ है।

अब्रवीत् अबूतां अबुवन्। अब्रवीः अबूतं अबूत। अबूवम् अबूव अबूम। अबूत अबुवातां अबुवत। अबुथाः अबुवाथां अबूध्वं। अबुवे अबूवहि अबूमहि।

भाव कर्म में—अद्यते अद्येते अद्यन्ते। 'शीयते' है—

'य' प्रत्यय के आने पर शीङ् के ईकार को 'अय्' होता है ॥९३॥

शय्यते। शय्येत। शय्यतां। अशय्यत। बन गये।

ञिष्वप् धातु सोने अर्थ में है। "धात्वादेः षः सः" सूत्र ५४ से सकार होकर 'स्वप्' धातु है। 'ब्रू धातु से कर्म में' ब्रू य ते।

अगुण सार्वधातुक के आने पर ब्रू को वच् आदेश होता है ॥९४॥

यण् परीक्षा और आशी के आने पर स्वपि, वचि और यजादि के अंतस्थ को संप्रसारण हो जाता है ॥९५॥

संप्रसारण किसे कहते हैं ?

अंतस्थ निमित्त, इ, उ, ऋ को संप्रसारण संज्ञा है ॥९६॥

अर्थात् य् को इ व् को उ और र् को ऋ होना इसे संप्रसारण कहते हैं। संधि में इ को य् उ को व् ऋ को र् होता है, किंतु यहाँ व्यञ्जन को स्वर आदेश होता है।

अतः भाव में—स्वप् य ते है = सुप्यते बन गया।

यज् धातु देव पूजा, संगति करने, दान देने अर्थ में है। भावकर्म में—यज् य ते = इज्यते बना। ब्रू य ते को उच्यते बना। असु धातु होने अर्थ में है। अस् अति विकरण का लोप होकर अस्ति बना। अस् तस् है।

अस्तेरादेः ॥९७॥

अस्तेरादेर्लोपो भवति अगुणे सार्वधातुके परे। स्तः सन्ति।

अस्तेः सौ ॥९८॥

अस्तेरन्त्यस्य लोपो भवति सौ परे असि स्थः स्थ। अस्मि स्वः स्मः। स्यात् स्यातां। स्युः। स्याः स्यातं स्यात। स्याम् स्याव स्याम। अस्तु स्तात् स्तां सन्तु। एकदेशविकृतमनन्यवत्।

दास्त्योरेभ्यासलोपश्च ॥९९॥

दासंज्ञकस्य अस्तेरन्त्यस्य ए भवति अभ्यासलोपश्च हौ परे।

अस्तेः ॥१००॥

अस्तेः परस्य हेर्धिर्भवति।

स्थानिवदादेशः ॥१०१॥

यस्य स्थाने यो विधीयते स स्थानी इतर आदेशः। एधि स्तात् स्तं स्त। असानि असाव असाम।

अस्तेर्दिस्योः ॥१०२॥

अगुणी सार्वधातुक विभक्ति के आने पर अस् के आदि का लोप होता है ॥९७॥

'स्तः' बना। अस् अ अन्ति है विकरण का लोप, अस् के अकार का लोप होकर 'सन्ति' बना। अस् सि है।

सि के आने पर अस् के अन्त सकार का लोप हो जाता है ॥९८॥

असि स्थः स्थ। सप्तमी में अगुणी होने से अस् के आदि का ९७ सूत्र से लोप हो गया है। अतः 'स्यात्' बन गया।

अस्ति स्तः सन्ति। असि स्थः स्थ। अस्मि स्वः स्मः।

स्यात् स्यातां स्युः। स्याः स्यातं स्यात। स्याम् स्याव स्याम।

अस् हि है।

'हि' के आने पर दा संज्ञक और अस्ति अस् के अंत को 'ए' हो जाता है एवं अभ्यास का लोप हो जाता है ॥९९॥

यहाँ अस् के अकार का लोप होने से अस् कहाँ है ? एकदेश विकृत होने पर भी वह उसी नाम वाला रहता है। अतः स् को ए हो गया। तब 'ए हि' है।

अस्ति के परे हि को 'धि' हो जाता है ॥१००॥

'एधि' बन गया।

स्थानिवत् आदेश होता है ॥१०१॥

जिसके स्थान में जो किया जाता है वह स्थान इतर आदेश हो जाता है अर्थात् आदेश प्रथम को हटाकर आप आ जाता है। अस् आनि आव आम हैं। पञ्चमी का उत्तम पुरुष गुणी विभक्ति कहलाता है। अतः 'अस्तेरादेः' सूत्र ९७ से अकार का लोप नहीं हुआ। तब असानि असाव असाम बन गया।

अस्तु स्तात् स्तां सन्तु। एधि, स्तात् स्तं स्त। असानि असाव असाम।

अस् धातु से परे दि, सि को आदि में ईत् हो जाता है ॥१०२॥

अस्तेः परयोर्दिस्योरादिरीद्भवति ।

अस्तेः ॥१०३ ॥

अस्तेरवर्णस्याकारो भवति ह्यस्तन्यादिषु परतः । आसीत् आस्तां आसन् । आसीः आस्तं आस्त । आसम् आस्व आस्म ।

अस्तेर्भूरसार्वधातुके[1] ॥१०४ ॥

अस्तेर्भूरादेशो भवति असार्वधातुके परे । भूयते । रुदिर् अश्रुविमोचने ।

रुदादेः सार्वधातुके ॥१०५ ॥

रुदादेः परस्य सार्वधातुकस्य व्यञ्जनादेरयकारादेरादाविडागमो भवति ।

नामिनश्चोपधाया लघोः ॥१०६ ॥

सर्वेषां धातूनां उपधाभूतस्य पूर्वस्य लघोर्नामिनो गुणो भवति । रोदिति रुदितः रुदन्ति । रोदिषि रुदिथः रुदिथ । रोदिमि रुदिवः रुदिमः ।

रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा ।
जक्षितिश्चेति विज्ञेयो रुदादिः पञ्चको गणः ॥१ ॥

रुद्यात् रुद्यातां रुद्युः । रोदितु रुदितात् रुदितां रुदन्तु । हौ चेति गुणनिषेधः । रुदिहि रुदितात् रुदितं रुदित । रोदानि रोदाव रोदाम ।

रुदादिभ्यश्च ॥१०७ ॥

ह्यस्तनी आदि के आने पर अस्ति के आदि को आकार हो जाता है ॥१०३ ॥

अस् ई त् = आसीत् ।

आसीत् आस्तां आसन् । आसीः आस्तं आस्त । आसम् आस्व आस्म । अस् धातु से भाव में ते विभक्ति यण् आने पर 'अस् य ते' है ।

असार्वधातुक में अस् को भू आदेश हो जाता है ॥१०४ ॥

भूयते बना । रुदिर धातु रोने अर्थ में है । 'रूद् ति' है ।

सार्वधातुक में यकारादि रहित व्यञ्जन आदि वाली विभक्ति के आने पर रुदादि से 'इट्' का आगम हो जाता है ॥१०५ ॥

सभी धातु के नामि लघु उपधा को गुण हो जाता है ॥१०६ ॥

अतः रोद् इ ति = रोदिति रुदितः रुदन्ति बना ।

रोदिति रुदितः रुदन्ति । रोदिषि रुदिथः रुदिथ । रोदिमि रुदिवः रुदिमः ।

श्लोकार्थ—रोदिति, स्वपिति, स्वसिति, प्राणिति और जक्षिति ये पाँच धातुयें रुदादि पञ्चगण से कही जाती हैं ॥१ ॥

रुद्यात् । रोदितु । हि के आने पर 'हौ च' सूत्र ९० से गुण का निषेध होने से रुदिहि बना । रुद् दि रुद् सि है ।

रुद्रादि से परे दि, सि की आदि में 'इ' हो जाता है ॥१०७ ॥

---

१. अस्तेर्भूरगुणे सार्वधातुके

रुदादिभ्यश्च परयोर्दिस्योरादिरीद्भवति । अरोदीत् ।

स्रुदादेश्च ॥१०८ ॥

रुदादेश्च परयो र्दिस्योरादिरद्भवति । अरोदत् अरुदितां अरुदन् । अरोदीः अरोदः अरुदितं अरुदित । अरोदं अरुदिव अरुदिम । एवं पञ्चानाम् । ञिष्वप् शये । स्वपिति स्वपितः स्वपन्ति । स्वपिषि । स्वप्यात् स्वप्यातां स्वप्युः । स्वपितु स्वपितात् स्वपितां स्वपन्तु । अस्वपीत् । अस्वपत् अस्वपतां अस्वपन् । श्वस प्राणने । श्वसिति । श्वस्यात् । श्वसितु । अश्वसीत् । अश्वसत् । अनपि च । प्राणिति । प्राण्यात् । प्राणितु । अप्राणीत् । अप्राणत् । जक्ष भक्षहसनयोः ।

जक्षादिश्च ॥१०९ ॥

जक्षादीनामभ्यस्तसंज्ञा भवति । जक्षिति जक्षितः ।

लोपोऽभ्यस्तादन्तिनः ॥११० ॥

अभ्यस्तात्परस्य अन्तेर्नकारस्य लोपो भवति । जक्षति । जक्ष्यात् जक्ष्यातां जक्ष्युः । जक्षितु जक्षितात् जक्षितां जक्षतु । अजक्षीत् । अजक्षत् अजक्षतां । अनडस्सिजभ्यस्तविदादिभ्योऽभुवः । इत्यनेन उस् भवति । अजक्षुः । भावकर्मणोः । रुद्यते । सुप्यते । इत्यादि । षूङ् प्राणिगर्भविमोचने । सूते सुवाते सुवते । सुवीत सुवीयातां सुवीरन् । सूतां सुवातां सुवतां । सूष्व सुवाथां । सूध्वम् ॥

सूतेः पञ्चम्याम् ॥१११ ॥

सूतेः पञ्चम्युत्तमे च गुणो न भवति । सुवै सुवावहै सुवामहै । असूत असुवातां । सूयते । हन् हिंसागत्योः । हन्ति ।

ह्यस्तनी में अट् का आगम और गुण होकर अरोदीत्, अरोदीः बना । यह वैकल्पिक होता है अतः—

रुदादि से परे दि, सि की आदि में 'अत्' होता है ॥१०८ ॥

अतः अरोदत्, अरोदः बना । ऐसे ही पाँचों के रूप समझिये । ञिष्वप्—सोना । स्वपिति स्वपितः स्वपन्ति । इत्यादि ।

अस्वपीत्, अस्वपत् आदि । श्वस् धातु श्वास लेने अर्थ में है ।

श्वसिति । श्वस्यात् । श्वसितु । अश्वसीत् अश्वसत् ।

प्राणिति । प्राण्यात् । प्राणितु । अप्राणीत्, अप्राणत् । जक्ष् धातु खाने और हँसने अर्थ में है । जक्ष् इ ति = जक्षिति, जक्षितः । जक्ष् अन्ति ।

जक्षादि को अभ्यस्त संज्ञा हो जाती है ॥१०९ ॥

अभ्यस्त से परे अन्ति के नकार का लोप हो जाता है ॥११० ॥

अतः 'जक्षति' बना । सप्तमी में—जक्ष्यात् । पंचमी में—जक्षितु, जक्षितात् । जक्षितां । जक्षतु । ह्यस्तनी में—अजक्षीत्, अजक्षत् । जक्ष् अन् है सूत्र १६६वें से भू को छोड़ कर सिच् अभ्यस्त और विदादि से परे अन् को 'उस्' हो जाता है अतः 'अजक्षुः' बना । भावकर्म में—रुद्यते । सुप्यते । इत्यादि ।

षूङ् धातु जन्म लेने अर्थ में है । "धात्वादेः षः सः" सूत्र से 'स' हो गया । अनुबंध होने से यह धातु आत्मनेपदी है ।

सूते—सू आते ऊ को ८३वें सूत्र से उव् होकर सुवाते, 'सू अन्ते' है 'आत्मने चानकारत' ७९वें सूत्र से नकार का लोप होकर 'सुवते' बना । सुवीत, सुवीयातां सुवीरन् । सूतां, सुवातां, सुवतां ।

सू धातु को पञ्चमी के उत्तम पुरुष में गुण नहीं होता है ॥१११ ॥

अतः सुवै, सुवावहै सुवामहै । असूत । भाव में—सूयते । 'हन्' धातु हिंसा और गति अर्थ में है ।

धुटि हन्तेः सार्वधातुके ॥११२ ॥

हनेरन्तस्य लोपो भवति धुडादावगुणे सार्वधातुके परे । हतः ।

गमहनजनखनघसामुपधायाः स्वरादावनन्यगुणे ॥११३ ॥

गमादीनामुपधाया लोपो भवत्यनण्वर्जिते स्वरादावगुणे परे ।

लुप्तोपधस्य च ॥११४ ॥

लुप्तोपधस्य च हन्तेर्हस्य घिर्भवति । घ्नन्ति । हंसि हथः हथ । हन्मि हन्वः हन्मः । हन्यात् हन्यातां हन्युः । हन्तु हतात् हतां घ्नन्तु । पूर्वोक्तपरोक्तयोः परोक्तो विधिर्बलवान् इति न्यायात्—

हन्तेर्जो हौ ॥११५ ॥

हन्तेर्जकारादेशो भवति हौ परे । जहि हतात् हतं हत । हनानि हनाव हनाम ।

व्यञ्जनादिस्योः ॥११६ ॥

व्यञ्जनात्परयोर्दिस्योर्लोपो भवति । अहन् अहतां अघ्नन् । अहन् अहतं अहत । अहनं अहन्व अहन्म । चक्षङ् व्यक्तायां वाचि ।

स्कोः संयोगाद्योरन्ते च ॥११७ ॥

संयोगाद्योः सकारककारयोर्लोपो भवति धुट्यन्ते च ।

हन् ति है 'अन् विकरणः कर्तरि' से अन् होकर 'अदादेर्लुग्विकरणस्य' सूत्र ७६ से अन् का लुक् होकर 'हन्ति' बना । हन् तस् है ।

अगुण धुटादि सार्वधातुक के आने पर हन् के अंत नकार का लोप हो जाता है ॥११२ ॥

अतः 'हतः' बना । हन् अन्ति है ।

अन् अण् वर्जित स्वरादि अगुणी विभक्ति के आने पर गम् हन् जन खन घस की उपधा का लोप हो जाता है ॥११३ ॥

अतः हन् की उपधा का लोप होकर 'हन्' रहा । अर्थात् ह के अ का लोप हुआ ।

लुप्त उपधा वाले हन् के हकार को 'घ' हो जाता है ॥११४ ॥

अतः घ्न् + अन्ति = घ्नन्ति बना । हन् सि है 'मनोरनुस्वारो धुटि सूत्र से न' को अनुस्वार होकर 'हंसि' बना हथः हथ । हन्तु । हन् हि है 'पूर्वोक्त और परोक्त नियम में परोक्त विधि बलवान होती है' इस न्याय से—

'हि' के आने पर हन् को जकार हो जाता है ॥११५ ॥

और ज आदेश होने पर हि का लोप नहीं होता अतः जहि बना हतात् हतं हत । हन् दि । हन् सि ।

व्यंजन से परे दि और सि का लोप हो जाता है ॥११६ ॥

'अहन्' अहतां । हन् अन् है 'गमहन् इत्यादि' सूत्र ११३ से हन् की उपधा का लोप होकर ११४वें सूत्र से ह को घ होकर धातु के पूर्व अट् का आगम होकर 'अघ्नन्' बना । चक्षङ् धातु स्पष्ट बोलने अर्थ में है—चक्ष् है ।

संयोग की आदि में यदि सकार या ककार है और धुटि अंत में है तो उन सकार या ककार का लोप हो जाता है ॥११७ ॥

आ चक्ष्ट् ते आचष्ट् ते रहा ।

तवर्गस्य षटवर्गाट्टवर्गः ॥११८ ॥

तवर्गस्य षकारटवर्गाभ्यां परस्य टवर्गो भवत्यान्तरतम्यात्। आचष्टे आचक्षाते आचक्षते।

षढोः कः से ॥११९ ॥

षढोः को भवति सकारे परे। आचक्षे आचक्षाथे।

धुटां तृतीयश्चतुर्थेषु ॥१२० ॥

धुटां तृतीयो भवति चतुर्थेषु परतः। ऋवर्णटवर्गरषा मूर्द्धन्या इति न्यायात् षकारस्य डकारः। आचडढ्वे। आचक्षे आचक्ष्वहे। आचक्ष्महे। आचक्षीत आचक्षीयातां आचक्षीरन्। आचष्टां आचक्षातां आचक्षतां। आचक्ष्व आचक्षाथां आचड्ढ्वं। आचक्षै आचक्षावहै आचक्षामहै। आचष्ट आचक्षातां आचक्षत। आचष्ठाः आचक्षाथां आचड्ढ्वं। आचक्षि आचक्ष्वहि आचक्ष्महि।

चक्षङ् ख्याञ् ॥१२१ ॥

चक्षङ् इत्येतस्य ख्याञादेशो भवति असार्वधातुके परे। आख्यायते। ईश् ऐश्वर्ये।

छशोश्च ॥१२२ ॥

छशोश्च षो भवति धुट्यन्ते। ईष्टे ईशाते ईशते।

ईशः से ॥१२३ ॥

तवर्ग को षकार और टवर्ग से परे टवर्ग हो जाता है ॥११८ ॥

अतः क्रम से 'आचष्टे' बना। अन्ते में सूत्र ७९ से नकार का लोप होकर आचक्ष् + अते = आचक्षते बना। आचक् ष् से ककार का लोप करके आचष् से रहा।

सकार के आने पर ष और ढ को 'क' हो जाता है ॥११९ ॥

आचक् से 'नामिकरपरः' इत्यादि से क् से परे स् को ष होकर "कषयोगे क्षः" नियम से क्ष हो गया अतः 'आचक्षे' बना। आचक्ष् ध्वे है। आचक्ष् ध्वे है 'स्कोः संयोगाद्योरन्ते च' ११७ सूत्र से ककार का लोप होकर।

चतुर्थ अक्षर के आने पर धुट् को तृतीय अक्षर हो जाता है ॥१२० ॥

पुनः "ऋवर्णटवर्गरषामूर्द्धन्या" इस न्याय से षकार को "ड" हो गया। पुनः 'तवर्गस्य षटवर्गाट्टवर्गः' सूत्र ११८वें से टवर्ग से परे तवर्ग को टवर्ग होने से 'आचड्ढ्वे' बना।

सप्तमी में—आचक्षीत। पंचमी में—आचष्टां। ध्वं में 'आचड्ढ्वं' बना। ह्यस्तनी में पूर्व में अट् का आगम होकर आङ् उपसर्ग मिलाने से वही। आ + अचष्ट = आचष्ट बना। थास् में आचष्ठाः, ध्वं में आचड्ढ्वं बना।

भाव कर्म में—चक्ष् य ते है

चक्षङ् को ख्याञ् आदेश हो जाता है असार्वधातुक के आने पर ॥१२१ ॥

आख्यायते बना।

ईश् धातु ऐश्वर्य अर्थ में है।

ईश् ते है।

धुट् अंत में आने पर छ् और श् को 'ष्' हो जाता है ॥१२२ ॥

११८वें सूत्र से तवर्ग को टवर्ग होकर 'ईष्टे' बना।

ईश् से परे स आदि विभक्ति के आने पर इट् का आगम हो जाता है ॥१२३ ॥

ईशः परस्य सादेः सार्वधातुकस्यादाविट् भवति धुटि परे। ईशिषे ईशाथे ईड्ढ्वे। ईशे ईश्वहे ईश्महे। ईशीत ईशीयास्तां ईशीरन्। ईष्टां ईशातां ईशतां। ईशिष्व ईशाथां ईड्ढ्वं। ऐशि ऐश्वहि ऐश्महि। ईश्यते। शासु अनुशिष्टौ। शास्ति।

शासेरिदुपधाया अण्व्यञ्जनयोः ॥१२४॥

शासेरुपधायाः इद्भवति अण्व्यञ्जनयोः परतः।

शासिवासिघसीनां च ॥१२५॥

निमित्तात्परः शासिवसिघसीनां सः षत्वमापद्यते। शिष्टः शासति। शास्सि। शिष्यात् शिष्यातां शिष्युः। शास्तु शिष्टात् शिष्टां शासतु।

शा शास्तेश्च ॥१२६॥

शास्तेर्हौ परे शादेशो भवति चकारात्, हेर्धिर्भवति। शाधि, शिष्टात् शिष्टं शिष्ट। शासानि शासाव शासाम्।

सस्य ह्यस्तन्यां दौ तः ॥१२७॥

ह्यस्तन्यां दौ परे सस्य तो भवति। अशात् अशिष्टां अशासुः।

ईश के परे स आदि सार्वधातुक विभक्ति से धुट् के आने पर इट् का आगम हो जाता है।

पुनः नामि से परे सकार को ष होने से 'ईशिषे' बना।

'ईश् ध्वे है छशोश्च' से श् को ष् होकर 'धुटां तृतीयश्चतुर्थेषु' से तृतीय अक्षर 'ड' होकर पुनः 'तवर्गस्य षटवर्गाट्टवर्गः' सूत्र से तवर्ग को टवर्ग-ध् को ढ् होकर 'ईड्ढ्वे' बना।

सप्तमी में—ईशीत। पंचमी में—ईष्टां ईशातां ईशतां।

स्व के आने पर इट् होकर ईशिष्व 'ध्वं' में ईड्ढ्वं बना।

ह्यस्तनी में—ऐष्ट ऐशातां ऐशत, ऐष्ठाः ऐशाथां ऐड्ढ्वं ऐशि ऐश्वहि ऐश्महि।

भाव कर्म में—ईश्यते। शास् धातु अनुशासन अर्थ में है। शास् ति है। शास्ति। शास् तस् है।

अण्, अगुण व्यंजन वाली विभक्ति के आने पर शास् की उपधा को इत् होता है ॥१२४॥

अतः आ को 'इ' होकर शिस् तस् रहा।

निमित्त से परे शास् वस् घस् के स को 'ष्' हो जाता है ॥१२५॥

पुनः 'तवर्गस्य षट्वर्गाट्टवर्गः' नियम से ष् से परे तवर्ग को टवर्ग होकर 'शिष्टः' बना। शास् अन्ति। 'जक्षादिश्च' १०९ सूत्र से शास् को अभ्यस्त संज्ञा करके 'लोपोऽभ्यस्तादन्तिनः' ११० सूत्र से अन्ति के नकार का लोप हो गया। अतः 'शासति' बना। सप्तमी—सूत्र १२४ से इत् होकर 'शिष्यात्' बना। 'शास् हि'

'हि' के परे शास् को 'शा' आदेश एवं चकार से हि को धि होता है ॥१२६॥

शाधि। शास् दि है।

ह्यस्तनी की 'दि' विभक्ति के आने पर स् को त् हो जाता है ॥१२७॥

एवं 'व्यंजनादिस्योः' सूत्र ११६ से दि सि का लोप हो जाता है। अशात् अशिष्टां। अन् को उस् होकर अशासुः। शास् सि अट् का आगम होकर

सौ वा ॥१२८॥

सस्य तो भवति वा ह्यस्तन्यां सौ परे। अशात् अशाः अशिष्टं अशिष्ट। अशासं। अशिष्व। अशिष्म। शिष्यते। दीधीङ् दीप्तिदेवनयोः वेवीङ् वेतनातुल्ये। आदीधीते। य इवर्णस्यसंयोग-पूर्वस्यानेकाक्षरस्य इति यः। आदीध्याते आदीध्यते।

दीधीवेव्योरिवर्णयकारयोः ॥१२९॥

दीधीवेव्योरन्तस्य लोपो भवति इवर्णयकारयोः परतः। आदीधीत आदीध्यातां आदीधीरन्। आदीधीतां आदीध्यातां आदीध्यतां। आदीधीष्व आदीध्याथां आदीधीध्वं।

दीधीवेव्योश्च ॥१३०॥

अनयोः पञ्चम्युत्तमे च गुणो न भवति। आदीध्यै आदीध्यावहै आदीध्यामहै। आदीधीत आदीध्यातां आदीध्यत। आदीध्यते। वेवीते वेव्याते वेव्यते। वेवीत वेवीयातां वेवीरन्। वेवीतां वेव्यातां वेव्यतां। वेवीष्व वेव्याथां वेवीध्वं। वेव्यै वेव्यावहै वेव्यामहै। अवेवीत अवेव्यातां अवेव्यत। अवेवीथाः अवेव्याथां अवेवीढ्वं। अवेवि अवेवीवहि अवेवीमहि। वेव्यते। ईङ् स्तुतौ। ईट्टे ईडाते। ईडते।

ईड्जनोः ष्ध्वे च ॥१३१॥

ईड्जनोः ष्ध्वे च सार्वधातु के परे इड् भवति। ईडिषे ईडाथे ईडिध्वे। ईडे ईड्वहे ईड्महे। ईडीत ईडीयातां ईडीरन्। ईट्टां ईडातां ईडतां। ऐट्ट ऐडातां ऐडत। ईड्यते। इत्यादि। णु स्तुतौ।

ह्यस्तनी की सि के आने पर स् को त् विकल्प से होता है ॥१२८॥

अशात्। विसर्ग होकर 'अशाः' बना।

भाव कर्म में—शिष्यते। दीधीङ् धातु दीप्ति और क्रीडा अर्थ में है। वेवीङ् वेतन और अतुल्य अर्थ में है। आङ् पूर्वक दीधी धातु है। आदीधी ते = आदीधीते। आदीधी आते है "य इवर्ण स्यासंयोग पूर्वस्यानेकाक्षरस्य" १७०वें सूत्र से इवर्ण को य् होकर 'आदीध्याते' अन्ते में नकार का लोप होकर आदीध्यते बना। सप्तमी में—आदीधी ईत है।

इवर्ण और यकार के आने पर दीधी वेवी के अंत का लोप हो जाता है ॥१२९॥

आदीधीत, आदीधीयातां। पंचमी में—आदीधीतां आदीध्यातां, आदीध्यतां। पंचमी के उत्तम पुरुष में—

दीधी और वेवी के पंचमी के उत्तम पुरुष में गुण नहीं होता है ॥१३०॥

अतः आदीधी + ऐ = आदीध्यै, आदीध्यावहै। आदीध्यामहै।

ह्यस्तनी में—अदीधीत में आङ् उपसर्ग लगकर आदीधीत बना।

भावकर्म में—आदीध्यते॥

ऐसे ही 'वेवीते' वेव्याते वेव्यते। वेवीत। वेवीतां।

अवेवीत्। भावकर्म में—वेव्यते।

ईड् धातु स्तुति अर्थ में है। ईट् ते है 'तवर्गस्य षटवर्गाट्टवर्गः' सूत्र से टवर्ग होकर 'ईट्टे' बना। ईडाते, इडते। ईट् से, ईट् ध्वे।

से ध्वे सार्वधातुक के आने पर ईट् और जन् धातु से इट् का आगम हो जाता है ॥१३१॥

ईडिषे, ईडाथे, ईडिध्वे। ईडीत। ईट्टां। ऐट्ट ऐडातां। भाव कर्म में—ईड्यते। इत्यादि। णु धातु स्तुति अर्थ में है।

'णो नः' ५५वें सूत्र से धातु की आदि का णकार 'न' हो जाता है अतः 'नु ति' है।

उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके ॥१३२ ॥

धातोरुतो वृद्धिर्भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे। वृद्धिग्रहणाधिक्यादभ्यस्तस्य वृद्धिर्न भवतीत्यर्थः ॥ नौति नुतः नुवन्ति। नौषि नुथः नुथ। नौमि नुवः नुमः। नुयात् नुयातां नुयुः। नौतु नुतात् नुतां नुवन्तु। अनौत् अनुतां अनुवन्। नूयते। एवं षुञ् स्तुतौ। स्तौति स्तवीति स्तुतः स्तुवन्ति। स्तुते स्तुवाते स्तुवते। स्तूयते। ऊर्णुञ् आच्छादने।

ऊर्णोतेर्गुणः ॥१३३ ॥

ऊर्णोतेर्गुणो भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे। प्रोर्णोति। वृद्धिग्रहणाधिक्यात् अभ्यस्तस्य पृथक्करणाद्वा प्रोर्णौति प्रोर्णुतः प्रोर्णुवन्ति। प्रोर्णोषि प्रोर्णौषि प्रोर्णुथः प्रोर्णुथ। प्रोर्णोमि प्रोर्णौमि प्रोर्णुवः प्रोर्णुमः। प्रोर्णुते प्रोर्णुवाते प्रोर्णुवते। प्रोर्णुयात् प्रोर्णुयातां प्रोर्णुयुः। प्रोर्णुवीत। प्रोर्णोतु प्रोर्णौतु प्रोर्णुतां प्रोर्णुवन्तु। प्रोर्णुतां प्रोर्णुवातां प्रोर्णुवतां।

ह्यस्तन्यां च ॥१३४ ॥

ऊर्णुञ् इत्येतस्य ह्यस्तन्यां गुणो भवति व्यञ्जनादौ वचने परे। प्रौर्णोत् प्रौर्णुतां प्रौर्णुवन्। प्रोर्णुत प्रौर्णुवातां प्रौर्णुवत। प्रोर्णूयत इत्यादि। विद् ज्ञाने। वेत्ति वित्तः विदन्ति। विद्यात् विद्यातां विद्युः। वेत्तु वित्तात् वित्तां विदन्तु।

विद आम् कृञ् पञ्चम्यां वा ॥१३५ ॥

व्यंजनादि गुणी सार्वधातुक विभक्ति के आने पर धातु के उकार को वृद्धि हो जाती है ॥१३२ ॥

'सूत्र में वृद्धि शब्द को ग्रहण किया है इसका अर्थ है कि अभ्यस्त को वृद्धि नहीं होती है।' नौति, नुतः, नु अन्ति सूत्र ८३ से 'उ को उव् होकर नुवन्ति बना।' सप्तमी में—नुयात्। पंचमी में—नौतु, नुतात्। ह्य० में—अनौत्। भावकर्म में—नूयते। ऐसे ही 'स्तुञ्' धातु स्तुति अर्थ में है। वृद्धि होकर 'स्तौति' बना। एक बार 'बुव ईट् वचनादिः' ८१वें सूत्र से 'ईट्' एवं गुण होकर 'स्तवीति' बना 'स्तुतः' स्तुवन्ति। आत्मनेपद में—स्तुते स्तुवाते स्तुवते है। भावकर्म में—स्तूयते।

ऊर्णुञ् धातु आच्छादन करने अर्थ में है। ऊर्णु ति है।

ऊर्ण धातु को व्यंजनादि गुणी सार्वधातुक में गुण हो जाता है ॥१३३ ॥

यहाँ सूत्र पृथक् बनाने से 'वा' का ग्रहण हो जाता है अतः ऊपर सूत्र में 'वृद्धि' ग्रहण की अधिकता से या अभ्यस्त को पृथक् करने से विकल्प से वृद्धि भी हो जाती है। प्र उपसर्गपूर्वक प्रोर्णोति, वृद्धि पक्ष में— प्रोर्णोति, प्रोर्णुतः प्रोर्णुवन्ति। आत्मनेपद में—प्रोर्णुते, प्रोर्णुवाते। प्रोर्णुयात्। प्रोर्णुवीत। प्रोर्णोतु। प्रोर्णौतु। प्रोर्णुतां।

ह्यस्तनी में व्यंजनादि गुणी विभक्ति के आने पर ऊर्णु को नित्य ही गुण हो जाता है ॥१३४ ॥

प्रौर्णोत्। ऊ को ह्यस्तनी में 'स्वरादीनां वृद्धिरादेः' सूत्र ४८ से वृद्धि होकर ओर्णौत् बना पुनः 'प्र' उपसर्ग से 'प्रौर्णौत्' बना। प्रौर्णुत, प्रौर्णुवातां प्रौर्णुवत्। भावकर्म में—प्रोर्णूयते।

विद् धातु ज्ञान अर्थ में है। गुण होकर द् को प्रथम होकर वेत्ति, वित्तः, विदन्ति विद्यात्। वेत्तु, वित्तात्।

पंचमी में विद् से परे विकल्प से आम् होकर 'कृ' धातु का प्रयोग होता है ॥१३५ ॥

विदः पर आम् भवति ततः कृञ् प्रयुज्यते पञ्चम्यां । आमि विधेरेवेति गुणो न भवति । विदांकरोतु विदांकुरुतात् विदांकुरुतां विदांकुर्वन्तु । विदांकुरु । अवेत् अवित्तां अविदन् ।

विदादेर्वा ॥१३६ ॥

विद आदन्ताद् द्विषश्चान् उस् वा भवति ह्यस्तन्यां । अविदुः । विद्यते । एवं ह्यस्तन्यां । आदन्तात् । प्सा भक्षणे । अप्सात् अप्सातां । अप्सन् ।

आकारस्योसि ॥१३७ ॥

आकारस्य लोपो भवति उसि परे । अप्सुः । रा ला आदाने । अलात् अलातां अलान् अलुः । अरात् अरातां अरान् अरुः । द्विष् अप्रीतौ । अद्वेट् अद्विष्टां अद्विषन् अद्विषुः । भावकर्मणोः—रायते । लायते । प्सायते । द्विष्यते ।

समो गमृच्छप्रच्छिसृश्रुवेत्त्यर्त्तिदृशाम् ॥१३८ ॥

समः परेषामात्मनेपदं भवति । संवित्ते । संविदाते संविदते ।

वेत्तेर्वा ॥१३९ ॥

वेत्तेः परस्यांतेरिर्वा भवति । संविद्रते । संविदीत संविदीयातां संविदीरन् । संवित्तां संविदातां संविदतां संविद्रतां । समवित्त समविदातां समविद्रत समविदत ॥ इण् गतौ । एति इतः ।

इणश्च ॥१४० ॥

आम् के आने पर 'आमि विधेरेव' इससे गुण नहीं होता है । विदांकरोतु विदांकुरुतात्, विदांकुरुतां विदांकुर्वंतु । आम् कृ, नहीं होने पर वेत्तु वित्तां विदन्तु । अवेत् अवित्तां अविदन् ।

विद और आकारांत धातु और द्विष के परे विकल्प से अन् को उस् हो जाता है ॥१३६ ॥

अविदुः बना । भाव कर्म में—विद्यते । आकारांत धातु से—प्सा धातु खाने अर्थ में है । प्साति, प्सातः प्सान्ति । प्सायात् । प्सातु । अप्सात् अप्सातां अप्सा अन्, अप्सा, उस् ।

उस् के आने पर आकार का लोप हो जाता है ॥१३७ ॥

अप्सान्, अप्सुः । रा, ला धातु लेने अर्थ में है ।

लाति । लायात् । लातु, अलात् अलातां, अलान् अलुः ।

राति । रायात् । रातु । अरात् अरातां अरान्, अरुः ।

द्विष् अप्रीति अर्थ में है । द्वेष्टि द्विष्टः द्विषन्ति । द्विष्यात् द्वेष्टु । अद्वेट् अद्विष्टां अद्विषन्, अद्विषु ।

भावकर्म में—रायते । लायते । प्सायते । द्विष्यते ।

सम उपसर्ग से परे गम्, ऋच्छ, प्रच्छ, सृ श्रु, विद्, ऋ और दृश् धातु आत्मनेपदी हो जाते हैं ॥१३८ ॥

संवित्ते संविदाते संविदते ।

विद् के परे 'अन्ते' के आने पर विकल्प से 'इ' को 'इर्' हो जाता है ॥१३९ ॥

संविद्रते बना । संविदीत । संवित्तां, संविदातां, संविदतां संविदतां । समवित्त । इण् धातु गति अर्थ में है—एति इतः । इ अन्ति है ।

स्वरादि अगुण विभक्ति के आने पर इण् को य् हो जाता है ॥१४० ॥

इणश्च यो भवति स्वरादावगुणे। यन्ति। एषि इथः इथ। एमि इवः इमः। इयात् इयातां इयुः। एतु इतात् इतां यन्तु। इहि इतात् इतं इत। अयानि। अयाव अयाम। ऐत् ऐतां। परापि वृद्धिरिण्मात्राश्रितेन यत्नेन बाध्यते। सावकाशानवकाशयोरनवकाशो विधिर्बलवान्। इति न वृद्धिः। इणश्चेति यत्वं।

एतेर्ये ह्यस्तन्याम् ॥१४१॥

एतेर्ये परे अटोऽवर्णस्य दीर्घो भवति ह्यस्तन्यां। आयन्। ऐः ऐतं ऐत। आयं ऐव ऐम। दुह् प्रपूरणे।

दादेर्धः ॥१४२॥

दादेर्हस्य घो भवति धुट्यन्ते च।

घढधभेभ्यस्तथोर्धोऽधः ॥१४३॥

एभ्यः धात्वर्जितेभ्यः परयोस्तथोर्धो भवति। दोग्धि दुग्धः दुहन्ति।

तृतीयादेर्धढधभान्तस्य धातोरादेश्चतुर्थत्वं स्ध्वोः ॥१४४॥

घढधभान्तस्य धातोरादेस्तृतीयस्य चतुर्थत्वं भवति स्ध्वोः परतः। धोक्षि दुग्धः दुग्ध। दोह्मि दुह्वः दुह्मः। दुग्धे दुहाते दुहते। दुह्यात् दुह्यातां दुह्युः। दुहीत दुहीयातां दुहीरन्। दोग्धु दुग्धात्। दुग्धां दुहन्तु। हुधुड्भ्यां हेर्धिः। दुग्धि दुग्धात् दुग्धं दुग्ध। दोहानि दोहाव दोहाम। दुग्धां दुहातां दुहतां।

यन्ति। इयात्। एतु। इहि। इ आनि पंचमी के उत्तम पुरुष में गुण होकर 'ए अय्' सूत्र लगकर अयानि अयाव अयाम। ह्यस्तनी में—पूर्वस्वर को वृद्धि होकर ऐत ऐतां। इ अन् है। पर भी वृद्धि इण् मात्र के आश्रित यत्न से बाधित हो जाती है। अतः "इणश्च" इस सूत्र से इ को य् हुआ पुनः ह्यस्तनी में पूर्व में अट् का आगम करके—

इण् के य् के परे ह्यस्तनी में अट् के अवर्ण को दीर्घ हो जाता है ॥१४१॥

अतः 'आयन्' बना। ऐः ऐतं ऐत। आयं ऐव ऐम। अम् के आने पर 'इ' को १४० सूत्र से 'य्' करके अट् और दीर्घ करके 'आयम्' बना।

दुह् धातु प्रपूरण—दुहने अर्थ में है। दुह् ति है।

धुट् अंत में आने पर दा आदि के ह् को घ् हो जाता है ॥१४२॥

दुघ् ति रहा।

धात्र् से वर्जित घ, ढ, ध, भ, से परे त और थ को 'ध्' हो जाता है ॥१४३॥

गुण होकर "धुटांतृतीयश्चतुर्थेषु" सूत्र से घ् को ग् होकर 'दोग्धि' बना। दुग्धः दुहन्ति। दुह् सि दुह ध्वे। 'ददेर्धः' से हकार को घ होकर 'दुघ्' बना।

'स्' 'ध्व' विभक्ति के आने पर तृतीयादि वाले घ, ढ, ध, भान्त धातु की आदि के तृतीय अक्षर को चतुर्थ हो जाता है ॥१४४॥

धुघ् 'अघोषे प्रथमः' से 'धुक्' हो गया 'नामिकरपरः' से स् को ष् होकर गुण होकर 'धोक्षि' बना। दुग्धः, दुग्ध। दोह्मि दुह्वः दुह्मः। दुग्धे दुहाते, दुहते। धुक्षे दुहाथे धुग्ध्वे। दुह्यात्। दुहीत। दोग्धु। दुह् हि "हुधुड्भ्यां हेर्धिः" ८९वें सूत्र 'धि' होकर दुग्धि बना। दोहानि। दुग्धां।

दुह् दि है 'दादेर्धः' सूत्र से ह् को घ् "व्यंजनादिस्योः" ११६ सूत्र से दि सि का लोप हो गया।

---

१. अयम् प्रयोग में १४० सूत्र की प्राप्ति नहीं है कारण सूत्र का अर्थ है जिस स्वर पर में रहते गुण न हो अम् पर में रहते गुण होता है अतः इअम् इस दशा में इ को गुण करके अय् अप् अम् बना स्वरादि अब भी है अट् दीर्घ हो गया आयम् प्रयोग बना।

लोपे च दिस्योः ॥१४५॥

धढधभान्तस्य धातोरादेस्तृतीयस्य चतुर्थत्वं भवति दिस्योर्लोपेऽपि। अधोक् अदुग्धां अदुहन्। अधोक् अदुग्धं अदुग्ध। अदोहं अदुह्व अदुह्म। अदुग्ध अदुहातां अदुहत। लिह् आस्वादने।

हो ढः ॥१४६॥

धातोर्हस्य ढो भवति धुट्यन्ते च।

ढे ढलोपो दीर्घश्चोपधायाः ॥१४७॥

ढे परे ढलोपो भवति उपधाया दीर्घश्च। लेढि लीढः लिहन्ति। लेक्षि लीढः लीढ। लेह्मि लिह्वः लिह्मः। लीढे लिहाते लिहते। लिक्षे। लिहाथे लीढ्वे। लिहे लिह्वहे लिह्महे। लिह्यात्। लिहीत। लेढु लीढात् लीढां लिहन्तु। लेढि लीढात् लीढं लीढ। लेहानि लेहाव लेहाम॥ लीढां लिहातां लिहतां। लिक्ष्व लिहाथां लीढ्वं। लेहै लेहावहै लेहामहै। अलेट् अलीढां अलिहन्—अलीढ। लिह्यते॥ इत्यदादिः समाप्तः। ❑

अथ जुहोत्यादिगणः

हु दानादनयोः।

जुहोत्यादेश्च ॥१४८॥

जुहोत्यादेश्च परस्य विकरणस्य लुग्भवति।

द्वित्वचनमनभ्यासस्यैकस्वरस्याद्यस्य ॥१४९॥

दि सि का लोप होने पर भी घ ढ ध भान्त धातु की आदि के तृतीय अक्षर को चतुर्थ हो जाता है॥१४५॥

'अघोषे प्रथमः' से घ् को प्रथम अक्षर होकर विरामे वा से अधोक् अधोग बना। 'सि' में—अधोकम्। अम्-अदोहं।

अदुग्ध। भाव कर्म में—दुह्यते।

लिह् धातु आस्वादन अर्थ में है।

घुट् अंत के आने पर लिह् के ह् को 'ढ्' हो जाता है॥१४६॥

लिह् ति धढधभेभ्यस्तथोर्धोऽध १४३ सूत्र से त, थ को ध होकर 'तवर्गस्य षट्वर्गाट्टवर्गः' सूत्र ११८ से ट वर्ग होकर ध् को ढ् हुआ। गुण होकर 'लेढ् ढि'।

ढ के परे ढ का लोप हो जाता है और उपधा को दीर्घ हो जाता है॥१४७॥

अतः लेढि लीढः लिहन्ति। लिह् सि है 'षढोः कः से' सूत्र ११९ से ढ् को क् होकर स् को ष् होकर लेक्षि बना। लोढे लिहाते लिहते, लिक्षे लिहाते लिढ्ध्वे सूत्र ११८ से 'ढ्वे' बनाकर "ढे ढलोपे" १४७ ढ् को लोप होकर 'लीढ्वे' बना लिह्वे लिह्महे, लिह्महे। लिह्यात्। लिहीत। लेढ। लीढां लिहातां लिहतां, लिक्ष्व। अलेट्। अलीढ। भावकर्म में—लिह्यते।

इस प्रकार से अदादि गण प्रकरण समाप्त हुआ। ❑

अथ जुहोत्यादि गण प्रारम्भ होता है।

'हु' धातु दान देने और खाने अर्थ में है। 'हुञ्जति' है।

जुहोत्यादि से परे विकरण का लुक् हो जाता है॥१४८॥

धातु के अवयव भूत अनभ्यास, एक स्वर वाले आदि के वर्ण को द्वित्व हो जाता है॥१४९॥

धातोरवयवस्यानभ्यासस्य एकस्वरस्याद्यस्य वर्णस्य द्विर्वचनं भवति । इति वर्तते ।

जुहोत्यादीनां सार्वधातुके ॥१५० ॥

जुहोत्यादीनां द्विर्वचनं भवति सार्वधातुके परे ।

पूर्वोऽभ्यासः ॥१५१ ॥

द्विरुक्तस्य धातोः पूर्वोऽवयवोऽभ्याससंज्ञो भवति ।

हो जः ॥१५२ ॥

अभ्यासहकारस्य जकारो भवति । जुहोति जुहुतः ।

द्वयमभ्यस्तम् ॥१५३ ॥

धातोरभ्यास इतरश्चेति द्वयमभ्यस्तसंज्ञं भवति ।

लोपोऽभ्यस्तादन्तिनः ॥१५४ ॥

अभ्यस्तात्परस्यान्तेर्नकारस्य लोपो भवति ।

जुहोतेः सार्वधातुके ॥१५५ ॥

जुहोतेः उकारस्य वकारो भवति स्वरादावगुणे सार्वधातुके परे । जुह्वति । जुहोषि जुहुथः जुहुथ । जुहोमि जुहुवः जुहुमः ॥ इत्यादि । ओहाङ् गतौ ।

भृञ्हाङ्माङामित् ॥१५६ ॥

भृञ् हाङ् माङ् इत्येतेषामभ्यासस्य इद्भवति सार्वधातुके परे ।

उभयेषामीकारो व्यञ्जनादावदः ॥१५७ ॥

उभयेषामभ्यस्तक्रयादिविकरणानां दावर्जितानामाकारस्य ईकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे । जिहीते ।

यह सूत्र अनुवृत्ति में चला आ रहा है ।

सार्वधातुक के आने पर जुहोति आदि को द्वित्व हो जाता है ॥१५० ॥

'हु हु ति'

द्वित्व किये गये धातु के पूर्व अवयव की अभ्यास संज्ञा हो जाती है ॥१५१ ॥

अभ्यास के हकार को 'जकार' हो जाता है ॥१५२ ॥

जुहोति, जुहुतः । जु हु अन्ति ।

धातु के अभ्यास और इतर दोनों को 'अभ्यस्त' संज्ञा हो जाती है ॥१५३ ॥

अभ्यस्त से परे अन्ति के नकार का लोप हो जाता है ॥१५४ ॥

स्वरादि अगुण सार्वधातुक के आने पर जुहोति के उकार को 'व' हो जाता है ॥१५५ ॥

जुह्वति बना । इत्यादि । ओहाङ् गति अर्थ में है ।

'हा हा ते' है पूर्व को अभ्यास संज्ञा हो गई ।

सार्वधातुक में भृञ् हाङ् माङ् इनके अभ्यास को इकार हो जाता है ॥१५६ ॥

व्यंजनादि अगुण सार्वधातुक के आने पर दोनों ही अभ्यस्त बने हुए हैं जहाँ पर ऐसे दा वर्जित आकार को 'ईकार' हो जाता है ॥१५७ ॥

भृञ्हाङ्माङामित् १५६ सूत्र से अभ्यास को इकार होकर 'हो जः' सूत्र से जकार होकर जिहीते ।

अभ्यस्तानामाकारस्य ॥१५८ ॥

अभ्यस्तानामाकारस्य लोपो भवत्यगुणे सार्वधातुके परे। जिहाते जिहते। जिहीषे जिहाथे जिहीध्वे। जिहे जिहीवहे जिहीमहे॥ जिहीत जिहीयातां जिहीरन्। जिहीतां जिहातां जिहतां। जिहीष्व जिहाथां जिहीध्वं। जिहै जिहावहै जिहामहै। अजिहीत अजिहातां अजिहत॥ एवं माङ् माने शब्दे च। मिमीते मिमाते मिमते। मिमीषे मिमाथे मिमीध्वे। मिमे मिमीवहे मिमीमहे। डुधाञ् डुभृञ् धारणपोषणयोः।

द्वितीयचतुर्थयोः प्रथमतृतीयौ ॥१५९ ॥

अभ्यासस्य द्वितीयचतुर्थयोः प्रथमतृतीयौ भवतः। बिभर्त्ति बिभृतः बिभ्रति। बिभर्षि बिभृथः बिभृथ। बिभर्मि बिभृवः बिभृमः। बिभृते बिभ्राते बिभ्रते। बिभृषे बिभ्राथे बिभृध्वे। बिभ्रे बिभृवहे बिभृमहे।

डुधाञ्हस्वः ॥१६० ॥

अभ्यासस्य ह्रस्वो भवति। दधाति।

तथोश्च दधातेः ॥१६१ ॥

दधातेर्धातोः आदेस्तृतीयचतुर्थत्वं भवति तथोः सेध्वोश्चागुणे परतः। धत्तः दधति। दधासि धत्थः धत्थ। दधामि दध्वः दध्मः। धत्ते दधाते दधते। धत्से दधाथे धद्ध्वे। दधे दध्वहे दध्महे। भावकर्मणोश्च।

अगुण सार्वधातुक आने पर अभ्यस्त के आकार का लोप हो जाता है ॥१५८ ॥

जिहाते। जिहते। 'आत्मने चानकारात्' सूत्र ७९ से नकार का लोप हो गया है। जिहीत। जिहीतां। अजिहीत।

माङ् धातु माप करने और शब्द करने अर्थ में है। मा मा ते १५६ से अभ्यास को 'इ' १५७ से अभ्यस्त को 'ई' होकर मिमीते बना। डुधाञ् और डुभृञ् धातु धारण पोषण अर्थ में हैं।

भृ भृ ति १५६ से अभ्यास को इकार होकर भि अगले को गुण होकर भिभर ति है।

अभ्यास के द्वितीय को प्रथम एवं चतुर्थ को तृतीय अक्षर हो जाता है ॥१५९ ॥

बिभर्त्ति। बिभृतः। बिभ्रति 'द्वयमभ्यस्तं' से अभ्यस्त संज्ञा करके 'लोपोऽभ्यस्तादन्तिनः' १५४ से नकार का लोप गया अतः 'रमृवर्णः' से संधि हो गई है। आत्मने पद में बिभृते।

धा धा ति 'द्वितीय चतुर्थयोः प्रथमतृतीयौ' १५९ सूत्र से पूर्व को तृतीय अक्षर होकर—दाधा ति रहा।

धाञ् धातु में अभ्यास को ह्रस्व हो जाता है ॥१६० ॥

'दधाति' बना। दा धा तस् है।

त, थ, से, ध्वे अगुणी विभक्तियों के आने पर धा धातु के आदि के तृतीय को चतुर्थ हो जाता है ॥१६१ ॥

धा धा तस् 'अभ्यस्तानामाकारस्य' १५८ सूत्र से अभ्यंस्त के आकार का लोप होकर 'अघोषे प्रथमः' से प्रथम अक्षर होकर 'डुधाञ् ह्रस्वः' से अभ्यास को ह्रस्व होकर धत्तः बना। दधासि धत्थः धत्थ। दधामि दध्वः दध्मः।

धा धा ते अभ्यास के चतुर्थ को तृतीय होकर ह्रस्व होकर पुनः १६१ सूत्र से चतुर्थ हो गया और अभ्यस्त के 'आकार' का लोप होकर 'धत्ते' बना। ऐसे ही से ध्वे, विभक्ति में धत्से 'धद्ध्वे' बना। भावकर्म में—

नाम्यन्तानां यणाययन्नाशीश्च्विचेक्रीयितेषु दीर्घः ॥१६२ ॥

नाम्यन्तानां धातूनां दीर्घो भवति यणादीनां ये च्वौ च परे । हूयते ।

अदाब् दाधौ दा ॥१६३ ॥

डुदाञ् दाने । दाण् दाने । दो अवखण्डने । देङ् रक्षणे । एते चत्वारो दारूपाः । डुधाञ् धारणपोषणयोः । धेट् पा पाने इत्येतौ धारूपौ । दाप् लवने, दैप् शोधने इत्येतौ वर्जयित्वा दाधा इत्येतौ दासंज्ञौ भवतः ।

दामागायति पिबति स्थास्यति जहातीनामीकारो व्यञ्जनादौ ॥१६४ ॥

दासंज्ञकमारूपकगायतिपिबतिस्थास्यतिजहातीनामन्तस्य ईकारो भवति व्यंजनादावगुणे सार्वधातुके परे । दीयते । धीयते । माङ् माने शब्दे च । मीयते मीयेते मीयन्ते । कै गै रै शब्दे । गीयते । पीयते । ष्ठा गतिनिवृत्तौ । निमित्ताभावे नैमित्तिकस्याप्यभावः । स्थीयते । षो अन्तकर्मणि । अवसीयते । ओहाक् त्यागे । हीयते । जुहुयात् जुहुयातां जुहुयुः । धेट् पा पाने । दध्यात् दध्यातां दध्युः । दधीत दधीयातां दधीरन् । जुहोतु जुहुतात् जुहुतां जुह्वतु । जुहुधि जुहुतात् जुहुतं जुहुत । जुहवानि जुहवाव जुहवाम । मिमीत मिमीयाताम् मिमीरन् । मिमीतां मिमातां मिमतां । मिमीष्व मिमाथां मिमीध्वं । मिमै मिमावहै मिमामहै । बिभर्तु बिभृतां बिभ्रतु । बिभृतां बिभ्रातां बिभ्रतां । दधातु धत्तात् धत्तां दधतु । अभ्यस्तानामकारस्य इति लोपे प्राप्ते । "लोपस्करादेशयोः स्वरादेशो विधिर्बलवान्" इति स्वरादेशो भवति ।

दास्त्योरभ्यासलोपश्च ॥१६५ ॥

नाम्यन्त धातु को यण् आदि प्रत्यय, च्वि प्रत्यय के आने पर दीर्घ हो जाता है ॥१६२ ॥

हु य ते = हूयते ।

दाप् देप् को छोड़कर दा धा, धातु 'दा' संज्ञक होते हैं ॥१६३ ॥

डुदाञ्—दान देना, दाण्—दान देना, दो—खंड करना, देङ्—रक्षा करना, ये चार धातु दा रूप हैं । डुधाञ्—धारण पोषण करना, धेट् पा—पीना ये दो धातु धारूप हैं ।

दाप्—काटना, दैप् शोधन करना । इन दो धातुओं को छोड़कर उपर्युक्त दा, धा रूप धातु 'दा' संज्ञक होते हैं ।

व्यंजनादि अगुण सार्वधातुक विभक्ति के आने पर दा, मा, गा, पा, स्था, हा धातु के अन्त को ईकार हो जाता है ॥१६४ ॥

अतः दीयते, धीयते, मीयते बन गये । कै गै रै, धातु शब्द करने अर्थ में हैं । गीयते, पा—पीयते । ष्ठा—ठहरना । 'धात्वादेः षः सः' सूत्र से सकार होने से निमित्त के अभाव में नैमित्तिक का भी अभाव हो गया अतः ठकार को थकार होकर स्था रहा स्थीयते । षो अंत करना—अवसीयते । ओहाक् त्याग करना, हीयते । इत्यादि ।

सप्तमी में—जुहुयात् । दध्यात् । दधीत १५८ से आकार का लोप हुआ है । जुहोतु । जुहुधि । उत्तम पुरुष में गुण होकर जुहवानि जुहवाव जुहवाम । मिमीत, मिमीथाताम् मिमीरन् । मिमीतां । बिभर्तु । बिभृतां । दधातु । 'धा धा हि' 'अभ्यस्तानामाकारस्य' सूत्र से अभ्यस्त के आकार का लोप प्राप्त था किंतु लोप और स्वर के आदेश में स्वर के आदेश की विधि बलवान् होती है इस न्याय के अनुसार—

'हि' विभक्ति के आने पर दा संज्ञक और अस् धातु के अन्त को 'ए' होकर अभ्यास का लोप हो जाता है ॥१६५ ॥

दासंज्ञकस्यास्तेश्च हौ परेऽन्तस्य एत्वं भवति अभ्यासलोपश्च । यथासंख्यं । धेहि धत्तात् धत्तं धत्त । दधानि दधाव दधाम । धत्तां दधातां दधतां । अजुहोत् अजुहुतां ।

अन उस्सिजभ्यस्तविदादिभ्योऽभुवः ॥१६६ ॥

सिजभ्यस्तविदादिभ्यः परस्य अन उस् भवति । अभुवः ।

अभ्यस्तानामुसि ॥१६७ ॥

अभ्यस्तानां गुणो भवति उसि परे । अजुहवुः । अजुहोः अजुहुतं अजुहुत । अजुहवं अजुहुव अजुहुम । अजिहीत अजिहातां अजिहत । अबिभः अबिभृतां अबिभरुः । अबिभः अबिभृतं अबिभृत । अबिभरं अबिभृव अबिभृम । अबिभृत अबिभ्रातां अबिभ्रत । अमिमीत अमिमातां अमिमत । अमिमीथाः अमिमाथां अमिमीध्वं । अमिमि अमिमीवहि अमिमीमहि । अदधात् अधत्तां ।

आकारस्योसि ॥१६८ ॥

आकारस्य लोपो भवति उसि परे । अदधुः । अधत्त अदधातां अदधत । ञिभी भये । बिभेति बिभितः बिभीतः ।

भियो वा ॥१६९ ॥

भियो वा इकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे ।

य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य ॥१७० ॥

असंयोगपूर्वस्यानेकाक्षरस्य इवर्णस्य यो भवति स्वरादावगुणे परे । बिभ्यति इत्यादि । ह्री लज्जायां ।

क्रम से—धेहि तातण् मे—धत्तात् । धत्तां । अजुहोत् । अजुहु अन् है ।

भू को छोड़कर सिच् अभ्यस्त और विवादि से परे अन् को 'उस्' हो जाता है ॥१६६ ॥

उस् के आने पर अभ्यस्त को गुण हो जाता है ॥१६७ ॥

अजुहवुः बना अजुहोः अजुहु + अम्—अजुहवम् । अजिहीत ।

अबि भृ दि । 'व्यंजनादिस्योः' से सि दि का लोप होकर गुण होकर र् का विसर्ग हुआ अबिभः । अन् में—अबिभरुः । अबिभ्रत । अमिमीत । अदधात् । अधत्तां । 'अ द धा उस्' ।

उस् के आने पर आकार का लोप हो जाता है ॥१६८ ॥

अदधुः । अधत्त । ञिभी धातु भय अर्थ में है

भी भी ति चतुर्थ को तृतीय अक्षर एवं डुधाञ् ह्रस्वः १६० सूत्र से अभ्यास को ह्रस्व होकर एवं धातु को गुण होकर 'बिभेति' बना ।

'बिभी तस्' है ।

व्यंजनादि अगुण सार्वधातुक के आने पर 'भी' को विकल्प से इकार हो जाता है ॥१६९ ॥

अतः बिभितः, बिभीतः । बिभी अन्ति १५४वें सूत्र से नकार को लोप होकर—

स्वरादि अगुणी विभक्ति के आने पर असंयोग पूर्व अनेकाक्षर वाले इवर्ण को यकार हो जाता है ॥१७० ॥

बिभ्यति बना । ह्री धातु—लज्जित होना । ह्री ह्री ति 'हो जः' से 'ज्ञी' १६० सूत्र से ह्रस्व होकर ञि

अभ्यासस्यादिर्व्यञ्जनमवशेष्यम् ॥१७१ ॥

अभ्यासस्यादिर्व्यञ्जनमवशेष्यं भवति। अनादेर्लोप इत्यर्थः। जिहेति जिहीतः। स्वरादाविवर्णोवर्णान्तस्य धातोरियुवाविति इयादेशः। जिह्रियति। ओहाक् त्यागे। जहाति जहीतः।

जहातेर्वा ॥१७२ ॥

जहातेः सार्वधातुके व्यञ्जनादावगुणे परे आकार इकारादेशो भवति वा। जहितः जहीतः जहति। जहासि। उभयेषामीकारो व्यञ्जनादावदः। जहीथः जहिथः जहीथ जहिथ। जहामि जहीवः जहिवः जहीमः जहिमः।

लोपः सप्तम्यां जहातेः ॥१७३ ॥

जहातेरन्तस्य लोपो भवति सप्तम्यां व्यञ्जनादावगुणे सार्वधातुके परे। जह्यात् जह्यातां जह्युः। जहातु जहीतात् जहितात् जहीतां जहितां जहतु।

आत्वं वा हौ ॥१७४ ॥

जहातेरन्तस्य आत्वं ईत्वमित्वं च भवति वा हौ परे। जहाहि जहिहि जहीहि जहीतात् जहितात् जहीतं जहितं जहीत जहित। जहानि जहाव जहाम। अजहात् अजहीतां अजहितां अजहुः। अजहाः अजहीतं अजहितं अजहीत अजहित। अजहां अजहिव अजहीव अजहिम अजहीम। इत्यादि। ऋ सृ गतौ। पॄ पालनपूरणयोः।

आर्तीपिपर्त्योश्च ॥१७५ ॥

अनयोरभ्यासस्य इद्भवति सार्वधातुके परे।

अभ्यास का आदि व्यंजन अवशेष रहता है ॥१७१ ॥

अर्थात् आदि से बाद के रकार का लोप हो जाता है तब गुण होकर 'जिहेति' जिहीतः बना। जिही अति 'स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ' ८३ सूत्र से इय् आदेश होकर 'जिह्रियति' बना। ओहाक्—त्याग करना।

'हा हा ति' 'हो जः' सूत्र से अभ्यास को 'ज' होकर सूत्र १६० से ह्रस्व होकर 'जहाति' जहा तस्।

सार्वधातुक व्यंजनादि अगुण विभक्ति के आने पर जहाति धातु के आकार को विकल्प से इकार हो जाता है ॥१७२ ॥

जहितः १५७वें सूत्र से ईकार होकर 'जहीतः' बना जहा। अन्ति १५८ से आकार को लोप होकर नकार का लोप होकर 'जहति' बना। 'ज हा यात्'

सप्तमी में जहाति के अन्त का लोप हो जाता है ॥१७३ ॥

जह्यात्। जहातु जहितात्, जहीतात्। ज हा हि।

हि के आने पर जहाति के अन्त को 'आ' ई और 'इ' हो जाता है ॥१७४ ॥

जहाहि, जहीहि, जहिहि। अजहात्। इत्यादि। ऋ सृ गति अर्थ में है। पॄ धातु पालन और पूरण अर्थ में है।

ऋ ऋ ति। पॄ पॄ ति।

सार्वधातुक में ऋ के अभ्यास को इकार हो जाता है ॥१७५ ॥

इ ऋ ति।

अभ्यासस्यासवर्णे ॥१७६॥

अभ्यासस्य इवर्णोवर्णयोरियुवौ भवतोऽसवर्णे परे। इयर्ति इयृतः इयृति। इयर्षि इयृथः इयृथ। इयर्मि इयृवः इयृमः। इयृयात् इयृयातां इयृयुः। इयर्तु इयृतात् इयृतां इयृतु। इयृहि इयृतात् इयृतं इयृत। इयराणि इयराव इयराम। ऐयः ऐयृतां ऐयरुः। ऐयः ऐयृतं ऐयृत। ऐयरं ऐयृव ऐयृम। गुणोर्तिसंयोगाद्योरिति गुणः। भावे-अर्यते।

ऋवर्णस्याकारः ॥१७७॥

अभ्यासस्य ऋवर्णस्याकारो भवति। ससर्ति ससृतः सस्रति। ससृयात् ससृयातां ससृयुः। ससर्तु ससृतात् ससृतां सस्रतु। अससः अससृतां अससरुः।

यणाशिषोर्ये ॥१७८॥

ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे। स्रियते। पिपर्ति पिपृतः। पिप्रति। पिपृयात् पिपृयातां पिपृयुः। पिपर्तु पिपृतात् पिपृतां पिप्रतु। अपिपः अपिपृतां अपिपरुः। णिजिर् शौचपोषणयोः। विजिर् पृथग्भावे। विष्लृ व्याप्तौ। विष् शब्दे।

निजिविजिविषां गुणः सार्वधातुके ॥१७९॥

निजादीनामभ्यासस्य गुणो भवति सार्वधातुके परे।

चवर्गस्य किरसवर्णे ॥१८०॥

चवर्गस्य किर्भवति असवर्णे घुटि परे अन्ते च। नेनेक्ति नेनिक्तः नेनिजति। नेनेक्षि नेनिक्थः नेनिक्थ। नेनेज्मि नेनिज्वः नेनिज्मः। नेनिज्यात् नेनिज्यातां नेनिज्युः। नेनेक्तु नेनिक्तात् नेनिक्तां नेनिजतु। नेनेग्धि नेनिक्तात् नेनिक्तं नेनिक्त।

असवर्ण के आने पर अभ्यास के इवर्ण उवर्ण को इय् उव् होता है ॥१७६॥

आगे गुण होकर इयर्ति, इयृतः 'रमृवर्णः' से संधि होकर इय् ऋ अति = इयर्ति। इयृयात्। इयर्तु। इय् ऋ आनि गुण होकर इयराणि बना।

भावकर्म में—ऋ य ते 'गुणोर्तिसंयोगाद्योः' ७१ सूत्र से गुण होकर 'अर्यते' बना। सृ सृ ति

अभ्यास के ऋवर्ण को अकार हो जाता है ॥१७७॥

गुण होकर 'ससर्ति' बना। ससृतः सस्रति। ससृयात्। ससर्तु। अससः अससृतां अससरुः। भावकर्म में—

यण् आशिष् और य् प्रत्यय के आने पर ऋकार से इकार का आगम होता है ॥१७८॥

सृ इ 'रमृवर्णः' से स्रियते बना। पृ पृ ति 'अर्तिपिपर्त्योश्च' १७५ सूत्र से अभ्यास को 'इ' होकर गुण होकर पिपर्ति बना। पिपृयात्। पिपर्तु। अपिपः अपिपृतां अपिपरुः। णिजिर्—शुद्धि करना, पोषण करना। विजिर्—पृथक् होना, विष्लृ—व्याप्त होना, विष्—शब्द करना।

'णो नः' सूत्र से ण् को न् करके निज् धातु है। निज् निज् ति १७१ से अभ्यास के आदि को शेष रखने से ज् का लोप हुआ।

सार्वधातुक में निज् विज् और विष् के अभ्यास को गुण हो जाता है ॥१७९॥

एवं गुणौ विभक्ति को गुण होकर ने ने ज् ति रहा।

असवर्ण, घुट् के परे और अन्त में चवर्ग को कवर्ग हो जाता है ॥१८०॥

नेनेक्ति नेनिक्तः नेनिजति, नेनेक्षि नेनिक्थः।

नेनिज्यात्। नेनेक्तु। नेनेग्धि। नेनिज् आनि।

अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके ॥१८१ ॥

अभ्यस्तस्य चोपधाया नामिनो गुणो न भवति स्वरादौ गुणिनि सार्वधातुके परे । नेनिजानि नेनिजाव नेनिजाम । अनेनेक् अनेनिक्तां अनेनिजुः । अनेनेक् अनेनिक्तं अनेनिक्त । अनेनिजं अनेनिज्व अनेनिज्म । वेवेक्ति वेविक्तः वेविजति । वेविज्यात् वेविज्यातां वेविज्युः । वेवेक्तु वेविक्तात् वेविक्तां वेविजतु । वेविग्धि । अवेवेक् अवेविक्तां अवेविजुः । वेवेष्टि वेविष्टः वेविषति । वेवेक्षि वेवेष्ठः वेविष्ठ । वेवेष्मि वेविष्वः वेवेष्मः । वेविष्यात् वेविष्यातां वेविष्युः । वेवेष्टु वेविष्टात् वेविष्टां वेविषतु । धुटां तृतीयश्चतुर्थेषु इति तृतीयः । ऋवर्णटवर्गरषा मूर्धन्या इति न्यायात् षकारस्य डकारः । वेविड्ढि वेविष्टात् वेविष्टं वेविष्ट । वेविषाणि वेविषाव वेविषाम । अवेवेट् अवेविष्टां अवेविषुः । अवेवेः अवेविष्टं अवेविष्ट । अवेविषं अवेविष्व अवेविष्म । भावकर्मणोः-निज्यते । विज्यते । विष्यते । इति जुहोत्यादिः । ❑

अथ दिवादिगणः

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ।

दिवादेर्यन् ॥१८२ ॥

दिवादेर्गणाद्विकरणसंज्ञको यन् भवति कर्तरि विहिते सार्वधातुके परे ।

नामिनोर्वोरकुर्छुरोर्व्यञ्जने ॥१८३ ॥

अकुर्छुरोर्वोरुपधाभूतस्य नामिनो दीर्घो भवति व्यञ्जने परे । दीव्यति दीव्यतः दीव्यन्ति । दीव्येत् दीव्येतां दीव्येयुः । दीव्यतु दीव्यतात् दीव्यतां दीव्यन्तु । अदीव्यत् अदीव्यतां अदीव्यन् । षूङ् प्राणिप्रसवे ।

स्वरादि गुणी सार्वधातुक के आने पर अभ्यस्त और उपधा के नामि को गुण नहीं होता है ॥१८१ ॥

नेनिजानि । अनेनेक् । "व्यंजनादिस्योः" से दि सि का लोप हो गया है । विज् धातु से—वेवेक्ति वेविक्तः । वेविज्यात् । वेवेक्तु । वेविग्धि । विष्—वेवेष्टि । वेविष् से 'षढोकः सूत्र से' ष को क् होकर आगे सकार को षकार होकर वेवेक्षि ।

वेविष्+हि 'धुटां तृतीयश्चतुर्थेषु' सूत्र १२० से तृतीय अक्षर होता था तब "ऋवर्ण टवर्ग रषा मूर्धन्याः" इस न्याय से षकार को 'ड' पुनः 'तवर्गस्य षट्वर्गाट्टवर्गः' से धि को ढि होकर 'वेविड्ढि' अवेवेट् । भावकर्म में—निज्यते । विज्यते । विष्यते ।

इस प्रकार से जुहोत्यादि गण समाप्त हो गया । ❑

अथ दिवादिगण

दिवु धातु क्रीड़ा, जीतने की इच्छा, व्यवहार, कांति इच्छा, स्तुति, मोद, मद, स्वप्न, कांति और गति अर्थ में है ।

दिव् ति है ।

दिवादि से 'यन्' विकरण होता है ॥१८२ ॥

कर्त्ता में सार्वधातुक से परे दिवादिगण से विकरण संज्ञक 'यन्' होता है ।

व्यंजन वाली विभक्ति के आने पर कुर् छुर् को छोड़कर व की उपधाभूत नामिको दीर्घ हो जाता है ॥१८३ ॥

दीव्यति दीव्यतः दीव्यंति । दीव्येत् । दीव्यतु । अदीव्यत् । षूङ् धातु प्राणी को जन्म देने अर्थ में

सूयते सूयेते सूयन्ते। सूयेत सूयेयातां सूयेरन्। सूयतां सूयेतां सूयन्तां। असूयत असूयेतां असूयन्त। असूयथाः असूयेथां असूयध्वं। असूये असूयावहि असूयामहि। णहञ् बन्धने। संनह्यति संनह्यतः संनह्यन्ति। संनह्यते संनह्येते संनह्यन्ते। संनह्येत् संनह्येतां संनह्येयुः। संनह्योः संनह्येतं संनह्येत। संनह्येयं संनह्येव संनह्येम। संनह्येत संनह्येयातां संनह्येरन्। संनह्यतु संनह्यतात् संनह्यतां संनह्यन्तु। संनह्य संनह्यतात् संनह्यतं संनह्यत। संनह्यानि संनह्याव संनह्याम। संनह्यतां संनह्येतां संनह्यन्तां। संनह्यस्व संनह्येथां संनह्यध्वं। संनह्यै संनह्यावहै संनह्यामहै। समनह्यत् समनह्यतां समनह्यन्। समनह्यत समनह्येतां समनह्यन्त। इत्यादि। भावकर्मणोश्च। दीव्यते। सूयते। संनह्यते। ञिमिदा स्नेहने।

मिदेः ॥१८४॥

मिदेरित्येतस्य नाम्युपधस्य धातोर्यन्स्वविकरणे परे गुणो भवति। प्रमेद्यति प्रमेद्यतः प्रमेद्यन्ति। प्रमेद्येत्। प्रमेद्यतु। प्रामेद्यत्। शो तनूकरणे। छो छेदने। षो अन्तकर्मणि। दो अवखण्डने।

यन्योकारस्य ॥१८५॥

धातोरोकारस्य लोपो भवति यनि परे। श्यति श्यतः श्यन्ति। श्यसि श्यथः श्यथ। श्यामि श्यावः श्यामः। छ्यति छ्यतः छ्यन्ति। स्यति स्यतः स्यन्ति। द्यति द्यतः द्यन्ति। शम् दम् उपशमे। तमु काक्षायां। श्रम् तपसि खेदे च। भ्रमु अनवस्थाने। क्षमूष् सहने। क्लमु ग्लानौ। मदी हर्षे।

शमादीनां दीर्घो यनि ॥१८६॥

शमादीनां दीर्घो भवति यनि परे। शाम्यति। दाम्यति। ताम्यति। श्राम्यति। भ्राम्यति क्षाम्यति। क्लाम्यति। माद्यति। जनी प्रादुर्भावे।

जा जनेर्विकरणे ॥१८७॥

जनेः स्वविकरणे परे जा भवति। जायते। जायेत। जायतां। अजायत।

है। ङ् की इत्संज्ञा होने से आत्मनेपद हुआ। 'धात्वादेः षः सः' सूत्र से 'सू' रहा। सूयते। सूयेते। सूयेत। सूयतां। असूयत। णहञ् धातु-बंधन अर्थ में है।

'णो नः' से न होकर नह्यति संनह्यति बना। संनह्यते। संनह्येत्। संनह्यो। संनह्यतु। संनह्यतां। समनह्यत्। समनह्यत। इत्यादि। भावकर्म में—दीव्यते, सूयते। संनह्यते। ञिमिदा धातु स्नेह अर्थ में है।

'मिद्' इस नामि उपधा वाली धातु को 'यन्' विकरण के आने पर गुण हो जाता है ॥१८४॥

मेद्यति, प्रमेद्यति। प्रमेद्येत्। प्रमेद्यतु। प्रामेद्यत्। शो-कृश करना। छो-छेदन करना। षो-समाप्त होना। दो-टुकड़े करना। शो यन् ति है।

'यन्' के आने पर धातु के ओकार का लोप हो जाता है ॥१८५॥

श्यति, श्यतः श्यन्ति। छ्यति। स्यति। द्यति। शम् दम् धातु उपशम अर्थ में हैं। तमु कांक्षा अर्थ में, श्रम, धातु तपश्चर्या और खेद अर्थ में हैं। भ्रमु-भ्रमण करने। क्षमूष्-सहन करने। क्लमु-ग्लानि अर्थ में, मदी धातु-हर्ष अर्थ में है।

यन् के आने पर शम् आदि को दीर्घ हो जाता है ॥१८६॥

शाम्यति, दाम्यति, ताम्यति, भ्राम्यति, क्षाम्यति, क्लाम्यति, माद्यति। जनी उत्पन्न होना।

जन् धातु को अपने विकरण के आने पर 'जा' हो जाता है ॥१८७॥

जायते। जायेत। जायतां। अजायत।

यणि वा ॥१८८ ॥

यणि परे जनेर्जादेशो वा भवति । जायते जन्यते । इति दिवादिः ।

अथ स्वादिगणः

षुञ् अभिषवे ।

नुः स्वादेः ॥१८९ ॥

स्वादेर्गणाद्विकरणसंज्ञको नुर्भवति कर्तरि विहिते सार्वधातुके परे । सुनोति सुनुतः ।

नोर्वकारो विकरणस्य ॥१९० ॥

नोर्विकरणस्यासंयोगपूर्वस्योकारस्य वकारो भवति स्वरादावगुणे सार्वधातुके परे । सुन्वन्ति । सुनोषि सुनुथः सुनुथ । सुनोमि ।

उकारलोपो वमोर्वा ॥१९१ ॥

असंयोगपूर्वस्य विकरणस्योकारस्य लोपो वा भवति वमोः परतः । सुन्वः सुनुवः सुन्मः सुनुमः । सुनुते सुन्वाते सुन्वते । सुनुषे सुन्वाथे सुनुध्वे । सुन्वे सुन्वहे सुनुवहे सुन्महे सुनुमहे ।

नाम्यन्तानां यणायिन्नाशीश्च्विचेक्रीयितेषु दीर्घः ॥१९२ ॥*

नाम्यन्तानां धातूनां दीर्घो भवति यण् आय् इन् आशीः चेक्रीयितेषु ये च्वौ च परे । सूयते सूयेते । अशूङ् व्याप्तौ । अश्नुते ।

यण् के आने पर जन् को 'जा' विकल्प से होता है ॥१८८ ॥

भाव में—यण् के आने पर जायते । जन्यते दोनों रूप बन गये ।

इस प्रकार से दिवादि गण समाप्त हुआ ।

अथ स्वरादिगण प्रारंभ होता है ।

षुञ् धातु का अर्थ—स्नपन, पीडन, स्नान और सुरा बनाने अर्थ में है ।

कर्ता में सार्वधातुक के आने पर 'सु आदि' गण से 'नु' विकरण होता है ॥१८९ ॥

धात्वादेः षः सः सूत्र ५४ से स होता है पुनः 'नाभ्यंतयोर्धातुविकरणयोर्गुणः' ३२वें सूत्र से गुण होकर 'सुनोति, सुनुतः' बना । 'धात्वादेः षः सः' सूत्र ५४ से 'सुनु अन्ति' है ।

नु विकरण के उकार को 'वकार' होता है ॥१९० ॥

पूर्व में संयोग अक्षर के न होने से स्वरादि अगुणी सार्वधातुक के आने पर 'नु' के 'उ' को 'व' हो जाता है । सुन्वन्ति ।

व, म, विभक्ति के आने पर असंयोग पूर्व के विकरण के उकार का लोप विकल्प से होता है ॥१९१ ॥

सुन्वः, सुनुवः । सुन्मः सुनुमः बना । आत्मनेपद में—सुनुते सुन्वाते सुन्वते 'आत्मने चानकारात्' सूत्र से अन्ते के नकार का लोप हो गया । सुनुषे । सुन्वे, सुन्वहे, सुनुवहे । सुन्महे, सुनुमहे । भावकर्म में—सु य ते है—

यण् आय् इन्, आशी, चेक्रीयित, य और च्वि प्रत्यय के आने पर नाम्यंत धातु को दीर्घ हो जाता है ॥१९२ ॥

नोर्विकरणस्य ॥१९३॥

नुविकरणस्योकारस्य संयोगपूर्वस्य उवादेशो भवति स्वरादावगुणे सार्वधातुके परे। अश्नुवाते अश्नुवते। चिञ् चयने। चिनोति चिनुतः चिन्वन्ति। चिनुते चिन्वाते चिन्वते। सुनुयात् सुनुयातां सुनुयुः। अश्नुवीत अश्नुवीयातां अश्नुवीरन्। अश्नुवीथाः अश्नुवीयाथां अश्नुवीध्वं। अश्नुवीय अश्नुवीवहि अश्नुवीमहि। चिनुयात्। चिन्वीत। सुनोतु सुनुतात् सुनुतां सुन्वन्तु।

नोश्च विकरणादसंयोगात् ॥१९४॥

असंयोगपूर्वान्नुविकरणाच्च परस्य हेर्लोपो भवति। सुनु सुनुतात् सुनुतं सुनुत। सुनवानि सुनुवाव सुनुवाम। अश्नुतां अश्नुवातां अश्नुवतां। अश्नुष्व अश्नुवाथां अश्नुध्वं। अश्नवै अश्नवावहै अश्नवामहै। चिनोतु चिनुतात् चिनुतां चिन्वन्तु। चिनुतां चिन्वातां। चिनुष्व चिन्वाथां चिनुध्वं। चिनवै चिनवावहै चिनवामहै। असुनोत् असुनुतां असुन्वन्। आश्नुत आश्नुवातां आश्नुवत। अचिनोत्। अचिनुत। इत्यादि। इति स्वादिः।

अथ तुदादिगणः

तुद् व्यथने॥

तुदादेरनि ॥१९५॥

तुदादेर्गुणो न भवति अनि परे। तुदति तुदतः तुदन्ति। मृङ् प्राणत्यागे।

यहाँ यण् प्रत्यय के आने पर दीर्घ होने से 'सूयते, सूयेते' आदि बनेगा। अशूङ् धातु व्याप्ति अर्थ में है। अश्नुते बना।

नु विकरण के उकार को 'उव्' आदेश हो जाता है ॥१९३॥

संयोग पूर्व वाली धातु से नु विकरण के उकार को स्वरादि अगुण सार्वधातुक के आने पर 'उव्' आदेश होता है। अश्नुवाते अश्नुवते बना। चिञ् धातु-चयन अर्थ में है—फूल चुनना। आदि। चिनोति चिनुतः चिन्वन्ति। चिनुते चिन्वाते चिन्वते।

सप्तमी में—सुनुयात्। अश्नुवीत। चिनुयात्। चिन्वीत। इसमें १९० सूत्र से 'उ' को 'व' हुआ है। पंचमी में—सुनोतु। सुनु हि है।

असंयोग पूर्व से परे नु विकरण होने से 'हि' का लोप हो जाता है ॥१९४॥

सुनु। पंचमी के उत्तमपुरुष में गुण होने से सुनवानि सुनवाव सुनवाम। अश्नुतां अश्नुवातां अश्नुवतां।

उत्तमपुरुष में—अश्नवै, अश्नवावहै, अश्नवामहै। चिनोतु। चिनुतां। उत्तमपुरुष में—चिनवै, चिनवावहै चिनवामहै।

ह्यस्तनी में—असुनोत्। आश्नुत। अचिनोत्। अचिनुत।

इस प्रकार से स्वादि गण समाप्त हुआ।

अथ तुदादि गण प्रारंभ होता है।

तुद् धातु पीड़ा अर्थ में है। 'तुद् ति' है 'अन् विकरणः कर्तरि' से अन् विकरण होता है। पुनः।

अन् विकरण के आने पर तुदादि को गुण नहीं होता है ॥१९५॥

तुदति तुदतः तुदन्ति। मृङ् धातु प्राण त्याग—मरने अर्थ में है।

इरन्यगुणे ॥१९६ ॥

ऋदन्तादिकारागमो भवति अगुणे अन्विकरणे परे। स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ। म्रियते म्रियेते म्रियन्ते। मुच्लृ मोक्षणे।

मुचादेरागमो नकारः स्वरादनि विकरणे ॥१९७ ॥

मुचादेः स्वरान्नकारागमो भवत्यनि विकरणे परे। मुञ्चति मुञ्चतः मुञ्चन्ति। लुप्लृञ् छेदने। विद्लृञ् लाभे। लिप् उपदेहे। षिचिर् क्षरणे। लुम्पति लुम्पते। विन्दति विन्दते। लिम्पति लिम्पते। सिञ्चति। सिञ्चते। इति मुचादिः। तुदेत्। म्रियेत। मुञ्चेत्। मुञ्चेतं। तुदेत्। म्रियतां। मुञ्चन्तु। मुञ्चतां। अतुदत्। अम्रियत। अमुञ्चत्। अमुञ्चत अमुञ्चेतां अमुञ्चन्त। अमुञ्चथाः अमुञ्चेथां अमुञ्चध्वं। अमुञ्चे अमुञ्चावहि अमुञ्चामहि। भावकर्मणोः—तुद्यते।

यणाशिषोर्ये ॥१९८ ॥

ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे। म्रियते। मुच्यते। लुप्यते। विद्यते। लिप्यते। सिच्यते इत्यादि। कृ विक्षेपे। गृ निगरणे।

ऋदन्तस्येरगुणे ॥१९९ ॥

ऋदन्तस्य इर् भवत्यगुणे परे। किरति। गिरति।

अगुण विभक्ति में अन् विकरण के आने पर ऋकारांत धातु से 'इकार्' का आगम हो जाता है ॥१९६ ॥

'रमृवर्णः' सूत्र से ऋ को र् होकर 'म्रि ते' रहा 'स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ' ८३ सूत्र से इकार को 'इय्' होकर म्रियते बना, म्रियेते म्रियंते। इस गण में 'आत्मने चानकारात्' सूत्र से अन्ते के नकार का लोप नहीं होता है। मुच्लृ धातु मुक्त—छूटने अर्थ में है। मुच् अ ति है।

अन् विकरण के आने पर मुचादि में स्वर से परे 'नकार' का आगम हो जाता है ॥१९७ ॥

'मु न् च् अ ति' है 'वर्गे तद्वर्गपञ्चमं वा' ९३ सूत्र से चवर्ग का अंतिम अक्षर होकर 'मुञ्चति' बना। 'मुञ्च् अ अन्ति में 'असंध्यक्षरयोरस्य तौ तल्लोपश्च' २६वें सूत्र से अकार का लोप हो गया है। 'मुञ्चन्ति' बना।

लुप्लृञ् धातु छेदन अर्थ में है। लृञ् का अनुबंध होकर लुप् रहा। विद्लृञ्—लाभ अर्थ में है 'विद्' रहता है। लिप् वृद्धि अर्थ में है। षिचिर्—क्षरण अर्थ में है 'षिच्' रहता है।

इन सबमें नकार का आगम होकर—लुम्पति। लुम्पते। विन्दति, विन्दते। लिम्पति, लिम्पते। सिञ्चति, सिञ्चते। ये 'मुचादि' धातु कहलाती हैं।

तुदेत्। म्रियेत। मुञ्चेत्, मुञ्चेत। तुदतु। म्रियतां। मुञ्चतु मुञ्चतां। अतुदत्। अम्रियत। अमुञ्चत। अमुञ्चत। भावकर्म मे तुद्यते। मृ य ते है।

यण् आशी और 'य' प्रत्यय के आने पर ऋकारांत से इकार का आगम हो जाता है ॥१९८ ॥

म्रियते। मुच्यते। लुप्यते। विद्यते। लिप्यते। सिच्यते। कृ—धातु विक्षेपण करने अर्थ मे है। गृ निगलने अर्थ में है।

अगुण विभक्ति के आने पर ऋकारांत को 'इर्' हो जाता है ॥१९९ ॥

किरति। गिरति।

वा स्वरे ॥२००॥

गिरतेरश्रुतेर्लश्रुतिर्भवति वा स्वरे परे। गिलति गिलतः गिलन्ति। इरुरोरीरूरौ। कीर्यते गीर्यते इत्यादि।

तुदादिः समाप्तः। ❑

अथ रुधादिगणः

रुधिर् आवरणे।

स्वरात्तु श्नदेः परो नशब्दः ॥२०१॥

रुधादेर्गणस्य स्वरात्परो विकरणसंज्ञको नकारागमो भवति कर्तरि विहिते सार्वधातुके परे। णत्वं घढधभेभ्यस्तथोर्धोधः। धुटां तृतीयश्चतुर्थेषु। रुणद्धि।

रुधादेर्विकरणान्तस्य लोपः ॥२०२॥

रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे। रुन्द्धः रुन्धन्ति। रुन्द्धे, रुन्द्धाते, रुन्द्धते। रुन्त्से। रुन्धाथे रुन्ध्वे। रुन्धे रुन्ध्वहे रुन्ध्महे। भुज पालनाभ्यवहारयोः।

अशनार्थे भुजा ॥२०३॥

स्वर के आने पर गिर् को विकल्प से गिल् हो जाता है ॥२०० ॥

गिलति गिलतः गिलन्ति। भावकर्म में—किर् य ते गिर् य ते है 'इरुरोरीरूरौ' ११२वें सूत्र से इर् को ईर् होकर कीर्यते गीर्यते बना इत्यादि।

इस प्रकार से तुदादि गण समाप्त हुआ। ❑

अथ रुधादि गण प्रारंभ होता है।

रुधिर् धातु आवरण—रोकने अर्थ में है। रुध् शेष रहता है।

कर्ता में कहे गये सार्वधातुक के आने पर रुधादि गण में स्वर से परे विकरण संज्ञक 'नकार' का आगम होता है ॥२०१ ॥

रु न ध् ति 'नो णमनन्त्यः' इत्यादि सूत्र से 'न' को 'ण' हो गया।

'घढधभेभ्यस्तथोर्धोधः' सूत्र १४३ से 'ति' को 'धि' हो गया 'रुण ध् धि' रहा 'धुटां तृतीयश्चतुर्थेषु' सूत्र १२० से प्रथम ध् को द् होकर 'रुणद्धि' बन गया।

अगुण सार्वधातुक के आने पर रुधादि गण में विकरण के अन्त न के अकार का लोप हो जाता है ॥२०२ ॥

अतः 'रुन्द्धः' बना रुन्ध् अन्ति = रुन्धन्ति बना।

रुणत्सि रुन्द्धः रुन्द्ध, रुणद्धि रुन्ध्वः रुन्ध्मः।

रुन्द्धे रुन्द्धाते रुन्धते, रुन्त्से रुन्धाथे रुन्ध्वे।

भुज् धातु पालन और भोजन अर्थ में है। अशन अर्थ में भुज् धातु आत्मने पद ही होती है और पालन अर्थ में परस्मैपदी होती है।

अशन अर्थ में भुज् धातु रुधादि हो जाती है ॥२०३ ॥

अशनार्थे भुज रुचादिर्भवति । इति रुचादिः । भुङ्क्ते भुञ्जाते भुञ्जते । भुङ्क्षे भुञ्जाथे । भुङ्ग्ध्वे । भुञ्जे भुञ्ज्वहे भुञ्ज्महे । युजिर् योगे । युनक्ति युङ्क्तः युञ्जन्ति ॥ युङ्क्ते । युङ्क्षे । युञ्जाथे युङ्ध्वे । युञ्जे युञ्ज्वहे युञ्ज्महे । रुन्ध्यात् । रुन्धीत । भुञ्जीत । युञ्ज्यात् युञ्जीत । रुणद्धु रुन्द्धात् रुन्द्धां रुन्धन्तु । रुन्द्धि । रुन्द्धात् रुन्द्धं रुन्द्ध । रुणधानि रुणधाव रुणधाम । भुङ्क्तां भुञ्जातां भुञ्जतां । भुङ्क्ष्व भुञ्जाथां भुङ्ग्ध्वं । भुनजै भुनजावहै भुनजामहै । युनक्तु युङ्क्तात् युङ्क्तां युञ्जन्तु । युङ्ग्धि युङ्क्तात् युङ्क्तं युङ्क्त । युनजानि युनजाव युनजाम । युङ्क्तां । अरुणत् अरुणद् अरुन्द्धां अरुन्धन् ।

सोऽपदान्ते वा ॥२०४॥

दधोरत्वं वा स्यात् तत्रापि शब्दबहुलभावात् ।

सोऽपदान्तेऽरेफप्रकृत्योरपि ॥२०५॥

पदान्ते वर्तमानयोर्दधोरत्वं वा स्यात् ह्यस्तन्यां मध्यमपुरुषैकवचने । अरुणत्त्वं अरुणस्त्वं । अरुन्द्धं । अरुन्द्ध । अरुणधं अरुन्ध्व अरुन्ध्म । अभुङ्क्त अभुञ्जातां अभुञ्जत । अभुङ्क्थाः अभुञ्जाथां अभुङ्ग्ध्वं । अभुञ्जि । अभुञ्ज्वहि अभुञ्ज्महि । अयुनक् अयुनग् अयुङ्क्तां अयुञ्जन् । अयुनक् अयुनग् अयुङ्क्त । अयुनजं अयुञ्ज्व अयुञ्ज्म । अयुङ्क्त अयुञ्जातां अयुञ्जत । अयुङ्क्थाः अयुञ्जाथां अयुङ्ग्ध्वं । अयुञ्जि अयुञ्ज्वहि अयुञ्ज्महि । भावकर्मणोः । रुध्यते रुध्येते रुध्यन्ते । भुज्यते भुज्येते भुज्यन्ते । भिदिर् विदारणे । छिदिर् द्विधाकरणे । भिनत्ति । छिनत्ति । भिन्द्यात् । छिन्द्यात् । भिनत्तु । छिनत्तु । अभिनत् अभित्तां अभिन्दन् । अभिनत्त्वं अभिनस्त्वं अभिन्तं अभिन्त । अभिनदं अभिन्द्व अभिन्द्म । अच्छिनत् अच्छिन्ताम् अच्छिन्दन् । अच्छिनत्त्वं अच्छिनस्त्वं अच्छिन्तं अच्छिन्त । अच्छिन्नत । अच्छिन्दम् अच्छिन्द्व अच्छिन्द्म । इति रुधादिः । ❑

भुज् ते 'स्वरादुधादेः परो नशब्दः' सूत्र में 'न' विकरण होकर 'रुधादेर्विकरणान्तस्य लोपः' सूत्र से नकार के अकार का लोप होकर 'चवर्गस्यकिरसवर्णे' सूत्र १८० से चवर्ग को कवर्ग होकर 'वर्गे तद्वर्गपञ्चमं वा' सूत्र से वर्ग का अंतिम अक्षर होकर भुङ्क्ते भुञ्जाते भुञ्जते । 'भुङ् क्षे' स् को ष होकर क्ष हो गया । युजिर् धातु योग अर्थ में है । युनक्ति युङ्क्तः युञ्जन्ति । रुन्ध्यात् । रुन्धीत । भुञ्जीत । युञ्ज्यात् । युञ्जीत । रुणद्धु । 'रुन्द्धि' हुधुङ्ध्यां हेर्धिः' सूत्र से हिको धि होकर बना है । पंचमी के उत्तम पुरुष में रुणधानि रुणधाव रुणधाम । भुनजै भुनजावहै भुनजामहै । युनक्तु । अरुणत् ।

द और ध से अकार विकल्प से होता है । वहाँ भी शब्द बहुलता होती है ॥२०४॥

ह्यस्तनी के प्रथम पुरुष के एकवचन में पदान्त में वर्तमान द और ध को अकार विकल्प से होता है ॥२०५॥

अरुणत् त्वं । जब अकार हुआ तब—अरुणः त्वं । अरुणधम् अरुन्ध्व अरुन्ध्म । अभुङ्क्त अभुञ्जातां अभुञ्जत । अयुनक् अयुनग् । अयुङ्क्त । भावकर्म में—रुध्यते । भुज्यते । भिदिर् विदारण अर्थ में है एवं छिदिर् द्विधा करने के अर्थ में है । भिनत्ति । छिनत्ति । भिन्द्यात् छिन्द्यात् । भिनत्तु । छिनत्तु अभिनत् अभिन्तां अभिन्दन् । अभिनत् अभिनः । अच्छिनत् । अच्छिनत । अच्छिनः । अच्छिन्दम् इस प्रकार से रुधादि गण समाप्त हुआ । ❑

अथ तनादिगणः

तनु विस्तारे ।

तनादेरुः ॥२०६ ॥

तनादेर्गणाद्विकरणसंज्ञक उर्भवति कर्तरि विहिते सार्वधातुके परे । तनोति तनुतः तन्वन्ति । मनुङ् अवबोधने । मनुते मन्वाते मन्वते । मनुषे मन्वाथे मनुध्वे । मन्वे मनुवहे मन्वहे मनुमहे मन्महे । डुकृञ् करणे । करोति ।

करोतेः ॥२०७ ॥

करोतेरकारस्य उकारो भवति अगुणे सार्वधातुके परे । कुरुतः कुर्वन्ति । करोषि कुरुथः कुरुथ । करोमि ।

अस्याकारः सार्वधातुकेऽगुणे ॥

करोतेर्[illegible] ॥२०८ ॥

करोते परस्य उकारस्य नित्यं लोपो भवति वमोः परतः कुर्वः कुर्मः । कुरुते कुर्वाते कुर्वते । भावकर्मणोश्च । तन्यते मन्यते ।

ये च ॥२०९ ॥

करोते परस्य उकारस्य नित्यं लोपो भवति ये च परे । कुर्यात् कुर्वीत । तनोतु तनुतात् तनुतां तन्वन्तु ।

उकाराच्च ॥२१० ॥

अथ तनादि गण प्रारम्भ होता है ।

तनु धातु विस्तार अर्थ में है । तन् ति है ।

कर्ता से सार्वधातुक में तनादि गण से विकरण संज्ञक 'उ' होता है ॥२०६ ॥

तनोति तनुतः तन्वन्ति । मनुङ् धातु मानने अर्थ में है । मनुते मन्वाते मन्वते । तनोमि तनुवः 'उकारलोपो वर्गोवा' सूत्र १९१ से व, म के आने पर उकार का लोप विकल्प से होता है । तन्वः तन्मः । मनुवहे मन्वहे मनुमहे मन्महे ।

डुकृञ् धातु करने अर्थ में है । 'करोति' बना है ।

'नाभ्यंतयोर्धातु विकरणयोर्गुणः' सूत्र से सर्वत्र गुण हुआ ।

अगुण सार्वधातुक के आने पर करोति के अकार को उकार हो जाता है ॥२०७ ॥

कुरुतः कुर्वन्ति । कुरु वस् ।

व, म के आने पर करोति के उकार का नित्य ही लोप हो जाता है ॥२०८ ॥

कुर्वः, कुर्मः । कुरुते कुर्वाते कुर्वते । भावकर्म में—तन्यते, मन्यते । कुरु यात् ।

'य' विभक्ति के आने पर कुरु के उकार का नियम से लोप हो जाता है ॥२०९ ॥

कुर्यात् । कुरु ईत = कुर्वीत । तनोतु तनुतात् ।

उकार विकरण से 'हि' का लोप हो जाता है ॥२१० ॥

उकाराच्च विकरणात्परस्य हेर्लोपो भवति । तनु तनुतात् तनुतं तनुत । तनवानि तनवाव तनवाम । मनुतां मन्वातां मन्वतां । करोतु कुरुतात् कुरुतां कुर्वन्तु । कुरुतां । अतनोत् अतनुतां अतन्वन् । अतनोः । अमनुत अमन्वातां अमन्वत । अमनुथाः अमन्वाथां अमनुध्वं । अमन्वि अमनुवहि अमन्वहि अमनुमहि अमन्महि । अकरोत् अकुरुतां अकुर्वन् । अकुरुत । भावकर्मणोः । तन्यते । मन्यते । "भावकर्मणोश्च । यणाशिषोर्ये" इतीक् आगमः । क्रियते । इति तनादिः ।

अथ क्र्यादिगणः

डुक्रीञ् द्रव्यविनिमये ।

ना क्र्यादेः ॥२११ ॥

क्र्यादेर्विकरणसंज्ञको ना भवति कर्तरि विहिते सार्वधातुके परे । क्रीणाति । उभयेषामिति ईकारः । क्रीणीतः ।

क्र्यादीनां विकरणस्य ॥२१२ ॥

क्र्यादीनां विकरणाकारस्य लोपो भवति स्वरादावगुणे सार्वधातुके परे । क्रीणन्ति । वृञ् संभक्तौ । वृणीते वृणाते वृणते । ग्रहञ् उपादाने ।

सपरस्वरायाः सम्प्रसारणमन्तस्थायाः ॥२१३ ॥

परेण धातुस्वरेण सह अन्तस्थायाः सम्प्रसारणं भवति । इत्यधिकृत्य ।

ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिश्रथिभ्रस्जीनामगुणे ॥२१४ ॥

तनु तनुतात् । तनवानि । मनुतां । करोतु । कुरुतां । अतनोत् । अमनुत । अकरोत् । अकुरुत । भावकर्म में—तन्यते । मन्यते कृ य ते 'यणाशिषोर्ये' इस सूत्र से इकार का आगम होकर 'क्रियते' बना ।

इस प्रकार से तनादि प्रकरण समाप्त हुआ ।

अथ क्र्यादिगण प्रारम्भ होता है ।

डुक्रीञ् खरीदने अर्थ में है ।

कर्ता में सार्वधातुक के आने पर क्र्यादि गण में विकरण संज्ञक 'ना' हो जाता है ॥२११ ॥

क्रीणाति । 'उभयेषामीकारो व्यञ्जनादावदः' सूत्र १५७ से क्र्यादि गण में व्यंजनादि अगुण विभक्ति के आने पर विकरण को ईकार हो जाता है । क्रीणीतः । क्रीणा अन्ति ।

स्वरादि अगुण सार्वधातुक के आने पर क्र्यादि गण में विकरण ना के आकार का लोप हो जाता है ॥२१२ ॥

अतः 'क्रीणन्ति' बना । वृङ् धातु वरण अर्थ में है ।

वृणीते वृणाते वृणते । ग्रहञ् धातु ग्रहण अर्थ में है ।

पर धातु स्वर के साथ अंतस्थ को संप्रसारण हो जाता है ॥२१३ ॥

इस सूत्र को अधिकृत करके—

ग्रह्, ज्या, वय्, व्यध्, वश्, व्यच् प्रच्छ् श्रथ् भ्रस्ज् धातु के अन्तस्थ को पर स्वर के साथ अगुण विभक्ति के आने पर संप्रसारण हो जाता है ॥२१४ ॥

ग्रहादीनामन्तस्थायाः परेण स्वरेण सह सम्प्रसारणं भवत्यगुणे परे। किं सम्प्रसारणं।

सम्प्रसारणं य्वृतोऽन्तस्था निमित्ताः ॥२१५॥

अन्तस्था निमित्ता इ उ ऋतः संप्रसारणसंज्ञा भवन्ति। गृह्णाति गृह्णीतः गृह्णन्ति। गृह्णीते गृह्णाते गृह्णते। ज्या वयोहानौ। जीनाति। भावकर्मणोश्च। जीयते। वेञ् तन्तुसन्ताने। वयति वयतः वयन्ति। वयते। ऊयते। व्यध् ताडने। विध्यति विध्यते। वश कान्तौ।

छशोश्च ॥२१६॥

छशोश्च षो भवति धुट्यन्ते च। वष्टि उष्टः उशन्ति। वक्षि उष्ठः उष्ठ। वश्मि उश्वः उश्मः। उश्यते। व्यच व्याजीकरणे। विचति विचतः विचन्ति। विच्यते। प्रच्छ ज्ञीप्सायां। पृच्छति पृच्छतः पृच्छन्ति। पृच्छते। व्रश्चू छेदने। वृश्चति। वृश्चते। भ्रस्ज पाके। लृवर्णतवर्गलसा इति न्यायात् भृज्जति। भृज्जते। त्रिषु व्यञ्जनेषु संयुज्यमानेषु सजातीयानामेकव्यञ्जनलोपः। क्रीणीयात्। वृणीत। गृह्णीयात् गृह्णीत। क्रीणातु क्रीणीतात् क्रीणीताम्। क्रोणन्तु। क्रीणीहि क्रीणीतात् क्रीणीतं क्रीणीत। क्रीणानि क्रीणीव क्रीणीम। वृणीत। गृह्णातु गृह्णीतात् गृह्णीतां गृह्णन्तु।

आन व्यञ्जनान्ताद्धौ ॥२१७॥

संप्रसारण किसे कहते हैं ?

अन्तस्थ य् व् र् को इ उ ऋ संप्रसारण संज्ञा होती है ॥२१५॥

ग्रह को गृह हो गया गृह्णाति = गृह्णाति गृह्णीतः गृह्णन्ति। गृह्णीते गृह्णाते गृह्णते। ज्यावय की हानि अर्थ में है। ज्या में या को ई होकर 'जीनाति' बना। भाव-कर्म में—जीयते। वेञ् धातु बुनना। वयति। वयते। वे को आकारांत होकर वा को ऊ होकर 'ऊयते'। व्यध्—ताडित करना। य को इ होकर विध्यति। विध्यते। 'वयति' भ्वादिगण में बना है एवं 'विध्यति' दिवादिगण में बना है। वश् धातु—कांति (चमकना)—यह धातु अदादि का है और विकरण का लोप हो जाता है।

धुट् के अन्त में आने पर छ् और श् को ष् हो जाता है ॥२१६॥

वष् होकर 'तवर्गस्य षटवर्गष्टवर्गः' ११८ सूत्र से टवर्ग होकर वष्टि बना। अगुणी में संप्रसारण होकर उष्टः उशन्ति। वक्षि "षढो कः से" ११९वें सूत्र से ष् को क् होकर पुनः सि को षि होकर वक्षि बना है। उष्ठः उष्ठ। वश्मि उश्वः उश्मः। व और म अन्तस्थ, अनुनासिक होने से धुट् नहीं है।

व्यच्—कपट करना। य को इ होकर तुदादि गण में विचति विचतः विचन्ति बना।

विच्यते। प्रच्छ् धातु—प्रश्न करना।

र् को ऋ होकर पृच्छति। पृच्छते। व्रश्चू—छेदन करना। वृश्चति। वृश्चते। भ्रस्ज्—भूनना। "ल वर्ण त वर्ग ल और स ये दन्त्य कहलाते हैं।" 'तवर्गस्य चटवर्गयोगे चटवर्गौ' सूत्र से और दन्त्य होने के न्याय से सकार को त वर्ग मानकर आगे च वर्ग के योग में उसे च वर्ग कर देने से 'भृज्जति' बना। भृज्जते। भ्रस्ज् में र् को ऋ संप्रसारण हुआ है। तीन व्यञ्जनों के संयुक्त करने पर सजातीय में से एक व्यञ्जन का लोप हो जाता है। क्रीणीयात्। वृणीत। गृह्णीयात्। गृह्णीत। क्रीणातु। क्रीणीहि। वृणीत। गृह्णातु।

व्यञ्जनांत धातु से क्र्यादि गण में 'हि' के आने पर विकरण संज्ञक 'आन' हो जाता है ॥२१७॥

व्यञ्जनान्तात् क्र्यादेर्विकरणसंज्ञक आनो भवति हौ परे। गृहाण गृह्णीतात् गृह्णीतं गृह्णीत। गृह्णानि गृह्णाव गृह्णाम। गृह्णीतां। अक्रीणात् अक्रीणीतां अक्रीणन्। अक्रीणाः अक्रीणीतं अक्रीणीत। अक्रीणां अक्रीणीव अक्रीणीम। अवृणीत अवृणातां अवृणत। अवृणीथाः अवृणाथां अवृणीध्वं। अवृणि अवृणीवहि अवृणीमहि। अगृह्णात् अगृह्णीत। भावकर्मणोः—विक्रीयते। व्रियते। गृह्यते। पूञ् पवने।

प्वादीनां ह्रस्वः ॥२१८॥

प्वादीनां ह्रस्वो भवति स्वविकरणे परे। पुनाति पुनीतः पुनन्ति। पुनीयात् पुनीयातां पुनीयुः। पुनातु पुनीतात् पुनीतां पुनन्तु। पुनीहि पुनीतात् पुनीतं पुनीत। पुनानि पुनाव पुनाम। अपुनात् अपुनीतां अपुनन्। अपुनाः अपुनीतं अपुनीत। अपुनां अपुनीव अपुनीम। एवं लूञ् छेदने। लुनाति। लुनीत लुनन्ति। अलुनात्। ज्ञा अवबोधने।

ज्ञश्च ॥२१९॥

ज्ञश्च स्वविकरणे जा भवति। जानाति जानीतः जानन्ति। जानीयात्। जानातु जानीतात् जानीतां जानन्तु। अजानात् अजानीतां अजानन् इति क्र्यादिः।

अथ चुरादिगणः

चुर स्तेये।

चुरादेश्च ॥२२०॥

चुरादेः कारितसंज्ञक इन् भवति स्वार्थे। उपधाया गुणः।

ते धातवः ॥२२१॥

गृहाण। गृह्णीतां। अक्रीणात् दि सि विभक्ति गुणी हैं। अतः विकरण को ईकार नहीं हुआ। अवृणीत। अगृह्णात्। अगृह्णीत। भाव और कर्म में—क्रीयते, विक्रीयते। 'यणाशिषोर्ये' सूत्र १९८ से इकार का आगम होकर व्रियते बना। गृह्यते। पूञ्-पवित्र करना।

अपने विकरण के आने पर पू आदि को ह्रस्व हो जाता है ॥२१८॥

पुनाति पुनीतः पुनन्ति। पुनीयात्। पुनातु। पुनीहि। अपुनात्। लूञ्-छेदना 'लुनाति' लुनीतः लुनन्ति। अलुनात्। ज्ञा-समझना।

स्वविकरण के आने पर 'ज्ञा' को 'जा' हो जाता है ॥२१९॥

जानाति। जानीयात्। जानातु। जानीहि। अजानात्।

इस प्रकार से क्र्यादि गण समाप्त हुआ।

अब चुरादिगण प्रारम्भ होता है।

चुर् धातु—चुराना।

चुरादिगण में स्वार्थ में कारित संज्ञक 'इन्' होता है ॥२२०॥

और उपधा को गुण हो जाता है 'चोरि' बना। पुनः—

वे सन् आदि प्रत्ययान्त धातु संज्ञक हो जाते हैं ॥२२१॥

ते सनादिप्रत्ययान्ता धातुसंज्ञा भवन्ति। अन् विकरणः कर्तरि। अनि च विकरणे इति गुणः। चोरयति चोरयतः चोरयन्ति। मत्रि गुप्तभाषणे। 'अनिदनुबन्धानामगुणे' अत एव इदनुबन्धानां धातूनां नुरागमोऽस्ति गुणागुणे प्रत्यये परे। मन्त्रयते मन्त्रयेते मन्त्रयन्ते। वृञ् आवरणे।

अस्योपधाया दीर्घो वृद्धिर्नाम्निनामिनिचदसु ॥२२२ ॥

अस्योपधाया दीर्घो भवति नाम्यन्तानां वृद्धिर्भवति इन् इच् अट् एषु परतः। वारयति वारयतः वारयन्ति। वारयते। भावकर्मणोश्च।

कारितस्यानामिङ्विकरणे ॥२२३ ॥

कारितस्य लोपो भवति आमिङ्विकरणवर्जिते प्रत्यये परे।

स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥२२४ ॥

स्वरादेशः परनिमित्तकः पूर्ववर्णस्य विधिं प्रति स्थानिवद्भवति। चोर्यते। वार्यते। गुडि सजि पल रक्षणे। गुण्डयति। सञ्जयति। पालयति। उपधाभूतस्येति किं ? अर्च पूजायां। अर्चयति। चोरयेत्। मन्त्रयेत्। वारयेत्। चोरयतु। मन्त्रयतां। वारयतु वारयतां। अचोरयत्। अमन्त्रयत। अवारयत। गुण्डयेत्। गुण्डयतु। अगुण्डयत्। संजयेत। संजयतु। असंजयत्। पालयेत्। पालयतु। अपालयत्। अर्चयेत्। अर्चयतु। आर्चयत्। भावकर्मणोश्च। गुण्ड्यते। संज्यते। पाल्यत। अर्च्यत इत्यादि। एवं सर्वमुन्नेयं। इति चुरादिः।

इस सूत्र से 'चोरि' को धातु संज्ञा होकर 'अन् विकरणः कर्तरि' से अन् विकरण होकर 'अनि च विकरणे' सूत्र २३ से गुण होकर 'चोरयति' बना। मत्रि—गुप्त भाषण करना। 'अनिदनु-बंधानामगुणे' सूत्र ५६ से इकार अनुबंध धातु को नु का आगम होता है गुणी अगुणी प्रत्यय के आने पर। नु का आगम 'मन्त्र्' 'चुरादेश्च' सूत्र से इन् प्रत्यय 'ते धातवः' से धातु संज्ञा होकर अन् विकरण और गुण होकर 'मन्त्रयते' बना। वृञ्—आवरण करना।

इन् इच् अट् प्रत्ययों के आने पर इसकी उपधा को दीर्घ होता है और नाम्यन्त को वृद्धि होती है ॥२२२ ॥

वृ को वृद्धि होने से वार् इन् होकर धातु संज्ञा होकर अन् विकरण एवं गुण होकर 'वारयति' बना। वारयते इत्यादि। भाव और कर्म में—

आम् और इट् प्रत्यय को छोड़कर अन्य प्रत्यय के आने पर कारित संज्ञक 'इन्' प्रत्यय का लोप हो जाता है ॥२२३ ॥

परनिमित्तक स्वरादेश पूर्व वर्ण की विधि के प्रति स्थानिवत् होता है ॥२२४ ॥

अतः चोर्यते, मन्त्र्यते, वार्यते। गुड्, सज्, पल्—रक्षण करना।

इन प्रत्यय, धातु संज्ञा, नु का आगम, अन् विकरण और गुण होकर गुण्डयति। सञ्जयति। पालयति। उपधाभूत को ही दीर्घ हो ऐसा क्यों कहा ? अर्च-पूजा अर्थ में है। इन् प्रत्यय होकर गुण होकर 'अर्चयति'। चोरयेत्। मन्त्रयेत। वारयेत्। चोरयतु। मन्त्रयतां। वारयतु। वारयतां। अचोरयत्। अमन्त्रयत। अवारयत। गुण्डयेत्। गुण्डयतु। अगुण्डयत्। संजयेत्। संजयतु। असञ्जयत्। पालयेत्। पालयतु। अपालयत्। अर्चयेत्। अर्चयतु। आर्चयत्।

सार्वं तीर्थकराख्यानं धातोस्तत्प्रकृतेरभूत्।
शास्त्रमेतत् तत्र मुख्यं सार्वधातुकमुच्यते ॥१॥

इत्याख्याते सार्वधातुकं ⌴

अथाऽसार्वधातुकमुच्यते

भूतकरणवत्यश्च ॥२२५॥

इति अतीतमात्रे अद्यतनी भवति अद्यभवोऽद्यतनः। तत्रातीतेऽद्यतनी भवति। भू सत्तायां।

सिजद्यतन्याम् ॥२२६॥

धातोः सिज्भवति अद्यतन्यां परतः।

इडागमोऽसार्वधातुकस्यादिव्यञ्जनादेरयकारादेः ॥२२७॥

धातोः परस्य व्यञ्जनादेरयकारादेरसार्वधातुकस्यादाविडागमो भवति।

इणिक्स्थादापिबतिभूभ्यः[१] सिचः परस्मै ॥२२८॥

इणादिभ्यः परस्यः सिचो लुग्भवति परस्मैपदे परे।

भवतेः सिज्लुकि ॥२२९॥

भुव इडागमो न भवति सिज्लुकि।

भाव और कर्म में—गुण्ड्यते। सज्ज्यते। पाल्यते। अर्च्यते। इत्यादि। इसी प्रकार से सभी धातुओं के रूप चला लेना चाहिये।

इस प्रकार से चुरादिगण समाप्त हुआ।

सभी का हित करने वाले तीर्थंकर भगवान् के उपदेश में धातु और प्रकृति का शास्त्र हुआ है उसमें भी सार्वधातुक प्रकरण मुख्य कहा जाता है ॥१॥

इस प्रकार से आख्यात में सार्वधातुक प्रकरण समाप्त हुआ। ⌴

अथ असार्वधातुक प्रकरण प्रारंभ होता है।

भूतकाल में अद्यतनी होती है ॥२२५॥

अतीत मात्र के अर्थ में अद्यतनी होती है। आज का ही होने वाला भूतकाल 'अद्यतन' कहलाता है। उस अतीत काल में अद्यतनी होती है। भू—सत्ता अर्थ में है।

अद्यतनी परे धातु से सिच् प्रत्यय होता है ॥२२६॥

धातु से परे यकारादि रहित, व्यञ्जनादि जो असार्वधातुक उसकी आदि में 'इट्' का आगम होता है ॥२२७॥

परस्मैपद में इण् इक् स्था दा पिब् और भू धातु से परे सिच् का 'लुक्' हो जाता है ॥२२८॥

सिच् का लुक् होने पर 'भू' से इट् का आगम नहीं होता है ॥२२९॥

---

१ इण्स्था—इत्यादि सूत्रं हस्तलिखिते पुस्तके वर्तते। इक तत्र न गृहीतं।

भुवः सिज्लुकि ॥२३० ॥

भुवो गुणो न भवति सिज्लुकि। अभूत् अभूतां।

भुवो वोन्तः परोक्षाद्यतन्योः ॥२३१ ॥

भूधातोरन्ते वकारागमो भवति परोक्षाद्यतन्योः स्वरे परे। अभूवन्। अभूः अभूतं अभूत। अभूवं अभूव अभूम। इण् गतौ।

इणो गाः ॥२३२ ॥

इणो गा भवत्यद्यतन्यां परतः।

अनिडेकस्वरादातः ॥२३३ ॥

एकस्वरादाकारात्परमसार्वधातुकमनिड् भवति। अगात् अगातां।

आलोपोऽसार्वधातुके ॥२३४ ॥

धातोराकारस्य लोपो भवत्यसार्वधातुके स्वरादावगुणे परे। अगुः। अगाः अगातं अगात। अगाम् अगाव अगाम। इक् स्मरणे।

इकोऽपि ॥२३५ ॥

इकोऽपि गा भवत्यद्यतन्यां परतः। इङिकावध्युपसर्गं न व्यभिचरतः। अध्यगात् अध्यगातां अध्यगुः। अस्थात् अस्थातां अस्थुः। अधात्। अदात्। इत्यादि।

इङ् अध्ययने।

सिच् का लुक् होने पर भू को गुण नहीं होता है ॥२३०॥

अतः भू द् ह्यस्तनी अद्यतनी आदि में धातु की आदि में अट् का आगम होकर 'अभूत्' अभूतां बन गया।

अभू अन् है।

परोक्षा और अद्यतनी में स्वर विभक्ति के आने पर भू धातु के अंत में 'वकार' का आगम हो जाता है ॥२३१॥

अभूवन्। अभूः अभूतं अभूत। अभूवम् अभूव अभूम। इण्—गति अर्थ में है।

इण् धातु को अद्यतनी में 'गा' आदेश हो जाता है ॥२३२॥

आकारांत एक स्वर वाली धातु असार्वधातुक में इट् रहित होती है ॥२३३॥

अगात् अगातां। अन् को उस् होकर—

असार्वधातुक में स्वरादि अगुणी विभक्ति के आने पर धातु के आकार का लोप हो जाता है ॥२३४॥

अगुः। इक् धातु स्मरण अर्थ में है।

अद्यतनी में इक् को भी 'गा' आदेश हो जाता है ॥२३५॥

इङ् और इक् धातु 'अधि' उपसर्ग को व्यभिचरित नहीं करते हैं अर्थात् इनमें 'अधिः' उपसर्ग अवश्य लगता है। अध्यगात् अध्यगातां अध्यगुः। स्था धातु से—अस्थात्। धा दा धातु से अधात्। अदात् इत्यादि। इङ् धातु अध्ययन अर्थ में है।

अद्यतनीक्रियातिपत्त्योर्गी वा ॥२३६ ॥

अद्यतनीक्रियातिपत्त्योरात्मनेपदे परे इङो वा गी आदेश इष्यते ।

इवर्णादश्विश्रिडीङ्शीङः ॥२३७ ॥

श्विवश्रिडीङ्शीङ्वर्जितादेकस्वरादिवर्णात्परमसार्वधातुकमनिङ् भवति । आदेशबलादगुणित्वे । अध्यगीष्ट अध्यगीषातां अध्यगीषत । अध्यगीष्ठाः अध्यगीषाथां ।

सिचो धकारे ॥२३८ ॥

सिचो लोपो भवति धकारे परे ।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ॥२३९ ॥

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढो भवति । अध्यगीढ्वं । अध्यगीषि अध्यगीष्वहि अध्यगीष्महि । पक्षे स्वरादीनां वृद्धिरादेः । अध्यैष्ट अध्यैषातां अध्यैषत । अध्यैष्ठाः अध्यैषाथां अध्यैढ्वं । अध्यैषि अध्यैष्वहि अध्यैष्महि । परस्मै इति किम् ?

भूप्राप्तौ ॥२४० ॥

भूधातोः भूप्राप्तावात्मनेपदी भवति । अभविष्ट अभविषातां अभविषत । अभविष्ठाः अभविषाथां अभविढ्वं । अभविषि अभविष्वहि अभविष्महि । समवप्रविभ्यश्चेति स्था रुवादिः ।

स्थादोरिरद्यतन्यामात्मने ॥२४१ ॥

स्थादासंज्ञकयोरन्तस्य इर्भवति अद्यतन्यामात्मनेपदे परे ।

अद्यतनी और क्रियातिपत्ति में आत्मनेपद के आने पर 'इङ्' को विकल्प से 'गी' आदेश होता है ॥२३६ ॥

श्वि, श्रि, डीङ्, शीङ् को छोड़कर एक स्वरादि वर्ण से परे असार्वधातुक अनिद् होते हैं ॥२३७ ॥

आत्मनेपद में 'त' विभक्ति में अध्यगीष् में सिच् पर में रहते गुण क्यों नहीं हुआ गी आदेश करने से गुण नहीं होता है अध्यगीष्ट बना, इसमें सिच् का आगम होकर स् को ष् हुआ है और ष् के निमित्त से तवर्ग को टवर्ग हुआ है । अध्यगीष्ध्वं है ।

धकार के आने पर सिच् का लोप हो जाता है ॥२३८ ॥

नाम्यंत धातु से आशी अद्यतनी और परोक्षा में 'ध' को ढ् हो जाता है ॥२३९ ॥

अतः अध्यगीढ्वं बना । पक्ष में जब 'गी' आदेश नहीं हुआ तब 'इ' को 'स्वरादीनां वृद्धिरादेः' सूत्र ४८ से पूर्व स्वर को वृद्धि होकर सिच् होकर 'अध्यैष्ट' बना ।

परस्मैपद में ऐसा क्यों कहा ?

भू धातु प्राप्ति अर्थ में आत्मनेपदी होता है ॥२४० ॥

आत्मनेपद में 'सिच् इट्' होकर 'अभविष्ट' बनेगा । सम्, अव, प्र, वि उपसर्ग से परे स्था धातु रुवादि हो जाता है अर्थात् इन उपसर्गों के योग से स्था धातु आत्मनेपद में चलता है । सम् अस्था त ।

आत्मनेपद में अद्यतनी से स्था, दा संज्ञक धातु के अंत को इकार होता है ॥२४१ ॥

स्थादोश्च ॥२४२ ॥

स्थादासंज्ञकयोर्गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे ।

ह्रस्वाच्चानिटः ॥२४३ ॥

ह्रस्वात्परस्य अनिटः सिचो लुग्भवति धुटि परे ॥ समस्थित समस्थिषातां समस्थिषत । समस्थिथाः समस्थिषाथां समस्थिध्वं । समस्थिषि समस्थिष्वहि समस्थिष्महि ॥ अदित अदिषातां अदिषत । अदिथाः अदिषाथां अदिध्वं । अदिषि अदिष्वहि । अदिष्महि । ऐधिष्ट ऐधिषातां ऐधिषत । ऐधिष्ठाः ऐधिषाथां ऐधिध्वं । ऐधिषि ऐधिष्वहि ऐधिष्महि ।

पचिवचिसिचिरुचिमुचेश्चात् ॥२४४ ॥

एभ्यः पञ्चभ्यः परमसार्वधातुकमनिड् भवति ।

अस्य च दीर्घः ॥२४५ ॥

व्यञ्जनान्तानामनिटामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे ।

सिचः ॥२४६ ॥

सिचः परयोर्दिस्योरादिरीद्भवति । अपाक्षीत् ।

धुट्श्च धुटि ॥२४७ ॥

धुटः परस्य सिचो लोपो भवति धुटि परे । अपाक्तां अपाक्षुः । अपाक्षीः अपाक्तं अपाक्त । अपाक्षं अपाक्ष्व अपाक्ष्म । अपक्त अपक्षातां अपक्षत । अपक्थाः अपक्षाथां अपग्ध्वं । अपक्षि अपक्ष्वहि अपक्ष्महि । वद व्यक्तायां वाचि ।

स्था दा संज्ञक धातु को अनिट् सिच् आशीस के आने पर आत्मनेपद में गुण नहीं होता है ॥२४२ ॥

ह्रस्व से परे इट् नहीं होने से सिच् का लोप हो जाता है ॥२४३ ॥

समस्थित, प्रास्थित आदि बनेंगे । दा धातु से अदित अदिषातां अदिषत ।

एध् धातु से ऐधिष्ट ऐधिषातां ऐधिषत ।

पच् वच् सिच् रुच् और मुच् ये पांच धातु असार्वधातुक में इट् रहित होते हैं ॥२४४ ॥

परस्मैपद में सिच् के आने पर व्यञ्जनान्त अनिट् धातु की उपधा के अकार को दीर्घ हो जाता है ॥२४५ ॥

सिच् के परे दि और सि विभक्ति की आदि में 'ई' हो जाता है ॥२४६ ॥

पच् दि है सिच् अट् उपधा को दीर्घ, 'ई' आदेश होकर अपाक्ष् ई त् = अपाक्षीत् बना ।

धुट से परे धुट् के आने पर सिच् का लोप हो जाता है ॥२४७ ॥

अपाक्तां अपाक्षुः । आत्मनेपद में पच् की उपधा को दीर्घ न होकर अपक्त अपक्षातां अपक्षत बना ।

वद—स्पष्ट बोलना ।

वदव्रजरलन्तानां च ॥२४८ ॥

वदव्रजरलन्तानामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे ।

इटश्चेटि ॥२४९ ॥

इटः परस्य सिचो लोपो भवति ईटि परे । अवादीत् अवादिष्टां अवादिषुः । धज ध्वज वज व्रज गतौ । प्राव्राजीत् प्राव्राजिष्टां प्राव्राजिषुः । वर ईप्सायां । अवारीत् अवारिष्टां अवारिषुः । चर गतिभक्षणयोः । अचारीत् अचारिष्टां अचारिषुः । फल निष्पत्तौ । अफालीत् अफालिष्टां अफालिषुः । शल श्वल्ल आशुगतौ । अशालीत् । अशालिष्टां अशालिषुः । अशालीः अशालिष्टं अशालिष्ट । अशालिषं अशालिष्व अशालिष्म ।

व्यञ्जनादीनां सेटामनेदनुबन्धहम्यन्तकणक्षणश्वसवधां वा ॥२५० ॥

एदनुबन्धहम्यन्तकणक्षणश्वसवर्जितानां सेटां व्यञ्जनादीनां धातूनां उपधाभूतस्यास्य दीर्घो भवति वा परस्मैपदे सिचि परे । रद विलेखने । अरादीत् अरादिष्टां अरादिषुः । अरदीत् अरदिष्टां अरदिषुः । गद् व्यक्तायां वाचि । अगादीत् अगादिष्टां अगादिषुः । अगदीत् अगदिष्टां अगदिषुः । व्यञ्जनादीनामिति किं ?

मायोगेऽद्यतनी ॥२५१ ॥

माशब्दयोगे धातोरद्यतनी भवति । अट पट इट किट कट गतौ । मा भवानटीत् मा भवन्तावटिष्टां । मा भवन्तोऽटिषुः । मा त्वमटीः मा युवामटिष्टं मा यूयमटिष्ट । माहमटिषं मा वामटिष्व मा वयमटिष्म । सेटामिति किं ? अपाक्षीत् अपाक्तां अपाक्षुः । अपाक्षीः अपाक्तं अपाक्त । अपाक्षं अपाक्ष्व अपाक्ष्म । नित्यमुपधाभूतस्येति किं ? अव रक्ष पालने । अरक्षीत् अरक्षिष्टां अरक्षिषुः । अरक्षीः अरक्षिष्टं अरक्षिष्ट । अरक्षिषं अरक्षिष्व अरक्षिष्म् । तक्षू त्वक्षू तनूकरणे । अतक्षीत् । अत्वक्षीत् । अस्येति किं ? मुष स्तेये ।

परस्मैपद में सिच् के आने पर वद् व्रज रकारान्त और लकारांत धातु की उपधा के अकार को दीर्घ हो जाता है ॥२४८ ॥

इट् के परे ईट् के आने पर सिच् का लोप हो जाता है ॥२४९ ॥

अवादीत् । अवादिष्टां अवादिषुः । धृज ध्वज वज व्रज धातु गति अर्थ में हैं । प्राव्राजीत् । वर ईप्सा अर्थ में है । अवारीत् । चर-गति और भक्षण । अचारीत् । फल-निष्पत्ति अर्थ में है । अफालीत् । शल श्वल्ल-शीघ्रगति अर्थ में है । अशालीत् अशालिष्टां अशालिषुः ।

एत् अनुबंध, हकार मकारांत, कण क्षण श्वस और वध इन धातुओं से रहित इट् सहित व्यंजनादि धातु के उपधाभूत अकार को परस्मैपद में सिच् के आने पर दीर्घ विकल्प से होता है ॥२५० ॥

रद-विलेखन अर्थ में । अरादीत् । अरदीत् । गद्-स्पष्ट बोलना । अगादीत्, अगदीत् । व्यंजनादि धातुओं को ऐसा क्यों कहा ?

मा शब्द के योग में धातु से अद्यतनी विभक्ति हो जाती है ॥२५१ ॥

अट पट इट किट कट गति अर्थ में हैं, अटीत् माभवानटीत् । इसमें उपधा को दीर्घ नहीं हुआ । इट् सहित हो ऐसा क्यों कहा ? अपाक्षीत् । यह इट् रहित है अतः विकल्प नहीं हुआ । नित्य ही उपधा भूत हो ऐसा क्यों कहा ? अव, रक्ष पालन अर्थ में हैं । अरक्षीत् । तक्षू त्वक्षू-कृश-करना । अतक्षीत् । अत्वक्षीत् । अकार को ही ऐसा क्यों कहा ? मुष-चुराना । अमोषीत् । कुष्-निष्कर्ष अर्थ में है । अकोषीत् । वर्जन ऐसा क्यों कहा ? खगै-हंसना । अखगीत् । रगे-शंका अर्थ में । अरगीत् ।

अमोषीत् अमोषिष्टां अमोषिषुः। कुष निष्कर्षे। अकोषीत् अकोषिष्टां अकोषिषुः। वर्जनं किं ? खगे हसने अखगीत् अखगिष्टां अखगिषुः। रगे शङ्कायां। अरगीत्। कगे नोचिते। अकगीत् अकगिष्टां अकगिषुः। ग्रहञ् उपादाने॥ अग्रहीत् अग्रहीष्टां अग्रहीषुः। इटो दीर्घो ग्रहेरपरोक्षायामिति दीर्घः। वह परिकल्कने। रह त्यागे। अरहीत् अरहिष्टां अरहिषुः। टुवमु उद्गिरणे। अवमीत्। क्रमु पादविक्षेपे। अक्रमीत् अक्रमिष्टां अक्रमिषुः। चमु छमु जमु झमु जिमु अदने। अचमीत्। अच्छमीत्। अजमीत्। अझमीत्। अजिमीत्। अजिमिष्टां अजिमिषुः। व्यय क्षये। अव्ययीत् अव्ययिष्टां अव्ययिषुः। अय वय मय पय तय चय रय णय गतौ। आयीत्। अवयीत्। अमयीत्। अपयीत्। अतयीत्। अचयीत्। अरयीत्। अनयीत् अनयिष्टां अनयिषुः। कण निमीलने। अकणीत्। क्षण क्षुण हिंसायां। अक्षणीत्। श्वस प्राणने। अश्वसीत् अश्वसिष्टां अश्वसिषुः। हनु हिंसागत्योः। अद्यतन्यां च वधादेशः। अवधीत् अवधिष्टां अवधिषुः। इत्यादि। टुणदि समृद्धौ। अनन्दीत् अनन्दिष्टां अनन्दिषुः। श्रंसु ध्रंसु अवस्रंसने। ध्वंस गतौ च। अश्रंसिष्ट अश्रंसिषातां अश्रंसिषत। अश्रंसिष्ठाः अश्रंसिषाथां अश्रंसिढ्वं। अश्रंसिषि अश्रंसिष्वहि अश्रंसिष्महि। अध्रंसिष्ट अध्रंसिषातां अध्रंसिषत। अध्वंसिष्ट। व्येञ् संवरणे।

सन्ध्यक्षरान्तानामाकारोऽविकरणे ॥२५२॥

सन्ध्यक्षरान्तानां धातूनां आकारो भवति अविकरणे परे।

यमिरमिनम्यादन्तानां सिरन्तश्च ॥२५३॥

एषामिडागमः सकारपूर्वो भवति परस्मैपदे सिचि परे। यमु उपरमे। अयंसीत् अयंसिष्टां अयंसिषुः। रमु क्रीडायां। अरंसीत् अरंसिष्टां अरंसिषुः।

कगे-अनुचित अर्थ में। अकगीत्। ग्रहञ् ग्रहण करना। अग्रहीत् अग्रहीष्टां अग्रहीषुः। "इटो दीर्घो ग्रहेरपरोक्षायां" इस २९० सूत्र से इट् को सर्वत्र दीर्घ हो गया है। वह—परिकल्कने। रह—त्याग अर्थ में है। अरहीत्। टुवम् उद्गिरण-उगलने अर्थ में है। वमति—अवमीत्, क्रमु-पाद विक्षेपण करना। अक्रमीत्। चमु छमु जमु झमु जिमु—खाने अर्थ में है। अचमीत्। अच्छमीत्। अजमीत्। अझमीत्। अजिमीत्। व्यय—क्षय होना। अव्ययीत्। अय, वय, मय, पय, तय, चय, रय, णय, गति अर्थ में हैं। आयीत्। अवयीत्। अमयीत्। अपयीत्। अतयीत्। अचयीत्। अरयीत्। अनयीत्। कण-निमीलन अर्थ में है। अकणीत्। क्षण क्षुण-हिंसा अर्थ में। अक्षणीत्। श्वस्—जीवित रहना। अश्वसीत्। हनु-हिंसा और गति अर्थ में है। 'अद्यतन्यां च वधादेशः' अद्यतनी में हन् को वध आदेश हो जाता है। अवधीत्। इत्यादि टुणदि धातु समृद्धि अर्थ में है। 'णो नः' सूत्र से न होकर इकार अनुबंध से 'नु' का आगम होकर अनन्दीत्। श्रंसु ध्रंसु-अवश्रंसन अर्थ में। ध्वंस-गति अर्थ में। अश्रंसिष्ट अध्रंसिष्ट। अध्वंसिष्ट। आत्मनेपद में हैं। व्येञ्-संवरण करना।

अविकरण में संध्यक्षरांत धातु को आकार हो जाता है ॥२५२॥

यम् रम् नम् और आकारांत धातु को परस्मैपद सिच् के आने पर इट् का आगम सकारपूर्वक होता है ॥२५३॥

यमु-उपरम होना। अयंसीत् अयंसिष्टां अयंसिषुः। रमु-क्रीडा करना। अरंसीत् अरंसिष्टां अरंसिषुः।

व्याङ्परिभ्यो रमः ॥२५४॥

विआङ्परिभ्यः परस्य रमुधातोः परं परस्मैपदं भवति॥ व्यरंसीत्। णमु प्रह्वत्वे शब्दे। अनंसीत्। अव्यासीत् अव्यासिष्टां अव्यासिषुः। अव्यास्त अव्यासातां अव्यासत।

सणनिटः शिडन्तान्नाम्युपधाददृशः ॥२५५॥

दृशवर्जितात् नाम्युपधादनिटः शिडन्ताद्धातोः सण् भवति अद्यतन्यां परतः। सिचोपवादः। रिश रुश हिंसायां। क्रुश आह्वाने गाने रोदने च। लिश विच्छ गतौ। क्रुश ह्वरणदीप्त्योः।

रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदंशेः शात् ॥२५६॥

एभ्यः परमसार्वधातुकमनिड् भवति। अरिक्षत् अरिक्षतां अरिक्षन्। अरिक्षः अरिक्षतं अरिक्षत। अरिक्षं अरिक्षाव अरिक्षाम। अक्रुक्षत् अक्रुक्षतां अक्रुक्षन्। अक्रुक्षः अक्रुक्षतं अक्रुक्षत।

सणो लोपः स्वरे बहुत्वे ॥२५७॥

सणोऽस्य लोपो भवत्यबहुत्वे स्वरे परे। अक्रुक्षम् अक्रुक्षाव अक्रुक्षाम्। विश प्रवेशने। अविक्षत्। त्विष दीप्तौ।

त्विषिपुष्यतिकृषिश्लिष्यतिद्विषिपिषिविषिशिषिशुषितुषिदुषेः षात् ॥२५८॥

एभ्यः परमसार्वधातुकमनिड् भवति। अत्विक्षत् अत्विक्षतां अत्विक्षन्। कृष विलेखने। अकृक्षत् अकृक्षतां अकृक्षन्। श्लिष आलिङ्गने। अश्लिक्षत्। द्विष अप्रीतौ। अद्विक्षत्। पिष्लृ संचूर्णने। अपिक्षत्। विष्लृ व्याप्तौ। अविक्षत्। शिष्लृ विशेषणे। तुष तुष्टौ। अतुक्षत्। दुष वैकृत्ये। अदुक्षत् अदुक्षतां अदुक्षन्। दुह प्रपूरणे।

वि और आङ् उपसर्ग से परे रम धातु परस्मैपद में होती है ॥२५४॥

व्यरंसीत्। णमु धातु नमस्कार करने और शब्द करने अर्थ में है। अनंसीत्। अव्यासीत्। अव्यासिष्टां। अव्यास्त, अव्यासातां।

दृश वर्जित, नामि उपधा से अनिट् और शिट् अंत वाली धातु को अद्यतनी में 'सण्' हो जाता है ॥२५५॥

और सिच् का अपवाद हो जाता है। सण् प्रत्यय लाने पर गुण वृद्धि नहीं होता है। रिश रुश-हिंसा करना। क्रुश-आह्वानन करना, गाना, रोना। लिश, विच्छ्-गमन करना। क्रुश-हरण और दीप्ति। विश्-प्रवेश करना। दिश-अतिसर्जन करना।

रिश् रुश् क्रुश् लिश् विश् दिश् दृश् स्पृश् मृश् और दंश् धातु अनिट् होती हैं ॥२५६॥

'छशोश्च' सूत्र से श को ष हुआ, 'षढो कः से' सूत्र से ष को क होकर सण् के स को ष होकर अरिक्षत् अरिक्षतां अरिक्षन्। अक्रुक्षत्।

अबहुत्व स्वर के आने पर सण् के अकार का लोप हो जाता है ॥२५७॥

अक्रुक्षम्। विश-प्रवेश अर्थ में। अविक्षत्। त्विष्-दीप्त होना। पुष्-पुष्ट होना।

त्विष् पुश् कृष् श्लिष् द्विष् पिष् विष् शिष् शुष् तुष् और दुष् धातु से परे असार्वधातुक में इट् नहीं होता है ॥२५८॥

अत्विक्षत्। कृष-विलेखन करना। अकृक्षत्। श्लिष्-आलिंगन करना। अश्लिक्षत्। द्विष् अप्रीति अर्थ में है—अद्विक्षत्। पिष्लृ-चूर्ण करना। अपिक्षत्। विष्लृ-व्याप्त होना। अविक्षत्। शिष्लृ—विशेष करना। तुष्-तुष्ट होना अतुक्षत्। दुष्-दुषित होना। अदुक्षत्। दुह्-प्रपूरण अर्थ में।

दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात् ॥२५९ ॥

एभ्यः परमसार्वधातुकमनिड् भवति। अधुक्षत् अधुक्षतां अधुक्षन्। दिह उपचये। अधिक्षत्। अनिटामिति किं ? कुष निष्कर्षे। अकोषीत् अकोषिष्टां अकोषिषुः। शिडन्तादिति किं ? अभुक्त अभुक्षातां अभुक्षत। अभुक्थाः अभुक्षाथां अभुग्ध्वं। अभुक्षि अभुक्ष्वहि अभुक्ष्महि। नाम्युपधादिति किं ? दह भस्मीकरणे। अधाक्षीत्। प्रकृत्याश्रितमन्तरङ्गं प्रत्ययाश्रितं बहिरङ्गं। "अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान्। इति धत्वं चतुर्थत्वं च। अदाग्धां अधाक्षुः। अधाक्षीः अदाग्धं अदाग्ध। अधाक्षं अधाक्ष्व अधाक्ष्म। अदृश इति किं ? दृशिर् प्रेक्षणे।

सृजिदृशोरागमोऽकारः स्वरात्परो धुटि गुणवृद्धिस्थाने ॥२६० ॥

सृजिदृशोः स्वरात्परोऽकारागमो भवति गुणवृद्धिस्थाने धुटि परे। अद्राक्षीत् अद्राष्टां अद्राक्षुः।

भृजादीनां षः ॥२६१ ॥

भृजादीनां षो भवति धुट्यन्ते च। सृज विसर्गे। असाक्षीत् असाष्टां असाक्षुः। इति भ्वादिः ॥ ❑

अथ अदादिगण

अदेर्घस्लृ सनद्यतन्योः ॥२६२ ॥

अदेर्घस्लृ आदेशो भवति सनद्यतन्योः परतः।

दह् दिह् दुह् मिह् रिह् रुह् लिह् लुह् नह् वह् इन हकारांत धातुओं को असार्वधातुक में इट् नहीं होता है ॥२५९ ॥

अदुह् स् त् = अधुक्षत्। दिह् उपचय अर्थ में है। अधिक्षत्। इट् रहित हो ऐसा क्यों कहा ? कुष निष्कर्ष अर्थ में है। अकोषीत्। शिडन्त हो ऐसा क्यों कहा ? भुज्-पालन करने और भोजन करने में है। अभुक्त अभुक्षातां अभुक्षत। नामि उपधा से हो ऐसा क्यों कहा ?

दह, भस्म करने अर्थ में है। अधाक्षीत् बना। 'प्रकृति से आश्रित कार्य अन्तरंग कार्य है एवं प्रत्यय के आश्रित कार्य बहिरंग कार्य है एवं अंतरंग और बहिरंग विधि में अंतरंग विधि बलवान होती है' इसलिये द को चतुर्थ अक्षर 'ध' हो गया है। अदाग्धां अधाक्षुः। दृश् को छोड़कर ऐसा क्यों कहा ? दृशिर्-देखना।

सृज् और दृश के स्वर से परे धुट् के आने पर गुणवृद्धि के स्थान में अकार का आगम हो जाता है ॥२६० ॥

अद्राक्षीत् अद्राष्टां अद्राक्षुः।

धुट् के अन्त में आने पर भृज् आदि के अन्त को षकार हो जाता है ॥२६१ ॥

सृज् धातु विसर्ग अर्थ में है। असाक्षीत् असाष्टां असाक्षुः।

इस प्रकार से भ्वादिगण में अद्यतनी प्रकरण समाप्त हुआ। ❑

अथ अदादि गण प्रारम्भ होता है।

सन् और अद्यतनी में अद् को घस्लृ आदेश हो जाता है ॥२६२ ॥

पुषादिगण, द्युतादि गण, लृकारानुबंध, ऋ सृ और शास् धातु से।

पुषादिद्युताद्यृदितः परस्मैपदेषु ॥२६३॥

एभ्योऽण् भवति अद्यतन्यां परस्मैपदे। सिचोऽपवादः। अघसत् अघसतां अघसन्। पुष पुष्टौ॥ अपुषत् अपुषतां अपुषन्। शुष शोषणे। अशुषत् अशुषतां अशुषन्। द्युत शुभ रुच दीप्तौ। अद्युतत् अद्युततां अद्युतन्। अद्युतः अद्युततं अद्युतत। अद्युतं अद्युताव अद्युताम। अशुभत्। अरुचत्। श्वित आवर्णे। अश्वितत्। षु, श्रु, द्रु, द्रु, ऋच्छ, गम्लृ, सृप्लृ गतौ।

अर्तिसत्योरिणि ॥२६४॥

अर्तिसत्योर्गुणो भवति अणि परे। आरत् असरत्। शासु अनुशिष्टौ।

शासेरिदुपधाया अण्व्यञ्जनयोः ॥२६५॥

शासेरुपधाया इद्भवति अण्व्यञ्जनयोः परतः।

शासिवसिघसीनां च ॥२६६॥

निमित्तात् परः शासिवसिघसीनां सकारः षत्वमापद्यते। अशिषत्। परस्मा इति किं ? व्यद्योतिष्ट व्यद्योतिषातां व्यद्योतिषत। शीङ् स्वप्ने। अशयिष्ट। ब्रुवो वचिरिति वचिरादेशः।

अणऽसुवचिग्रहादिलिपिसिचिह्वः ॥२६७॥

एभ्योऽण् भवति अद्यतन्यां परतः। असु क्षेपणे।

अस्यतेस्थोन्तः ॥२६८॥

अस्यतेरन्ते थकारागमो भवत्यणि परे। अपास्थत् अपास्थताम् अपास्थन्।

अणि वचेरोदुपधायाः ॥२६९॥

वचेरुपधाया ओद्भवति कर्तरि विहितायामद्यतन्यामणि परे। अवोचत्। अवोचत। ख्या प्रकथने।

रंजेः पञ्चमो लोप्यो भवति उषिघिनिणोः परतः ॥ रज्यते इत्येवं शिल्पमस्य ॥ रजकः रजकी ।

गस्थकः ॥५७९ ॥

गायतेः शिल्पिन्यर्थे थको भवति । गाथकः । गाथकी ।

ण्युट् च ॥५८० ॥

गायतेः शिल्पिन्यर्थे ण्युट् च भवति । गायनः गायनी ।

हः कालव्रीह्योः ॥५८१ ॥

ओहाङ्गतौ कालेव्रीह्यर्थे च ण्युट् भवति जहति काले भावानिति हायनः संवत्सरः । जहत्युदकमिति हायना व्रीहयः ।

आशिष्यकः ॥५८२ ॥

आशिषि गम्यमाने धातोरकप्रत्ययो भवति । जीव प्राणधारणे । जीवतात् जीवकः । एवं नन्दकः ।

प्रुस्रुसुल्वां साधुकारिणि ॥५८३ ॥

एषां साधुकारिण्यर्थे अकः प्रत्ययो भवति । साधुकरणं शिल्पमेव । च्युङ् छ्युङ् प्रुङिति दण्डकधातुः । साधु प्रवते साधुप्रवकः । एवं स्रवकः । सरकः । लवकः । साधु सरतीति । साधु लुनातीति । सृ गतौ । इत्यादि ।

कर्मण्यण् ॥५८४ ॥

उष् घिनी, ण् से परे रंज के पंचम अक्षर का लोप हो जाता है ॥५७८ ॥

रंगना यह है काम जिसका रजकः रजकी ।

गा धातु से शिल्पी अर्थ में थक प्रत्यय होता है ॥५७९ ॥

गाथकः गाथकी ।

गा धातु से शिल्पी अर्थ में ण्युट् प्रत्यय भी होता है ॥५८० ॥

गायनः गायनी ५५९ से 'यु' को अन आदेश हुआ है ।

ओहाक् धातु से काल और व्रीहि अर्थ में ण्युङ् प्रत्यय होता है ॥५८१ ॥

जहाति काले भावान् इति 'हायनः' संवत्सरः 'आपिरिच्यादंतानां' से आय् हुआ है जो उदक को छोड़ते हैं हायनाः व्रीह्यः ।

आशिष् अर्थ में धातु से अक प्रत्यय होता है ॥५८२ ॥

जीव—प्राण धारण करना जीवतात् = जीवकः नंदकः इत्यादि ।

प्रु स्रु सु लु से परे साधुकरण अर्थ में अक प्रत्यय होता है ॥५८३ ॥

साधुकरण शिल्प ही है । च्युङ् छ्युङ्प्रुङ् ये दण्डक धातु हैं । साधु प्रवते = साधु प्रवकः, स्रवकः, सरकः, लवकः । साधु सरतीति साधु लुनातीति । सृ—गमन करना । इत्यादि ।

कर्म उपपद में रहने पर धातु से अण् प्रत्यय होता है ॥५८४ ॥

कर्मण्युपपदे धातोरण् भवति। कुम्भं करोतीति कुम्भकारः। एवं काण्डलावः। वेदाध्यायः। कुम्भकारी।

ह्वावामश्च ॥५८५॥

एभ्यः कर्मण्युपपदे अण् भवति। मित्राह्वायः। तन्तुवायः। धान्यमायः।

शीलिकामिभक्षाचरिभ्यो णः ॥५८६॥

एभ्यो णो भवति कर्मण्युपपदे। दधिशीला। दधिकामा। दधिभक्षा। कल्याणाचारा स्त्रां।

आतोऽनुपसर्गात्कः ॥५८७॥

कर्मण्युपपदेऽनुपसर्गादाकारान्ताद्धातोः को भवति। धनं ददातीति धनदः। एवं सर्वज्ञः।

नाम्नि स्थश्च ॥५८८॥

नाम्नि उपपदे तिष्ठतिराकारान्ताच्च को भवति। समे तिष्ठतीति समस्थः। कूटस्थः। कच्छेन पिबतीति कच्छपः। द्वाभ्यां पिबतीति द्विपः।

तुन्दशोकयोः परिमृजापनुदोः ॥५८९॥

तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदिभ्यां को भवति। तुन्दं परिमार्ष्टीति तुन्दपरिमृजः अलसः। एवं शोकमपनुदतीति। शोकापनुदः। आनन्दकारी।

प्रे दाज्ञः ॥५९०॥

कर्मणि प्रोपपदे दाज्ञाभ्यां को भवति। प्रदः। पथि प्रज्ञः।

समि ख्यः ॥५९१॥

कर्मणि समि चोपपदे ख्यातेः को भवति।

कुम्भं करोति कुम्भकारः काण्डं लुनातीति = काण्डलावः। वेदं अधीते = वेदाध्यायः। स्त्रीलिंग में कुम्भकारी इत्यादि।

ह्वा, वा, मा से कर्म उपपद में अण् होता है ॥५८५॥

मित्रं आह्वयती = मित्राह्वायः, तंतुं वयति = तंतुवायः धान्यं मिमीते = धान्यमायः।

कर्म उपपद से शील काम भक्ष चर के आने पर 'ण' प्रत्यय होता है ॥५८६॥

दधिशीला, दधिकामा, दधिभक्षा, कल्याणाचारा।

कर्म उपपद में होने पर उपसर्ग रहित आकारान्त धातु से 'क' प्रत्यय होता है ॥५८७॥

कानुबंध से अंत स्वर का लोप हो जाता है। धनं ददातीति = धनदः सर्वंजानातीति = सर्वज्ञः।

नाम उपपद में होने पर स्था और आकारान्त धातु से 'क' प्रत्यय होता है ॥५८८॥

समे तिष्ठतीति समस्थः कूटस्थः स्वस्थः। कच्छेन पिबतीति कच्छपः, द्वाभ्यां पिबतीति द्विपः।

तुंद और शोक उपपद में होने पर परिमृज् अपनुद से 'क' प्रत्यय होता है ॥५८९॥

तुंदं परिमार्ष्टि इति = तुंदपरिमृजः,—आलसी, शोकं अपनुदतीति शोकापनुदः—आनन्दकारी।

प्र उपपद में दा ज्ञा से 'क' प्रत्यय होता है ॥५९०॥

प्रकर्षेण ददाति = प्रदः पथि प्रज्ञः।

सम् उपपद में रहने पर ख्या से 'क' प्रत्यय होता है ॥५९१॥

चक्षिङः ख्याञ् ॥५९२ ॥

चक्षिङ् इत्येतस्य ख्याञादेशो भवति असार्वधातुके । गां संचष्टे गोसंख्यः ।

गष्टक् ॥५९३ ॥

कर्मण्युपदे गायतेष्टक् भवति । मधुरं गायतीति मधुरगी । सामगी ।

सुराग्रीध्नोः पिबतेः ॥५९४ ॥

सुरासीध्वोरुपपदयोः पिबतेष्टग्भवति । सुरापी । सीधुपी ।

हृञोऽच् वयोऽनुद्यमनयोः ॥५९५ ॥

कर्मण्युपपदे हरतेरच् भवति वयसि अनुद्यमने गम्यमाने । ऊर्ध्वं नयनमुद्यमनं ततोऽन्यदनुद्यमनं । कवचहरः क्षत्रियकुमारः ।

आङि ताच्छील्ये ॥५९६ ॥

कर्मण्याङि चोपपदे ताच्छील्यार्थे हरतेरच् भवति । पुष्पाणि आहर्तुं शीलमस्य पुष्पाहरो विद्याधरः ।

अर्हश्च ॥५९७ ॥

कर्मण्युपपदे अर्हतेरच् भवति । पूजामर्हतीति पूजार्हः ।

धृञः प्रहरणे चादण्डसूत्रयोः ॥५९८ ॥

चक्षिङ् धातु को असार्वधातुक में ख्याञ् आदेश होता है ॥५९२ ॥

गां संचष्टे गोसंख्यः ।

कर्म उपपद में गा धातु से 'टक्' प्रत्यय होता है ॥५९३ ॥

मधुरं गायतीति मधुरगी ।

सुरा, सीधु उपपद में होने पर 'पा' धातु से टक् प्रत्यय होता है ॥५९४ ॥

सुरापी, सीधुपी ।

कर्म उपपद में रहने पर वयस् और अनुद्यमन अर्थ में हृ धातु से 'अच्' प्रत्यय होता है ॥५९५ ॥

किसी वस्तु को उठाते हैं तो ऊपर करना होता है उद्यमन कहलाता है और इससे विपरीत अनुद्यमन कहलाता है । कवचं हरतीति = कवचहरः ।

कर्म और आङ् उपपद में होने पर तत् स्वभाव अर्थ में हृ धातु से अच् होता है ॥५९६ ॥

पुष्पों के ग्रहण करने का है स्वभाव जिसका उसे कहते हैं पुष्पाहरः विद्याधरः ।

कर्म उपपद में रहने पर अर्ह् धातु से अच् होता है ॥५९७ ॥

पूजाम् अर्हति इति पूजार्हः ।

दण्ड सूत्र वर्जित प्रहरणवाचक उपपद के होने पर 'धृ' धातु से अच् प्रत्यय होता है ॥५९८ ॥

दण्डसूत्रवर्जिते प्रहरणवाचके उपपदे धृञोऽच् भवति। वज्रधाः चक्रधरः। अदण्डसूत्रयोरिति किं। दण्डधारः। सूत्रधारः।

धनुर्दण्डत्सरुलाङ्गलाङ्कुशयष्टितोमरेषु ग्रहेर्वा ॥५९९॥

एषूपपदेषु ग्रहेरच्वा भवति। धनुर्ग्रहः धनुर्ग्राहः। दण्डग्रहः। दण्डग्राहः। त्सरुग्रहः त्सरुग्राहः। लाङ्गलग्रहः। लाङ्गलग्राहः। अङ्कुशग्रहः अङ्कुशग्राहः। यष्टिग्रहः यष्टिग्राहः। तोमरग्रहः। तोमरग्राहः।

स्तम्बकर्णयो रमिजपोः ॥६००॥

स्तम्बकर्णयोरुपपदयोरमिजपिभ्यां अच् भवति। स्तम्बेरमो हस्ती। कर्णेजपः पिशुनः।

शंपूर्वेभ्यः संज्ञायाम् ॥६०१॥

शंपूर्वेभ्यो धातुभ्यः संज्ञायां अच् भवति। शं करोति इति शंकरः। शंभवः। शंवदः।

शीङोऽधिकरणे च ॥६०२॥

अधिकरणे च नाम्नि उपपदे शेते अच् भवति। खे शेते खशयः। चकारात्—

पार्श्वपृष्ठादौ करणे ॥६०३॥

पार्श्वपृष्ठादौ करणे उपपदे शीङः अच् भवति। पार्श्वेन शेते पार्श्वशयः। पृष्ठशयः कुब्जः।

चरेष्टः ॥६०४॥

अधिकरणे नाम्नि उपपदे चरेष्टो भवति। कुरुषु चरतीति कुरुचरः। एवमटवीचरः।

वज्रं धारयति इति वज्रधारः। चक्रं धरति इति चक्रधरः। दण्ड सूत्र वर्णित ऐसा क्यों कहा ? दण्डधारः सूत्रधारः। इसमें ५८४ सूत्र से अण् प्रत्यय हुआ है। वृद्धि हुई।

धनुष, दण्ड, त्सरु, लाङ्गल, अंकुश, यष्टि और तोमर के उपपद में होने पर ग्रह धातु से अच् प्रत्यय विकल्प से होता है ॥५९९॥

धनुर्गृह्णाति इति धनुर्ग्रहः पक्ष में 'कर्मण्यण्' सूत्र ५८४ से अण् होकर धनुर्ग्राहः। दण्डग्रहः दण्डग्राहः त्सरुग्रहः त्सरुग्राहः आदि।

स्तंब और कर्ण उपपद में होने पर रम् जप् धातु से अच् प्रत्यय होता है ॥६००॥

स्तंबं रमते इति = स्तंबेरमः—हस्ती, कर्णे जपतीति = कर्णेजपः—पिशुनः।

शं पूर्वक कृ धातु से संज्ञा अर्थ में यच् होता है ॥६०१॥

शं करोति इति = शंकरः। शंवदः। शंभवः।

अधिकरण और नाम उपपद में होने पर शीङ् धातु से अच् होता है ॥६०२॥

खे शेते—आकाश में सोता है। खशयः। चकार से—

पार्श्व पृष्ठ आदि करण उपपद में होने पर शीङ् से अच् होता है ॥६०३॥

पार्श्वेन शेते—पार्श्वशयः। पृष्ठशयः = कुब्जः।

अधिकरण नाम उपपद में होने पर चर से 'ट' प्रत्यय होता है ॥६०४॥

कुरुषु चरतीति = कुरुचरः। अटवीचरः।

स्त्रीलिङ्ग में कुरुचरी अटवीचरी बनता है।

पुरोऽग्रतोऽग्रेषु सर्तेः ॥६०५॥

एषूपदेषु सर्तेष्टो भवति। पुरः सरः। अग्रतःसरः अग्रेसरः।

पूर्वे कर्त्तरि ॥६०६॥

पूर्वशब्दे कर्तर्युपपदे सर्तेष्टो भवति। पूर्वसरः पूर्वसरी।

कृञो हेतुताच्छील्यानुलोम्येष्वशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥६०७॥

अशब्दादिषु कर्मसूपपदेषु हेतौ ताच्छील्ये आनुलोम्ये कृञष्टो भवति। हेतौ यशस्करी विद्या। ताच्छील्ये श्राद्धकरः। आनुलोम्ये वचनकरः। अशब्दादिष्विति किं। शब्दकारः। श्लोककारः। कलहकारः। गाथाकारः। वैरकारः। चाटुकारः। सूत्रकारः। मन्त्रकारः। पदकारः।

तद्यदाद्यन्तानन्तकारबहुधाहृहर्दिवाविभानिशाप्रभाभास्चित्रकर्तृनान्दीकिंलिपिलिबिबलिभक्तिक्षेत्रजंघाधनुररुःसंख्यासु च ॥६०८॥

तदादिषु कर्मसूपपदेषु कृञष्टो भवति। तत्करोतीति तत्करः तस्करः। रूढित्वात्तस्य सकारः। यत्करः। आदिकरः। अन्तकरः। अनन्तकरः। कारकरः। बहुकरः। बाहुकरः। अहस्करः। दिवाकरः। विभाकरः। निशाकरः। प्रभाकरः। भास्करः। चित्रकरः। कर्तृकरः। नान्दीकरः। किं करोतीति किंकरः। लिपिकरः। लिबिकरः। बलिकरः। भक्तिकरः। क्षेत्रकरः जंघाकरः। धनुःकरः। अरुःकरः। एककरः। द्विकरः। इत्यादि। चकारात् रजनीकरः।

भृतौ कर्मशब्दे ॥६०९॥

कर्मशब्दे उपपदे कृञष्टो भवति भृतावर्थे। कर्मकरो भृत्यः।

पुरः अग्रतः और अग्र उपपद में होने पर 'सृ' से 'ट' प्रत्यय होता है ॥६०५॥

पुरः सरति इति पुरः सरः। अग्रतः सरति अग्रतः सरः। अग्रे सरति इति अग्रेसरः।

पूर्व शब्दकर्ता से उपपद में होने पर सृ से 'ट' प्रत्यय होता है ॥६०६॥

पूर्वं सरति इति पूर्वसरः पूर्वसरी।

शब्द, श्लोक, कलह, गाथा, वैर, चाटु, सूत्र, मंत्र इनको छोड़कर अन्य कर्म के उपपद में रहने पर 'कृ' धातु से हेतु तत्स्वभाव और अनुलोम अर्थ में 'ट' प्रत्यय होता है ॥६०७॥

हेतु अर्थ में—यशः करोति इति = यशस्करी—विद्या। तत्शील अर्थ में—श्राद्धं करोतीति—श्राद्धकरः। अनुलोम अर्थ में—वचनं करोति—वचनकरः। शब्द श्लोक आदि को छोड़कर ऐसा क्यों कहा ? शब्दं करोति इति—शब्दकारः श्लोककारः इनमें अण् प्रत्यय हुआ है।

तदादि उपपद में एवं आदि, अंत, अनंत, कार, बहु, बाहु, अहर्, दिवा विभा, निशा, प्रभा, भास्, चित्र, कर्तृ, नान्दी, किं, लिपि, लिंबि, बलि, भक्ति, क्षेत्र, जंघा, धनुष्, अरुष् और संख्यावाची शब्दों के उपपद में रहने पर 'कृ' धातु से 'ट' प्रत्यय होता है ॥६०८॥

तत्करोतीति = तत्करः 'रूढित्वात् तस्य सकारः।' नियम से त को 'स' होकर तस्करः बना। यत्करः आदिकरः इत्यादि। चकार से रजनीकरः आदि भी लेना चाहिये।

कर्म शब्द उपपद में होने पर भृत्य अर्थ में 'कृ से ट' प्रत्यय होता है ॥६०९॥

कर्म करोति इति—कर्मकरः भृत्यः।

इस्तम्बशकृतोः व्रीहिवत्सयोः ॥६१० ॥

स्तम्बशकृतोरुपपदयोः कृञ इर्भवति । स्तम्बकरिः व्रीहिः । शकृत्करिः बालवत्सः ।

हरतेर्दृतिनाथयोः पशौ ॥६११ ॥

दृतिनाथयोरुपपदयोर्हरतेरिर्भवति पशावर्थे । दृतिहरिः नाथहरिः । पशुः ।

फलेमलरजः सुग्रहे ॥६१२ ॥

एषूपपदेषु ग्रहेरिर्भवति । फलेग्रहिः । मलग्रहिः । रजोग्रहिः ।

देववातयोरापेः ॥६१३ ॥

देववातयोरुपपदयोराप्नोतेरिर्भवति । देवान्प्राप्नोति देवापिः । वातापिः ।

आत्मोदरकुक्षिषु भृञः खिः ॥६१४ ॥

एषु कर्मसूपपदेषु भृञः खिर्भवति । नस्तु क्वचित् इति नलोपः ।

ह्रस्वारुषोर्मोन्तः ॥६१५ ॥

ह्रस्वान्तस्यानव्ययस्यारुषश्चोपपदस्य मकारान्तो भवति खानुबन्धे कृति परे । आत्मानं बिभर्तीति आत्मंभरिः । एवमुदरंभरिः । कुक्षिंभरिः ।

एजेः खश् ॥६१६ ॥

स्तम्ब और शकृत् उपपद में रहने पर 'कृ' धातु से 'इ' प्रत्यय होता है ॥६१० ॥

स्तंबकरिः—व्रीहिः, शकृत्करिः बालवत्सः ।

दृति और नाथ शब्द उपपद में होने पर पशु अर्थ में हृ धातु से 'इ' प्रत्यय होता है ॥६११ ॥

दृतिहरिः, नाथहरिः—पशुः ।

फले मल और रजःके उपपद में होने पर ग्रह धातु से 'इ' प्रत्यय होता है ॥६१२ ॥

फलेग्रहिः, मलग्रहिः, रजोग्रहिः । फलानि गृह्णाति इति ।

देव और वात उपपद में रहने पर 'आप्' धातु से 'इ' प्रत्यय होता है ॥६१३ ॥

देवान् आप्नोति—देवापिः वातम् आप्नोति इति = वातापिः ।

आत्मन् उदर और कुक्षि शब्द के उपपद में रहने पर 'भृञ्' धातु से 'खि' प्रत्यय होता है ॥६१४ ॥

अव्यय रहित, ह्रस्वान्त और अरुष् के उपपद में रहने पर खानुबंध प्रत्यय के आने पर उपर्युक्त उपपद को मकारान्त हो जाता है ॥६१५ ॥

आत्मानं बिभर्तीति = आत्मंभरिः 'नस्तु क्वचिद्' सूत्र से आत्मन् के नकार का लोप हो गया है । ऐसे ही उदरं बिभर्ति = उदर + अम् । इ तत्स्थालोप्याः विभक्तयः सूत्र से विभक्ति का लोप होकर ऋ को गुण 'अर्' होकर इस सूत्र से मकारांत होकर उदरंभरिः कुक्षिंभरिः बन गये ।

कर्म उपपद में होने पर इन्नन्त एज् धातु से खश् होता है ॥६१६ ॥

कर्मण्युपपदे एजयतेरिनन्तात् खश् भवति। एजृ कंपने। जनमेजयतीति जनमेजयः।

शुनीस्तनमुञ्जकूलास्यपुष्पेषु धेटः ॥६१७॥

एषु कर्मसूपपदेषु धेटः खश् भवति।

दीर्घस्योपपदस्थानव्ययस्य खानुबन्धे ॥६१८॥

दीर्घान्तस्यानव्ययस्योपपदस्य ह्रस्वो भवति खानुबन्धे कृति परे। धेट् पाने। शुनीं धयतीति शुनिंधयः। स्तनं धयतीति स्तनंधयः। मुञ्जंधयः। कूलन्धयः। आस्यन्धयः। पुष्पंधयः। शुनिन्धयी।

नाडीकरमुष्टिपाणिनासिकासु ध्मश्च ॥६१९॥

एषु कर्मसूपपदेषु धमतेर्धेटश्च खश् भवति। नाडिन्धमः। करन्धमः। करन्धयः। मुष्टिन्धयः। मुष्टिन्धमः। पाणिन्धयः। पाणिन्धमः। नासिकन्धमः। नासिकन्धयः।

विध्वरुस्तिलेषु तुदः ॥६२०॥

एषु कर्मसूपपदेषु तुदः खशू भवति। विधुंतुदः।

संयोगादेर्धुटः ॥६२१॥

संयोगादेर्धुटो लोपो भवति धुटि परे। अरुंतुदः तिलन्तुदः।

असूर्योग्रयोर्दृशः ॥६२२॥

अनयोरुपपदयोर्दृशः खश् भवति। असूर्यंपश्या राजदाराः। उग्रंपश्याः।

जनम् एजयतीति = जनमेजयः। खानुबंध से अनुस्वार आगम एवं शानुबंध से सार्वधातुकवत् कार्य होता है।

शुनी स्तन, मुञ्ज, कूल, आस्य और पुष्प इनके उपपद में आने पर धेट् धातु से खश् प्रत्यय होता है ॥६१७॥

धेट्—पीना। शुनीं धयतीति।

अव्यय रहित दीर्घान्त उपपद को खानुबंध कृत्प्रत्यय के आने पर ह्रस्व हो जाता है ॥६१८॥

शुनिंधयः, स्तनंधयः इत्यादि।

नाडी, कर, मुष्टि, पाणि और नासिका के उपपद में रहने पर ध्मा और धेट् धातु से खश् प्रत्यय होता है ॥६१९॥

नाडीं धमति इति 'नाडिंधमः' ६१८ सूत्र से ह्रस्व हुआ है। एवं 'ध्योधमः' इस ६५वें सूत्र से ध्मा को धम आदेश हुआ है। ऐसे ही धेट् से नाडिंधयः इत्यादि।

विधु, अरुस् और तिल के उपपद में रहने पर तुद् धातु से खश् प्रत्यय होता है ॥६२०॥

विधुंतुदः।

संयोगादि धुट् का लोप हो जाता है धुट् के आने पर ॥६२१॥

यहाँ अरुस् के सकार का लोप हो गया है अतः अरुंतुदः, तिलन्तुदः।

असूर्य और उग्र से परे दृश् धातु से खश् प्रत्यय होता है ॥६२२॥

असूर्यंपश्या उग्रंपश्या, "दृशेः पश्यः" सूत्र ६९ से दृश् को पश्य हुआ है।

ललाटे तपः ॥६२३॥

ललाटे उपपदे तपतेः खश् भवति। ललाटंतपः।

मितनखपरिमाणेषु पचः ॥६२४॥

एषु कर्मसूपपदेषु पचः खश् भवति। मितम्पचा ब्राह्मणी। नखंपचा यवागूः। प्रस्थंपचा द्रोणंपचा स्थाली।

कूल उद्रुजोद्वहोः ॥६२५॥

कूले उपपदे उद्रुजोद्वहोः खश् भवति। रुजो भंगे। कूलमुद्रुजा नदी। कूलमुद्वहः समुद्रः।

वहंलिहाभ्रंलिहपरन्तपेरंमदाश्च ॥६२६॥

एते खशन्ता निपात्यन्ते। वहंलिहा गौः। अभ्रलिहो वायुः। परंतपः खलः। इरंमदा सीधुः। चकारात् वातमजन्तीति वातमजाः। श्राद्धं जहातीति श्राद्धजहा माषाः।

वदेः खः प्रियवशयोः ॥६२७॥

अनयोरुपपदयोर्वदेः खो भवति। प्रियंवदः। वशंवदः।

सर्वकूलाभ्रकरीषेषु कषः ॥६२८॥

एषूपपदेषु कषतेः खो भवति। कष सिषेति दण्डकधातुः। सर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो गिरिः। करीषंकषा वात्या।

भयार्त्तिमेघेषु कृञः ॥६२९॥

ललाट उपपद में रहने पर तप् धातु से खश् प्रत्यय होता है ॥६२३॥

ललाटं तपतीति = ललाटंतपः।

मित नख और परिमाण के उपपद में रहने पर पच् धातु से खश् प्रत्यय होता है ॥६२४॥

मितंपचा—ब्राह्मणी। नखंपचा—यवागू, प्रस्थंपचा—स्थाली द्रोणंपचा खारी इत्यादि।

कूल उपपद में रहने पर उत् पूर्वक रुज् वह् धातु से खश् प्रत्यय होता है ॥६२५॥

रुज्—भंग करना, कूलमुद्रुजा—नदी। कूलमुद्वहः समुद्रः।

वहंलिह अभ्रंलिह परन्तप इरम्मद ये खश् प्रत्ययान्त शब्द निपात से सिद्ध हुये हैं ॥६२६॥

वहंलिहा—गाय, अभ्रंलिहः—वायु, परंतपः-दुष्ट, इरंमदा-सुरा। चकार से वातं अजंति-वातमजाः, श्राद्धं जहातीति श्राद्धजहाः-उड़द।

प्रिय और वश उपपद में रहने पर वद धातु से 'ख' प्रत्यय होता है ॥६२७॥

प्रियंवदः वशंवदः।

सर्व कूल अभ्र और करीष उपपद में आने पर कष धातु से 'ख' प्रत्यय होता है ॥६२८॥

कष सिष ये दण्डक धातु हैं। सर्वं कषति-सर्वंकषः-दुष्टः, कूलंकषा-नदी, अभ्रंकषो-गिरिः, करीषंकषा-वात्या = आंधी।

भय, ऋति और मेघ से परे कृ धातु से 'ख' प्रत्यय होता है ॥६२९॥

एषूपपदेषु कृञः खो भवति । भयंकरः । ऋतिंकरः । मेघंकरः ।

क्षेमप्रियमद्रेष्वण्च ॥६३० ॥

एषूपपदेषु कृञः खो भवति अण्च । क्षेमंकरः क्षेमकारः । प्रियंकरः प्रियकारः । मद्रंकरः मद्रकारः ।

नाम्नि तृभृवृजिधारितपिदमिसहां संज्ञायाम् ॥६३१ ॥

नाम्न्युपपदे एभ्यः संज्ञायां खो भवति । रथेन तरतीति रथंतरं सामी विश्वं बिभर्तीति विश्वंभरा भूः । पतिं वृणीते पतिंवरा कन्या । धनं जयतीति धनञ्जयः । वसुं धारयतीति वसुन्धरा । शत्रुं तापयतीति शत्रुंतपः । अरिं दमयतीति अरिन्दमः । शत्रुं सहते इति शत्रुंसहः ।

गमश्च ॥६३२ ॥

नाम्नि उपपदे गमश्च खो भवति संज्ञायां । सुतंगमः । हृदयङ्गमा वाचः ।

उरोविहायसोरुरविहौ च ॥६३३ ॥

उरोविहायसोरुरविहौ भवतः गमश्च खो भवति संज्ञायां । उरसा गच्छतीति उरङ्गमः । विहायसा गच्छतीति विहङ्गमः ।

डोऽसंज्ञायामपि ॥६३४ ॥

नाम्नि उपपदे गमेर्डो भवत्यसंज्ञायामपि । भुजाभ्यां गच्छतीति भुजगः । तुरगः । प्लवगः । पतगः । अध्वगः । दूरगः । पारगः । पन्नगः । सुगः । दुर्गः । नगः । अगः । उरगः । विहगः ।

विहङ्गतुरङ्गभुजङ्गाश्च ॥६३५ ॥

भयंकरः, ऋतिंकरः, मेघंकरः ।

क्षेम प्रिय और मद्र से परे 'कृ' धातु से ख और अण् प्रत्यय होता है ॥६३० ॥

क्षेमंकरः, क्षेमकारः इत्यादि ।

नाम उपपद में होने पर तृ भृ वृज धृ तप दम सह धातु से संज्ञा अर्थ में ख प्रत्यय होता है ॥६३१ ॥

रथेन तरति—रथंतरं, विश्वं बिभर्ति या सा इति—विश्वंभरा—पृथ्वी, पतिं वृणीते या सा पतिंवरा—कन्या, धनं जयतीति धनंजयः, वसुं धारयति—वसुंधरा शत्रुं तापयति—शत्रुतपः अरिं दमयति—अरिंदमः शत्रुं सहते—शत्रुंसहः, सर्वं सहते इति सर्वंसहः—मुनिः ।

नाम उपपद में होने पर संज्ञा अर्थ में गम धातु से ख प्रत्यय हो जाता है ॥६३२ ॥

सुतंगमः हृदयंगमा—वाचः ।

उरस् विहायस् को उर विह होकर संज्ञा अर्थ में गम धातु से ख प्रत्यय हो जाता है ॥६३३ ॥

उरसा गच्छति—उरंगमः विहायसा गच्छति—विहंगमः ।

नाम उपपद में होने पर गम धातु से असंज्ञा अर्थ में भी 'ड' प्रत्यय होता है ॥६३४ ॥

भुजाभ्यां गच्छति—भुजगः तुरगः, प्लवगः इत्यादि । डानुबंध से अन्त्यस्वर को आदि में करके व्यंजन का लोप हो जाता है अतः गम् के अम् का लोप हो गया है ।

विहङ्ग तुरङ्ग और भुजङ्ग शब्द ड प्रत्ययान्त निपात से सिद्ध होते हैं ॥६३५ ॥

एते डान्ता निपात्यन्ते संज्ञायां। विहङ्गः। तुरङ्गः। भुजङ्गः।

अन्यतोऽपि च ॥६३६॥

नाम्नि उपपदे गमेरन्यस्मादपि डो भवति। वारि चरतीति वार्चः हंसः। गिरौ शेते गिरिंशः। वरानाहन्तीति वराहः। परिखन्यते परिखा।

हन्तेः कर्मण्याशीर्गत्योः ॥६३७॥

कर्मण्युपपदे आशिषि गतौ च वर्तमानाद्धन्तेर्डो भवति। शत्रुं वध्यात् शत्रुहः। क्रोशं हन्तीति क्रोशहः।

अपात्क्लेशतमसोः ॥६३८॥

क्लेशतमसोरुपपदयोरपहन्तेर्डो भवति। क्लेशापहः। तमोपहः। दुःखापहः। ज्वरापहः। विषापहः। अन्यतोऽपि। अन्यापहः। दर्पापहः।

कुमारशीर्षयोर्णिन् ॥६३९॥

कुमारशीर्षयोरुपपदयोः हन्तेर्णिन् भवति। कुमारघाती। शीर्षघाती।

टग्लक्षणे जायापत्योः ॥६४०॥

जायापत्योरुपपदयोर्हन्तेष्टग् भवति लक्षणवत्कर्तरि। जायाघ्नः ब्राह्मणः। पतिघ्नी वृषली।

अमनुष्यकर्तृकेऽपि च ॥६४१॥

नाम उपपद में होने पर गम से भिन्न अन्य धातु से भी 'ड' प्रत्यय होता है ॥६३६॥

वारि चरतीति—वार्चः हंसः यह वार् शब्द रकारांत है। गिरौ शेते—'गिरिंशी' के ई का लोप होकर गिरिंशः वरान् आहंति इति—वराहः परिखन्यते—परिखा।

कर्म उपपद में आने पर आशिष और गति अर्थ में वर्तमान हन् धातु से 'ड' प्रत्यय होता है ॥६३७॥

शत्रुं वध्यात् शत्रुहः, यहाँ आशीर्लिङ् है। क्रोशं हन्ति इति—क्रोशहः। यहाँ हन् धातु का गति अर्थ होने से एक कोश गमन करने वाला। ऐसा अर्थ है।

क्लेश तमस् के उपपद में रहने पर अपपूर्वक हन् धातु से 'ड' प्रत्यय होता है। ॥६३८॥

क्लेशं अपहन्ति—क्लेशापहः, तमोपहः, दुःखापहः। इत्यादि।

कुमार और शीर्ष उपपद में होने से हन् धातु से णिन् प्रत्यय होता है ॥६३९॥

कुमारं हन्ति—कुमारघाती "हस्य हन्तेर्घिरिनिचोः" ३६७ सूत्र से हन् के ह को घ होकर हन्तेस्तः ५६० सूत्र से नकार को तकार हुआ है। अतः शीर्षघातिन् बना है लिंग संज्ञा होकर विभक्ति आकर शीर्षघाती बना।

जाया और पति उपपद में आने से हन् से टक् होता है और कर्ता में लक्षणवत् कार्य होता है ॥६४०॥

जायां हन्ति—जायाघ्नः 'गमहन्' इत्यादि ११३ सूत्र से हन् की उपधा का लोप होकर 'लुप्तोपधस्य च' सूत्र ११४ से ह् को घ् होकर जायाघ्नः बना। ऐसे पतिघ्नी बना।

मनुष्य के कर्ता न होने पर भी वर्तमान हन् से टक् हो जाता है ॥६४१॥

अमनुष्यकर्तृकेऽपि च वर्त्तमानात् हन्तेरपि टग्भवति। जायाघ्नः तिलकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतम्। वातघ्नं तैलं। श्लेष्माणं हन्तीति श्लेष्मघ्नं त्रिकटुकं। अपिशब्दात् कृतघ्नः।

हस्तिबाहुकपाटेषु शक्तौ ॥६४२॥

एषूपपदेषु हन्तेष्टग्भवति शक्तौ। हस्तिनं हंतीति हस्तिघ्नः। एवं बाहुघ्नः। कपाटघ्नः।

पाणिघताडघौ शिल्पिनि ॥६४३॥

एतौ शिल्पे निपात्येते। पाणिना हन्तीति पाणिघः। ताडघः।

नग्नपलितप्रियान्धस्थूलशुभगाढ्येष्वभूततद्भावे कृञः ख्युट् करणे। ॥६४४॥

नग्नादिषूपपदेषु अभूततद्भावेर्थे कृञः ख्युट् भवति करणे। अनग्नो नग्नः क्रियते अनेन नग्नंकरणं द्यूतं।एवं पलितंकरणं तैलं। प्रियंकरणं शीलं। अन्धंकरणः शोकः। स्थूलंकरणं दधि। शुभगंकरणं रूपं। आढ्यंकरणं वित्तं।

भुवः खिष्णुखुकञौ कर्त्तरि ॥६४५॥

नग्नादिषूपपदेषु अभूततद्भावे भुवः खिष्णुखुकञौ भवतः कर्त्तरि। अनग्नो नग्नो भवति नग्नं भविष्णुः। नग्नंभावुकः। पलितंभविष्णुः। पलितंभावुकः। प्रियंभविष्णुः। प्रियंभावुकः। अन्धंभविष्णुः अन्धंभावुकः। स्थूलंभविष्णुः स्थूलंभावुकः।

कर्मणि भजो विण् ॥६४६॥

जायाघ्नः—तिलकः, पतिघ्नी—पाणिरेखा, पित्तघ्नं—घृतं वातघ्नं—तैलं श्लेष्माणं हन्ति श्लेष्मघ्नं—त्रिकटुकं। अपि शब्दे से—कृतं हन्ति—कृतघ्नः।

हस्ति बाहु कपाट के उपपद में होने पर शक्ति अर्थ में हन् से टक् प्रत्यय होता है ॥६४२॥

हस्तिघ्नः, बाहुघ्नः, कपाटघ्नः।

शिल्पी अर्थ में पाणिघ और ताडघ निपात से सिद्ध होते हैं ॥६४३॥

पाणिना हन्ति—पाणिघः, ताडघः।

नग्न, पलित, प्रिय, अन्ध, स्थूल, शुभग, आढ्य, उपपद में रहने पर अभूत तद्भाव अर्थ में 'कृ' धातु से करण से 'ख्युट्' प्रत्यय होता है ॥६४४॥

अभूततद्भाव—जो जैसा नहीं है उसका वैसा होना। अनग्नः नग्नः क्रियते अनेन—जो नग्न नहीं है वह इससे नग्न किया जाता है। नग्नंकरणं-जूआ। पलितंकरणं—तैलं-'युवुलामनाकान्ता' से यु को अन हुआ है। प्रियंकरणं-शीलं। अप्रिय को प्रिय करने वाला शील अन्धकरणं-शोकः चक्षु सहित को भी शोक अन्धा करने वाला है।

ये नग्न आदि उपपद में रहने पर अभूत तद्भाव अर्थ में 'भू' धातु से कर्ता में खिष्णु और खुकञ् प्रत्यय होते हैं ॥६४५॥

खिष्णु में खानुबंध और खुकञ् में खञानुबंध होते हैं खानुबंध से अनुस्वार होता है। अनग्नो नग्नो भवति गुण अव् होकर नग्नंभविष्णुः, नग्नं भावुकः। ञानुबंध से वृद्धि हुई है और आव् हुआ इत्यादि।

कर्म में भज् से 'विण्' प्रत्यय होता है ॥६४६॥

कर्मणि भजो विण् भवति। वेलोंपोऽपृक्तस्य इति वेलोंपो भवति॥ अर्द्धभाक्। पादभाक्।

सहः छन्दसि ॥६४७॥

छन्दसि भाषायां सहो विण् भवति। तुरांसहते।

सहेष्वो ढः ॥६४८॥

सहेस्सकारस्य षत्वं भवति हकारस्य ढकारो भवति चेत्। तुराषाड् तुरासाहौ तुरासाहः।

वहश्च ॥६४९॥

नाम्नि उपपदे वहश्च विण् भवति। प्रष्ठवाट् प्रष्ठौही।

अनसि डश्च ॥६५०॥

अनस्युपपदे वहश्च विण् भवति। अनसश्च डो भवति। अनड्वान्। अनड्वाही।

दुहः को घश्च ॥६५१॥

दुहः को भवति अन्तस्य घादेशः। ब्रह्मदुघा। कामदुघा।

विट् कमिगमिखनिसनिजनाम् ॥६५२॥

नाम्नि एभ्यो विट् भवति।

विड्वनोराः ॥६५३॥

णानुबंध से वृद्धि एवं 'वेलोंपोऽपृक्तस्य' सूत्र से 'वि' का लोप होकर प्रत्यय कुछ भी शेष नहीं रहा है। अर्द्धभजति इति—अर्द्धभाक्, पाद भाक् ज् को ग् होकर प्रथम अक्षर हुआ है 'चवर्गदृगादीनां च' सूत्र से सिके आने पर ज् को ग् हुआ है।

छन्द भाषा में 'सह' से विण् होता है ॥६४७॥

तुरांसहते। इति—

सह् के सकार को षकार और हकार को ढकार हो जाता है ॥६४८॥

तुराषाड् तुरासाहौ तुरासाहः इत्यादि।

नाम उपपद से वह धातु से विण् प्रत्यय होता है ॥६४९॥

प्रष्ठं वहति इति—प्रष्ठवाट् प्रष्ठौही।

अनस् उपपद में 'वह्' से विण् होता है ॥६५०॥

अनस् के स् को 'ड' होता है। अनड्वान्[1], अनड्वाही।

दुह् धातु से 'क' प्रत्यय होता है और अंत को 'घ' आदेश होता है ॥६५१॥

ब्राह्मणं दोग्धि इति—ब्रह्म दुघा, कामदुघा।

कम् गम् खन् सन् और जन् के नाम उपपद में रहने से विट् प्रत्यय होता है ॥६५२॥

विट् और वन प्रत्यय के आने पर पंचमान्त को आकार हो जाता है ॥६५३॥

---

१. अनः शकटं वहतीति।

विटि च वनि च प्रत्यये परे पञ्चमान्तस्याकारो भवति। उदधिकाः। अग्रेगाः। विषखाः। गोषाः। अब्जजाः।

अतो मन् क्वनिप्वनिप्विचः ॥६५४॥

आकारान्ताद्धातोर्मन् क्वनिप् वनिप् विच् एते प्रत्यया भवन्ति। मन् सुष्ठु ददातीति सुदामा। अश्व इव तिष्ठतीति अश्वत्थामा। क्वनिप्। सुपीवा। सुधीवा। वनिप्। भूरिदावा। घृतपावा। विच्। क्षीरपाः। सर्वापहारी प्रत्ययलोपः।

अन्येभ्योऽपि दृश्यन्ते ॥६५५॥

अन्येभ्योपि धातुभ्य एते प्रत्यया दृश्यन्ते। मन् कृतवर्मा। क्वनिप्। इण गतौ। प्रातरेति प्रातरित्वा। वनिप् यज्वा। विच्—त्विष हिंसायां त्विट्।

क्विप् ॥६५६॥

धातोः क्विप् दृश्यते। उखायाः स्रंसते उखास्रत्। पर्णध्वत्।

वः क्वौ ॥६५७॥

वेञः सम्प्रसारणं दीर्घमापद्यते क्वावेव। ऊः उवौ उवः।

उदधिं काम्यति = उदधिका, अन्त के पंचम अक्षर को आकार होकर संधि हो गई है। अग्रे गच्छति अग्रेगाः विषं खनति = विषखाः खनति गोषा[1]। अब्जं जनयति अब्जजाः।

आकारांत धातु से मन्, क्वनिप् और विच् ये प्रत्यय होते हैं ॥६५४॥

मन्—सुष्ठु ददाति—सुदामन् लिंग संज्ञा होकर सि विभक्ति आकर सुदामा बना। अश्व इव तिष्ठति—अश्वत्थामा, यहाँ सकार को तकार हुआ है वह 'लृवर्ण तवर्गलसादन्त्याः' न्याय से स् को द् होकर प्रथम अक्षर हुआ है। क्वनिप्—कप् और इकार अनुबंध है अतः सुपावन् रहा 'दामागायति' इत्यादि १६४वें सूत्र से ईकार होकर सुपीवन् बना, लिंग संज्ञा होकर सि विभक्ति में सुपीवा बना। ऐसे ही सुधीवन् से सुधीवा बना है।

क्वनिप् में कानुबंध होने से ५०२ सूत्र से यणवत् कार्य होता है।

वनिप् में—भूरिदावन् = भूरिदावा, घृतपावा विच् में—क्षीरं पिबतीति—क्षीरपाः विच् प्रत्यय का सर्वापहारी लोप होता है।

अन्य धातु से भी ये प्रत्यय देखे जाते हैं ॥६५५॥

मन् से—कृतवर्मा, क्वनिप् से—इण् गति अर्थ में है प्रातः एति—प्रातरित्वा। वनिप् यज्वा। विच् में—त्विष्—हिंसा अर्थ में है 'त्विट्' बना है।

धातु से क्विप् प्रत्यय होता है ॥६५६॥

उखायाः स्रंसते = उखास्रस् लिंग संज्ञा होकर सि विभक्ति से रूप बना उखास्रत् पर्णानि ध्वंसते = पर्णध्वत्।

क्विप् प्रत्यय के आने पर वेञ् का संप्रसारण दीर्घ हो जाता है ॥६५७॥

वे—ऊ बना रूप चलने से ऊः उवौ उवः क्विप् प्रत्यय का सर्वापहारी लोप हो जाता है।

---

१. गां पृथ्वी धनोतीति गोषा।

ध्याप्योः ॥६५८ ॥

ध्याप्योः सम्प्रसारणं दीर्घमापद्यते क्वौ परे। आधीः। व्याधीः। आपीः। वचनात्सम्प्रसारणं सिद्धम्।

पञ्चमोपधाया धुटि चागुणे ॥६५९ ॥

पञ्चमान्तस्योपधायाः क्वौ धुटि चागुणे प्रत्यये परे दीर्घो भवति।

मो नो धातोः ॥६६० ॥

धातोर्मकारस्य नकारो भवति धुट्यन्ते च। प्रशान्। प्रतान्।

च्छ्वोः शूठौ पञ्चमे च ॥६६१ ॥

छकारवकारयोः शू ऊठि—त्येतौ भवतः क्वौ धुट्यगुणे पञ्चमे च। लिश विछ गतौ। विछ गोविट् प्रच्छ ज्ञीप्सायां। पथिप्राट्। क्वचिद् ह्रस्वस्य दीर्घता। दिव् अक्षद्यूः। षिव् स्यूः। प्रच्छ प्रष्टः पृष्ट्वा। दिव् द्यूतः द्यूत्वा। विच्छ विश्नः। छस्य द्विः पाठे निमित्ताभावे नैमित्तिकस्याप्यभावः।

श्रिव्यविमविह्रिस्त्वरामुपधयो ॥६६२ ॥

एषामुपधया सह वकारस्य ऊठ् भवति क्वौ धुट्यगुणे पञ्चमे च। श्रिवु गतिशोषणयोः। श्रूः। अव रक्ष पालने। अव ऊः। मव्य बन्धने मूः। ज्वर रोगे जूः। त्वर तूः।

राल्लोप्यौ ॥६६३ ॥

क्विप् के आने पर ध्या, व्या का संप्रसारण दीर्घ हो जाता है ॥६५८ ॥

आ ध्या—धी = आधीः, आपीः इस सूत्र से संप्रसारण सिद्ध है।

पंचमान्तस्थ की उपधा को क्विप् और धुट् अगुण विभक्ति के आने पर दीर्घ हो जाता है ॥६५९ ॥

प्रशाम्यति इति प्रशम्—प्रशाम् बना। क्विप् प्रत्यय का सर्वापहारी लोप हो गया पुनः—

धुट् अन्त के आने पर धातु के मकार का नकार हो जाता है ॥६६० ॥

प्रशान् प्रतान्। प्रताम्यतीति प्रतान्।

क्विप् और धुट् अगुण पंचम अक्षर के आने पर छकार वकार को शू और व को इट् आदेश होता है ॥६६१ ॥

लिश, विछ—गमन करना। गोविट् शानुबंध से सार्वधातुकवत् कार्य होता है॥ अतः प्रच्छ से—पन्थानं पृच्छति इति पथिप्राट् क्वचित् कहीं पर "ह्रस्वस्य दीर्घता" ४७० सूत्र से दीर्घ हो गया है।

दिव् के व् को ऊठ् होकर अक्षैर्दीव्यति अक्षद्यूः षिव्-स्यूः। प्रच्छ से प्रष्टः पृष्ट्वा, दिव्-द्यूतः द्यूत्वा। विच्छ—विश्नः छ का द्वित्व पाठ है किंतु निमित्त के अभाव में नैमित्तिक का भी अभाव हो जाता है।

क्विप् और धुट् अगुण पंचम प्रत्यय के आने पर श्रिव् अव्।

मव् ज्वर् त्वर् के उपधा सहित वकार को ऊठ् हो जाता है ॥६६२ ॥

श्रिवु—गति और शोषण, श्रिव् की इ और व को ऊठ् होकर श्रू बना लिंग संज्ञा होकर सि विभक्ति में 'श्रूः' बना।

अव से 'ऊः' मव् से मूः ज्वर् से जूः त्वर् से तूः बना।

रेफ से परे धुट् अगुण पञ्चम और क्लिप के आने पर छकार वकार का लोप हो जाता है ॥६६३ ॥

रेफात्परौ छकारवकारौ लोप्यौ भवतः क्वौ घुट्यगुणे पञ्चमे च। मूर्च्छ मूः। धूर्व धूः।

वहे पञ्चम्यां भ्रंशेः ॥६६४॥

वहेः पञ्चम्यन्त उपपदे भ्रंशेः क्विप् भवति। भ्रंश भ्रंश अधःपतने। वहात् भ्रश्यत इति वहभ्रट्।

स्पृशोऽनुदके ॥६६५॥

अनुदके नाम्नि उपपदे स्पृशः क्विप् भवति। स्पृश संस्पृशे। घृतस्पृक् मन्त्रस्पृक्।

अदोऽनन्ने ॥६६६॥

अनन्न उपपदे अदः क्विप् भवति। सस्यमत्तीति सस्यात्। तृणात्।

क्रव्ये च ॥६६७॥

क्रव्ये चोपपदे अदः क्विप् भवति पक्वेऽर्थे। क्रव्यात्। पुनर्वचनादण् अपक्केऽपि। क्रव्यादः राक्षस।

ऋत्विग्दधृक्स्रग्दिगुष्णिहश्च ॥६६८॥

एते क्विबन्ता निपात्यन्ते। ऋतौ यजतीति स्वपि वपि इत्यादिना संप्रसारणं, वमुवर्ण इति वत्वं। ऋत्विक्। धृष्णोतीति दधृक्। स्रक्। दिक्। उष्णिक्।

सत्सूद्विषद्रुहयुजविदभिदजिनीराजामुपसर्गेऽप्यनुपसर्गेऽपि ॥६६९॥

मूर्च्छ् धूर्व् धातु हैं इनके छकार वकार का लोप होकर मूः धूः बना।

वह पंचम्यंत उपपद में होने पर भ्रंश से क्विप् होता है ॥६६४॥

भ्रश भ्रंश = अधःपतन होना। बहात् भ्रश्यते वहभ्रट् बना।

अनुदक नाम उपपद में होने पर स्पृश् से क्विप् होता है ॥६६५॥

स्पृश्—संस्पर्श करना, घृतं स्पृशति—घृतस्पृक् मंत्रस्पृक्।

अन्त उपपद में न होने पर अद् से क्विप् होता है ॥६६६॥

सस्यं अत्तीति सस्य अद्—सस्याद् सि विभक्ति में 'सस्यात्' बना ऐसे ही तृणम् अत्ति = तृणात् बना।

और क्रव्य उपपद में होने पर पक्व अर्थ में अद् से क्विप् होता है ॥६६७॥

क्रव्यम् अत्ति = क्रव्यात्। पुनर्वचन से अण् भी होता है और अपक्व अर्थ में भी होता है। क्रव्यादः-राक्षसः।

ऋत्विग् दधृक् स्रक् दिग् और उष्णिक् ये क्विबन्त शब्द निपात से सिद्ध हुए हैं ॥६६८॥

ऋतौ यजति ई 'स्वपि वापि' इत्यादि सूत्र से संप्रसारण होकर ऋतु इज् रहा 'वमुवर्णः' सूत्र से संधि होकर ऋत्विज् लिंग संज्ञा होकर सि विभक्ति में "चवर्ग दृगादीनां च" सूत्र से ग होकर प्रथम अक्षर होकर ऋत्विक् बना है। धृष्णोति इति 'दधृक्' सृजतीति—स्रक् दिशति इति दिक्, उष्णिक् है।

सत्, सू, द्विष्, द्रुह् युज् विद् भिद् जि, नी, और राज् को उपसर्ग और अनुपसर्ग में भी एवं नाम उपपद अनाम उपपद में भी क्विप् प्रत्यय होता है ॥६६९॥

एषामुपसर्गेऽप्यनुपसर्गेपि नाम्नि अप्यनाम्नि उपपदे क्विपू भवति। उपसीदतीति उपसत्। सत्। सभासत्। सूरदादिः प्रसूः। सूः। अण्डसूः। द्विष् अप्रीतौ। विद्विट्। द्विट्। मित्रद्विट्। द्रुह जिघांसायां प्रधुक्। धुक्। मित्रधुक् प्रधुक् गोधुक्। प्रयुक्। युक् अश्वयुक्। संवित् वित् वेदवित्। प्रभित् भित् काष्ठभित्। प्रच्छित् छित् रज्जुच्छित्। प्रजित् जित् अवनिजित्। अवनीः नीः सेनानीः। विराट् राट् गिरिराट्।

कर्मण्युपमानेत्यदादौ दृशष्टक्सकौ च ॥६७० ॥

कर्मण्युपमाने त्यदादौ उपपदे दृशष्टक्सकौ च भवतः। चकारात् क्विप् च।

आ सर्वनाम्नः ॥६७१ ॥

दृग्दृशदृक्षेषु परतः सर्वनाम्न आकारो भवति। दृशिर् प्रेक्षणे। तमिव पश्यतीति अथवा स इव दृश्यते इति तादृशः। तादृक्षः। तादृक्। यादृशः। यादृक्। यादृक्षः। एतादृशः। एतादृक्षः। एतादृक्।

इदमीः ॥६७२ ॥

दृगादिषु परत इदमीर्भवति। इदमिव पश्यतीति ईदृशः। ईदृक्षः ईदृक्।

किं कीः ॥६७३ ॥

दृगादिषु किं कीर्भवति। किमिव पश्यतीति कीदृशः। कीदृक्षः कीदृक्।

उपसीदति—उपसत् षद् को सीद आदेश हुआ था मूल धातु षद् है। उपसर्ग के अभाव में 'सत्' बना। नाम उपपद में होने पर सभासत् बना। सूङ् प्राणि प्रसवे—प्रसूः सूः अण्डसूः। द्विष्-अप्रीति करना, विद्विट् द्विट्-मित्रद्विट्। द्रुह—द्रोह करना प्रद्रुह् लिंग संज्ञा होकर सि विभक्ति में—'हचतुर्थात्स्याधातोः' इत्यादि २९० सूत्र से द्रुह के द को ध होकर 'दादेर्हस्यगः' सूत्र ३३२ से हकार को गकार होकर प्रधुक् बना। धुक्, गुरू धुक् आदि बनते हैं। युज् से—प्रयुक् युक् अश्वयुक्। वित् से—संवित् वित् वेदवित्।

भिद से—प्रभित् भित् काष्ठभित्। छिद् से—प्रच्छित् छित् रज्जुछित्। जि से—प्रजित् जित् अवनिजित्। नी से—अवनीः नीः सेनानीः। राज् से—विराट् राट् गिरिराट् बने हैं।

उपमान अर्थ में त्यदादि उपपद में होने पर दृश् धातु से टक् और सक प्रत्यय होते हैं ॥६७० ॥

चकार से क्विप् प्रत्यय भी होता है।

दृग् दृश और दृक्ष से परे सर्वनाम को आकार हो जाता है ॥६७१ ॥

दृशिर्—देखना। तमिव पश्यति अथवा स इव दृश्यते। टक् प्रत्यय से 'तत् दृश् अ' तत् को आकार होकर तादृश बना, क्विप् में—तादृश् और सक् में कानुबंध होकर 'छशोश्च' सूत्र १२२ से श् को ष् होकर 'षढोकः से' सूत्र ११९ से ष को क् होकर 'नामिकरपरः' इत्यादि सूत्र से क् से परे स को ष होकर 'कषयोगेक्षः' नियम से क्ष होकर तादृक्ष बना। तीनों को लिंग संज्ञा होकर सि विभक्ति में तादृशः तादृक् तादृक्षः बनेंगे। ऐसे ही यत् से यादृशः आदि, एतत् से एतादृशः आदि बनेंगे।

दृग् दृश् और दृक्ष के आने पर इदं को 'ई' हो जाता है ॥६७२ ॥

इदं इव पश्यति—ईदृशः ईदृक् ईदृक्षः।

दृग् आदि के आने पर किं को 'की' आदेश होता है ॥६७३ ॥

किमिव पश्यति—कीदृशः कीदृक् कीदृक्षः।

अदोमूः ॥६७४॥

दृगादिषु अदस् अमूर्भवति। अमुमिव पश्यतीति अमूदृशः अमूदृक्षः अमूदृक्।

दृग्दृशदृक्षेषु समानस्य स्यः ॥६७५॥

दृगादिषु परेषु समानस्य सभावो भवति। समानमिव पश्यतीति सदृशः। सदृक्षः। सदृक्।

नाम्न्यजातौ णिनिस्ताच्छील्ये ॥६७६॥

अजातौ नाम्नि उपपदे धातोर्णिनिर्भवति ताच्छील्येर्थे तच्छब्देन धात्वर्थो गृह्यते। उष्णं भोक्तुं शीलमस्य उष्णभोजी। धर्ममवभासितुं शीलमस्य धर्ममवभास्यत इति एवं शीलः धर्मविभासी। प्रियवादी। प्रियवादिनी।

कर्तर्युपमाने ॥६७७॥

कर्तृवाचिनि उपमाने उपपदे धातोर्णिनिर्भवति। उष्ट्र इव क्रोशतीति उष्ट्रक्रोशी। ध्वांक्षरावी। हंसगामिनी।

व्रताभीक्ष्ण्ययोश्च ॥६७८॥

व्रताभीक्ष्ण्ययोरर्थयोर्धातोर्णिनिर्भवति। व्रतं शास्त्रविहितो नियमः। आभीक्ष्ण्यं पौनःपुन्यं। अश्राद्धभोजी। स्थण्डिलशायी। क्षीरपायिणः उशीनराः। सौवीरपायिणो बाह्लिकाः।

मनः पुंवच्चात्र ॥६७९॥

कर्मण्युपपदे मन्यतेर्णिनिर्भवति उपपदस्य पुंवद्भवति यथासम्भवं। पटुमानी। पटवीमात्मानं मन्यते। पटुमानिनी।

दृग् आदि के आने पर अदस् को 'अम्' आदेश होता है ॥६७४॥

अमुम् इव पश्यति अमूदृशः इत्यादि।

दृग् दृश और दृक्ष के आने पर समान को 'स' आदेश होता है ॥६७५॥

समानमिव पश्यति सदृशः इत्यादि।

जाति से भिन्न नाम उपपद में होने पर तत्शील अर्थ में धातु से णिन् प्रत्यय होता है ॥६७६॥

तत् शब्द से धातु अर्थ लिया जाता है।

उष्णं भोक्तुं शीलम् अस्य—उष्ण खाने का है स्वभाव जिसका—उष्ण भुज् से णिन् होकर उष्णभोजिन् सि विभक्ति में उष्णभोजी बना। धर्मविभासी, प्रियवादी, प्रियवादिनी इत्यादि बनेंगे।

कर्तावाची उपमान उपपद में होने पर धातु से णिन् प्रत्यय होता है ॥६७७॥

उष्ट्र इव क्रोशति इति = उष्ट्र क्रोशी, ध्वांक्षरावी, हंस—गामिनी इत्यादि।

व्रत और आभीक्ष्य अर्थ में धातु से णिन् प्रत्यय होता है ॥६७८॥

शास्त्र विहित नियम को व्रत कहते हैं। पुनः पुनः को आभीक्ष्य कहते हैं। श्राद्धे भोक्तुं शीलमस्य न अश्राद्ध भोजी स्थण्डिल शेते स्थंडिलशायी इत्यादि।

कर्म उपपद में होने पर मनु धातु से णिन् प्रत्यय होता है और यथा-संभव उपपद को पुंवद् भाव हो जाता है ॥६७९॥

पटुम् आत्मानं मन्यते—पटुमानी, पटवीम् आत्मानं मन्यते काचित् स्त्री = पटुमानिनी यहाँ पटवी को पुंवद् भाव हो गया है।

खश्चात्मने ॥६८० ॥

कर्मण्युपपदे आत्मार्थे मन्यतेर्णिनिर्भवति खश्च प्रत्ययः पुंवच्च। विदुषीमिव आत्मानं मन्यते विद्वन्मानिनी। पटुमिवात्मानं मन्यते पटुमन्यः।

करणेऽतीते यजः ॥६८१ ॥

करणे उपपदे यजेर्णिन् भवति अतीतेऽर्थे। अग्निष्टोमेन इष्टवान् अग्निष्टोमयाजी। वाजपेययाजी।

कर्मणि हनः कुत्सायाम् ॥६८२ ॥

कर्मण्युपपद हन्तेर्णिनिर्भवति अतीते काले वर्त्तमानात् कुत्सायां। पितृघाती। मातुलघाती।

क्विप् ब्रह्मभ्रूणवृत्रेषु ॥६८३ ॥

ब्रह्मादिषूपपदेष्वतीते हन्तेः क्विप् भवति। ब्रह्माणं हन्तिस्म ब्रह्महा। भ्रूणहा। वृत्रहा।

कृञः सुपुण्यपापकर्ममन्त्रपदेषु ॥६८४ ॥

एतेषूपपदेषु कृञः क्विप् भवति अतीते। सुष्टु करोतिस्म सुकृत्। पुण्यकृत्। पापकृत्। कर्मकृत्। मन्त्रकृत्। पदकृत्।

सोमे सुञः ॥६८५ ॥

सोमे ऽपपदे सुञः क्विप् भवति अतीते। सोमं सुनोतिस्म सोमसुत्।

कर्म उपपद मे होने पर आत्मा अर्थ में मनु धातु से णिन् प्रत्यय होता है और 'ख' प्रत्यय होता है पुंवद् भी होता है ॥६८० ॥

विदुषीमिव आत्मानं मन्यते विद्वन्मानिनी पटुमन्यः।

करण उपपद में होने पर अतीत अर्थ में यज् से णिन् प्रत्यय होता है ॥६८१ ॥

अग्निष्टोमेन इष्टवान्—अग्निष्टोमयाजी, वाजपेययाजी।

कर्म उपपद में होने पर अतीत काल में वर्तमान कुत्सा अर्थ में हन् धातु से णिन् प्रत्यय होता है ॥६८२ ॥

पितरम् हन्ति इति—पितृ घाती, "हस्य हंतेर्घिरिणिचोः" ३६७ सूत्र से ह को घ होकर 'हन्तेस्तः' सूत्र ५६० से नकार को तकार हुआ है। ऐसे मातुलघाती गुरुघाती आदि बनते हैं।

ब्रह्म भ्रूण और वृत्र उपपद में होने पर अतीत काल में हन् से क्विप् होता है ॥६८३ ॥

ब्रह्माणं हंतिस्म ब्रह्महन् बनः लिंग संज्ञा होकर सि विभक्ति में ब्रह्महा बनेगा। ऐसे ही भ्रूणहा, वृत्रहा।

सु, पुण्य, पाप, कर्म, मंत्र और पद उपपद में रहने पर अतीत काल में कृ धातु से क्विप् होता है ॥६८४ ॥

सुष्टु करोतिस्म सुकृत् "धातोस्तोऽन्तः पानुबंधे" सूत्र ५२९ से पानुबंध कृदन्त प्रत्यय के आने पर ह्रस्वान्त धातु के अंत में तकार का आगम हो जाता है। अतः कृ से तकार का आगम होकर 'कृत्' बन जाता है। ऐसे ही पुण्यकृत् पापकृत् आदि।

सोम उपपद में अतीत अर्थ में 'कृ' से क्विप् होता है ॥६८५ ॥

सोमं सुनोतिस्म—सोमसुत्। तकार का आगम हुआ है।

चेरग्नौ ॥६८६ ॥

अग्नावुपपदे चिनोतेः क्विप् भवति अतीते। अग्निं चिनोतिस्म अग्निचित्।

विक्रिय इन् कुत्सायाम् ॥६८७ ॥

विक्रीणातेरतीते कुत्सायां इन् भवति। सोमं विक्रीणीतेस्म सोमविक्रयी। डुक्रीञ् द्रव्यविनिमये।

दृशेः क्वनिप् ॥६८८ ॥

कर्मण्युपपदे दृशेः क्वनिप् प्रत्ययो भवति अतीते। मेरुं पश्यतिस्म मेरुदृश्वा।

सहराज्ञोर्युधः ॥६८९ ॥

सहराज्ञोरुपपदयोः युधः क्वनिप् भवति अतीते। युध सम्प्रहारे सह युध्यतेस्म सहयुध्वा। राजानं युध्यतेस्म राजयुध्वा।

कृञश्च ॥६९० ॥

सहराज्ञोरुपपदयोः कृञः क्वनिप् भवति अतीते। सहकृत्वा। राजकृत्वा।

सप्तमीपञ्चम्यन्ते जनेर्डः ॥६९१ ॥

सप्तम्यन्ते पञ्चम्यन्ते उपपदे जनेर्डो भवति अतीते। जले जातं जलजं। सरसिजं संस्कारात् जातं संस्कारजं। बुद्धिजं। एवं पंकेजं। नीरेजं।

अन्यत्रापि च ॥६९२ ॥

अन्यस्मिन्नप्युपपदे जनेर्डो भवति अतीते। न जातः अजः। द्वाभ्यां जाते द्विजः। अभिजः। अग्रजः। अनुजः पुमांसमनुजातः।

अग्नि शब्द उपपद में होने पर चिञ् धातु से क्विप् होता है ॥६८६ ॥

अग्निं चिनोतिस्म—अग्निचित्।

विक्रीणाति धातु से कुत्सा अर्थ में 'इन्' प्रत्यय होता है ॥६८७ ॥

अतीत काल में—सोमं विक्रीणीतेस्म सोमविक्रयित् = सोमविक्रयी बना।

कर्म उपपद में होने पर अतीत अर्थ में दृश् धातु से क्वनिप् प्रत्यय होता है ॥६८८ ॥

मेरुं पश्यतिस्म मेरु दृश्वन् = मेरुदृश्वा बना।

सह और राजन् के उपपद में अतीत में युध् से क्वनिप् होता है ॥६८९ ॥

युध—प्रहार करना। सह युध्यते स्म सहयुध्वन् = सहयुध्वा। राजानं युध्यते स्म = राजयुध्वा।

सह राजा के उपपद में कृञ् धातु से अतीत में क्वनिप् प्रत्यय होता है ॥६९० ॥

सहकृत्वा, राजकृत्वा।

सप्तम्यंत और पंचम्यंत उपपद में होने पर अतीत में 'जनि' से 'ड' प्रत्यय होता है ॥६९१ ॥

जले जातं—जलजं डानुबंध से अन् का लोप होकर बना है।

सरसिजं, संस्कारजं बुद्धिजं इत्यादि।

अन्य के उपपद में भी अतीत अर्थ में जन् धातु से 'ड' प्रत्यय होता है ॥६९२ ॥

न जातः = अजः द्वाभ्यांजातः द्विजः अभिजः अग्रजः इत्यादि। पुमांसम्-अनुजायतेस्म—अनुजातः।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥१॥
वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः।
षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥२॥
वर्णविकारनाशाभ्यां धातोरतिशयेन यः।
योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु ॥३॥

मह्यां रौतीति मयूरः। भ्रमन् रौतीति भ्रमरः। व्यञ्जनान्तस्य यत्सुभोरिति न्यायात् पुंसोऽन्शब्दलोप इति सूत्रेण अन्शब्दलोपः। संयोगान्तस्य लोप इति सलोपः। पुमनुजः। स्त्र्यनुजः।

निष्ठा ॥६९३॥

धातोर्निष्ठाप्रत्ययो भवति अतीते काले।

क्तक्तवन्तू निष्ठा ॥६९४॥

क्तक्तवन्तू निष्ठासंज्ञौ भवतः।

न श्र्युवर्णवृतां कानुबन्धे ॥६९५॥

श्रयतेरुवर्णान्तस्य वृङ्वृञ्ऋदन्तस्य च नेड् भवति कानुबन्धेऽसार्वधातुके। श्रितः श्रितवान्। युतः युतवान्। भूतः भूतवान्। वृतः वृतवान्।

रान्निष्ठातो नोऽपृमूर्च्छिमदिख्याध्याभ्यः ॥६९६॥

श्लोकार्थ—वर्ण का आगम, वर्ण विपर्यय, वर्ण का विकार वर्ण का नाश और धातु का उसके अर्थ के अतिशय के साथ योग होना यह पाँच प्रकार का निरुक्त कहलाता है ॥१॥ गवेन्द्र आदि में वर्ण का आगम हुआ है गो + इन्द्र 'अवःस्वरे' सूत्र से ओ को अव आगम हुआ है अतः गवेन्द्रः बना है। 'सिंह' शब्द में वर्ण का विपर्यय हुआ है हिंस से 'सिंह' बना है। षोडश में—षष् दश से विकार होकर षोडश बना है। पृषोदर में वर्ण का नाश हुआ है ॥२॥ वर्ण विकार और नाश से धातु में जो अतिशय आता है उसे योग कहते हैं यह मयूर भ्रमर आदि शब्दों में हुआ है ऐसा विद्वानों का कहना है ॥३॥

मह्यां रौति मयूरः, भ्रमन् रौति इति भ्रमरः। 'व्यञ्जनान्तस्य यत्सुभोः' इस न्याय से पुमन्स् के अन् शब्द का लोप होकर 'संयोगान्तस्य लोपः' सूत्र से संयोगी सकार का लोप होकर 'पुमनुजः' बना। ऐसे स्त्रियं अनुजातः—स्त्र्यनुजः।

अतीत काल में धातु से निष्ठा प्रत्यय होते हैं ॥६९३॥

क्त और क्तवन्तु निष्ठा संज्ञक होते हैं ॥६९४॥

कानुबंध असार्वधातुक प्रत्यय के आने पर श्रिञ् उवर्णांत और वृङ् वृञ् ऋदन्त धातु से इट् नहीं होता है ॥६९५॥

क्त क्तवन्तु में कानुबन्ध हुआ है। श्रितः श्रितवान्। युतः युतवान् भूतः भूतवान् वृतः। वृतवन्त् की लिंग संज्ञा होकर सि विभक्ति में वृतवान् बना ऐसे ही सर्वत्र समझना।

पृ मूर्च्छि ख्या, मदि और ध्या को छोड़कर रेफ से परे निष्ठा के तकार को नकार हो जाता है ॥६९६॥

रेफात्परस्य निष्ठातकारस्य नकारो भवति नतु पूमूर्च्छिमदिख्याध्याध्यः। शॄ हिंसायां। शीर्णः शीर्णवान्। कीर्णः कीर्णवान्। गीर्णः गीर्णवान्। प्रतिषेधः किम् ! पॄ पूर्तः पूर्तवान्। मूर्च्छा मोह समुच्छ्राययोः। मूर्तः मूर्तवान्। मतः न डीङ्श्वीदनुबन्धवेटामपतिनिष्कुषोरिति इट्प्रतिषेधः। ख्यातः। ध्यातः।

निष्ठेटीनः ॥६९७॥

निष्ठायामिटि परे इनो लोपो भवति। चोर्यतेस्म चोरितः चोरितवान्। कारितः कारितवान्॥ क्षुधिवसोश्चेति वर्त्तते।

निष्ठायाञ्च ॥६९८॥

क्षुधिवसोर्निष्ठायां वा नेट् भवति।

लुभो विमोहने ॥६९९॥

विमोहनेऽर्थे लुभो निष्ठानां वा नेट् भवति। क्षुधितः क्षुधितवान्। उषितः उषितवान्। लुभ गार्ध्ये लुभितः लुभितवान्। लुब्धः लुब्धवान्।

पूञक्लिशोर्वा ॥७००॥

पूञः क्लिशश्च निष्ठायामिड् वा भवति। पूतः पूतवान्। पवितः पवितवान्। क्लिश् विबाधने। क्लिष्टः क्लिष्टवान्। क्लिशितः क्लिशितवान्।

न डीङ्श्वीदनुबन्धवेटामपतिनिष्कुषोः ॥७०१॥

डीङः श्वयतेरीदनुबन्धस्य च वेटस्य निष्ठायां नेड् भवति अपतिनिष्कुषोः।

शॄ—हिंसा करना "ऋदन्तेरगुणे" सूत्र से 'इर्' होकर 'इरूरोरीरूरौ' सूत्र से दीर्घ होकर नकार को णकार होकर शीर्णः शीर्णवान् बना है।

ऐसे ही कॄ गॄ में कीर्णः गीर्णः इत्यादि। उपर्युक्त धातुओं का निषेध क्यों किया है ? पॄ—पूर्तःपूर्तवान् बनेगा। मूर्च्छ से मूर्तः, मूर्तवान् बनेगा, मद से मत्तः "न डीङ्श्वीदनुबंध" इत्यादि ७०१ सूत्र से इट् का निषेध होकर ख्यातः ध्यातः बनता है।

निष्ठा प्रत्यय के परे इट् के आने पर इन् का लोप हो जाता है ॥६९७॥

चोर्यते स्म—चोरितः चोरितवान्। कारितः कारितवान्। 'क्षुधिवसोश्च' सूत्र अनुवृत्ति में चला आ रहा है।

क्षुध और वस से निष्ठा प्रत्यय के आने पर इट् विकल्प से होता है ॥६९८॥

विमोहन अर्थ में लुभ से निष्ठा प्रत्यय के आने पर विकल्प से इट् होता है ॥६९९॥

क्षुधितः क्षुधितवान्। वस को संप्रसारण होकर उषितः उषितवान्। लुभ्—गृद्धि करना। लुभितः लुभितवान्। इट् के अभाव में—लुब्धः लुब्धवान्।

पूञ् और क्लिश, से निष्ठा में इट् विकल्प से होता है ॥७००॥

पूतः पूतवान्, पवितः पवितवान्। क्लिश-क्लिष्टः क्लिष्टवान् 'छशोश्च' सूत्र से श् को ष् होकर "तवर्गस्य षटवर्गाष्टवर्गः" सूत्र से टवर्ग होकर क्लिष्टः बना है।

इट् में—क्लिशितः क्लिशितवान्।

पति, निष्कुष को छोड़कर डीङ् श्वि और ईकारानुबंध से निष्ठा प्रत्यय के आने पर विकल्प से इट् होता है ॥७०१॥

ल्वाद्योदनुबन्ध्याच्च ॥७०२ ॥

लूआदिभ्य ओदनुबन्धेभ्यश्च परस्य निष्ठातकारस्य नकारो भवति। डीङ् विहायसा गतौ। डीनः डीनवान्। टुओश्वि गतिवृद्ध्योः।

तद्दीर्घमन्त्यम् ॥७०३ ॥

तत्सम्प्रसारणमन्त्यं चेद्दीर्घमापद्यते। शूनः शूनवान्। दीप्तः दीप्तवान्। ओलजी ओलस्जी व्रीडायां। लज्जतेस्म अन्तरङ्गत्वात् चजोः कगौ धुटि चानुबन्धयोरिति जकारस्य गकारः। लग्नः लग्नवान्।

धुटि खनिसनिजनाम् ॥७०४ ॥

एषां पञ्चमान्तस्य आकारो भवति धुटि परे। खातः। सातः। जातः। जातवान्। वेटः—गुहू संवरणे। ढे ढलोपो दीर्घश्चोपधायाः। गूढः गूढवान्।

दाहस्य च ॥७०५ ॥

दकारात्परस्य निष्ठातकारस्य दस्यं च नकारो भवति।

आदनुबन्ध्याश्च ॥७०६ ॥

आकारादनुबन्धाद्धातोर्नेट् भवति निष्ठायां जिमिदा स्नेहने। मिन्नः मिन्नवान्। क्लिदू आर्द्रीभावे। क्लिन्नः क्लिन्नवान्।

आतोऽन्तस्थासंयुक्तात् ॥७०७ ॥

अन्तस्थासंयुक्तादाकारात्परस्य निष्ठातकारस्य नकारो भवति। ग्लै। हर्षक्षये। ग्लानः ग्लानवान्। म्लै मात्रविनामे। म्लानः। श्रा पाके। श्राण। द्रा कुत्सायां गतौ। विद्राणः विद्राणवान्।

लूञ आदि से और ओकारानुबन्ध धातु से परे निष्ठा के तकार को नकार होता है ॥७०२ ॥

डीङ्—आकाश में गमन करना। डीयते स्म इति डीनः डीनवान् टुओश्वि—गमन और बढ़ना। टुओ का अनुबन्ध है श्वि त, तवन्त् है।

वह यदि संप्रसारण है तो अन्त्य में दीर्घ हो जाता है ॥७०३ ॥

श्वि में उपधा सहित व को उ होकर दीर्घ होकर शूनः शूनवान्। दीप्तः दीप्तवान्। ओलजी—लज्जा करना। लज्जते स्म "चजोः कगौ धुटि घानुबंधयोः" ५४२ सूत्र से जकार को गकार होकर लग्नः लग्नवान्।

खन् सन् जन् के पंचम अक्षर को धुट् के आने पर आकार हो जाता है ॥७०४ ॥

खातः, खातवान्, सातः सातवान्। जातः जातवान्। गुहू—ढकना 'होढः' १४६ सूत्र से ह् को द् होकर आगे के तवर्ग को ढ होकर "ढे ढलोपो दीर्घश्चोपधायाः" सूत्र १४७ से ढकार का लोप होकर पूर्व को दीर्घ होकर गूढः गूढवान्।

दकार से परे निष्ठा के तकार और दकार दोनों को नकार हो जाता है ॥७०५ ॥

आकार अनुबंध धातु से निष्ठा प्रत्यय आने पर इट् नहीं होता है ॥७०६ ॥

जिमिदा—स्नेह करना। मिन्नः मिन्नवान्। क्लिदू—गीला होना-क्लिन्नः क्लिन्नवान्।

अन्तस्थ संयुक्त आकार से परे निष्ठा के तकार को नकार हो जाता है ॥७०७ ॥

ग्लै—हर्ष क्षय होना, ग्लानः ग्लानवान् "संध्यक्षर धातु आकारांत हो जाते हैं" म्लै-म्लान होना—म्लानः, श्रा—पकाना श्राणः, द्रा—कुत्सित गमन करना—द्राणः विद्राणवान् इत्यादि।

व्रश्चेः कश्च ॥७०८ ॥

व्रश्चेः परस्य निष्ठातकारस्य नकारो भवति कश्चान्तादेशः। व्रश्चू छेदने। सम्प्रसारणं। वृक्णः वृक्णवान्।

क्षैशुषिपचां मकवाः ॥७०९ ॥

एभ्यो निष्ठातकारस्य यथासंख्यं मकवा भवन्ति। क्षै जै षै क्षये। क्षामः क्षामवान्। शुष्कः। पक्वः।

वनतितनोत्यादिप्रतिषिद्धेटां धुटि पञ्चमोऽच्चान्तः ॥७१० ॥*

वनतेस्तनोत्यादेः प्रतिषिद्धेटश्च पञ्चमस्य लोपो भवति धुट्यगुणे पञ्चमे च। आकारस्य अद् भवति। वन षण संभक्तौ। वतः। ततः। हतः। यतः। रतः। नतः। गतः। गतवान्।

जपिवमिभ्यामिड् वा ॥७११ ॥

जपिवमिभ्यामिड् वा भवति निष्ठायां। जप विमानसे च। जप्तः जप्तवान्। जपितः जपितवान्। वान्तः। वान्तवान् वमितः वमितवान्।

व्याद्भ्यां श्वसः ॥७१२ ॥

व्याद्भ्यां परस्य श्वस इड् वा भवति निष्ठायां। विश्वस्तः। विश्वसितः। विश्वस्तवान् विश्वसितवान्। आश्वस्तः आश्वस्तवान्। आश्वसितः आश्वसितवान्।

भावादिकर्मणोर्वा ॥७१३ ॥

आदनुबन्धाद्धातोर्भाव आदिक्रियायाश्च इड् वा भवति निष्ठायां।

व्रश्चू धातु से परे निष्ठा के तकार को नकार होता है और अन्त को ककार आदेश होता है ॥७०८ ॥

व्रश्चू—छेदना संप्रसारण हुआ है 'संयोगादेर्लोपः' से शकार का लोप होकर वृक्णः वृक्णवान्।

क्षै शुष् और पच् से परे निष्ठा के तकार को क्रम से म, क और व आदेश होता है ॥७०९ ॥

क्षै जै षै—क्षय होना। क्षामः क्षामवान्। शुष्कः पक्वः 'चवर्गस्य किरसवर्णे' सूत्र से चवर्ग को कवर्ग हुआ है।

वन तनु आदि से और इट् निषिद्ध धातु से धुट् अगुण और पंचम अक्षर प्रत्यय के आने पर पंचम अक्षर का लोप हो जाता है और आकार को अत् होता है ॥७१० ॥

वन षण्—संभक्ति। वन् के नकार का लोप होकर वतः, तन् से ततः, हन् से हतः, यम् रम् नम् गम् से यतः रतः नतः गतः गतवान् बना।

जप और वम् से परे निष्ठा के आने पर विकल्प से इट् होता है ॥७११ ॥

जप—मन में जपना, जप्तः जपितः, वम्—वान्तः वमितः।

वि आ से परे श्वस् धातु से निष्ठा के आने पर विकल्प से इट् होता है ॥७१२ ॥

विश्वस्तः विश्वसितः। आश्वस्तः आश्वसितः इत्यादि।

आकारानुबंध धातु से निष्ठा के आने पर भाव और आदि क्रिया में विकल्प से इट् होता है ॥७१३ ॥

शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदां निष्ठासेट् ॥७१४ ॥

शीङादीनां निष्ठा सेट् गुणी भवति । शयितः शयितवान् । पवितः पवितवान् । धृषा प्रागल्भ्ये । धर्षितः धर्षितवान् । प्रक्ष्वेदितः प्रक्ष्विण्णः । प्रस्वेदितः प्रस्विन्नः । प्रमेदितः प्रमिन्नः । प्रमेदितवान् ।

स्फायः स्फीः ॥७१५ ॥

स्फायः स्फीरादेशो भवति निष्ठायां । स्फायी ओप्यायी वृद्धौ । स्फीतः स्फीतवान् ।

भावादिकर्मणोर्वोदुपधात् ॥७१६ ॥

उदुपधाद्धातोर्निष्ठा सेट् गुणी भवति वा भावे आदिक्रियायाञ्च । द्योतितमनेन द्युतितमनेन । प्रद्योतितः प्रद्युतितः ।

यपि चादो जग्धिः ॥७१७ ॥

तकारादौ अगुणे यपि च परे अदेर्जग्धिर्भवति जग्धं अद्यते स्म निष्ठाक्तः ।

द्यतिस्यमास्थां त्यगुणे ॥७१८ ॥

एषां तकारादावगुणे प्रत्यये परे इड् भवति । दो अवखण्डने । दितवान् । अवसितः । माङ् माने । मितः । स्थितः स्थितवान् ।

वा छाशोः ॥७१९ ॥

छाशोस्तकारादावगुणे इड् वा भवति । छो छेदने । अवच्छितः अवच्छातः । शो तनूकरणे निशितः निशातः ।

शीङ् पूङ् धृष् ष्विद् खिद् मिद् धातु को निष्ठा के आने पर इट् सहित को गुण होता है ॥७१४ ॥

शी इ त गुण होकर = शयितः शयितवान् । पवितः, धर्षितः प्रक्ष्वेदितः, धृष्टः, प्रक्ष्विण्णः, प्रस्वेदितः प्रस्विन्नः, प्रमेदितः प्रमिन्नः ।

निष्ठा के आने पर स्फाय को 'स्फी' आदेश होता है ॥७१५ ॥

स्फायी ओप्यायी—वृद्धिगत होना । स्फीतः स्फीतवान् ।

उकार उपधावाली धातु से भाव और आदि क्रिया में निष्ठा के आने पर इट् सहित को गुण विकल्प से होता है ॥७१६ ॥

द्युत् उकार उपधावाली धातु है । द्योतितं द्युतितम् । प्रद्योतितः प्रद्युतितः ।

तकारादि अगुण और यप् प्रत्यय के आने पर अद् को जग्ध होता है ॥७१७ ॥

निष्ठा के तकार को ध होकर जग्धः जग्धवान् ।

दो, षो, माङ् और स्था से तकारादि अगुण प्रत्यय के आने पर इट् होता है ॥७१८ ॥

दितः सितः, मितः स्थितः स्थितवान् ।

छो और शो धातु से तकारादि अगुण विभक्ति के आने पर विकल्प से इट् होता है ॥७१९ ॥

छो—छेदना, अवच्छितः अवच्छातः, शो—पतला करना । निशितः निशातः ।

दधातेर्हिः ॥७२० ॥

दधातेर्हिर्भवति तकारादावगुणे । अभिहितः । अभिहितवान् ।

स्वरान्तादुपसर्गात्तः ॥७२१ ॥

स्वरान्तादुपसर्गात्परस्य दासंज्ञकस्य तो भवति तकारादावगुणे । प्रत्तं प्रत्तवान् । नित्तं नित्तवान् ।

दद्धोऽधः ॥७२२ ॥

अधेटो दासंज्ञकस्य दद्धभवति तकारादावगुणे । दत्तः दत्तवान् । दत्त्वा दत्तिः । धाव् गति शुद्ध्योः । छ्वोः शूठौ ।

अवर्णादूठो वृद्धिः ॥७२३ ॥

अवर्णात्परस्य ऊठो वृद्धिर्भवति । धौतः ।

आदिकर्मणि क्तः कर्त्तरि च ॥७२४ ॥

आदिक्रियाणां कर्त्तरि च क्तो भवेदिति वेदितव्यः । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । सुप्तो भवान् । प्रसुप्तं भवता । प्रशब्दः आदिक्रियाद्योतकः ।

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥७२५ ॥

गत्यर्थेभ्यः अकर्मकेभ्यः श्लिषादिभ्यश्च कर्त्तरि क्तो भवति । गतो ग्रामं भवान् । ग्रामो भवता प्राप्तः । ग्रामं भवान् प्राप्तः । प्राप्तो ग्रामो भवता । गतोऽयं गतमनेन । प्राप्तोऽयं प्राप्तमनेन । अकर्मकात् । शयितो भवान् शयितं भवता । श्लिषादयः सोपसर्गाः सकर्मकाः आश्लिष्टो गुरुं भवान् । आश्लिष्टो गुरुर्भवता

'धा' धातु को 'हि' आदेश हो जाता है ॥७२० ॥

तकारादि अगुण विभक्ति के आने पर । अभिहितः अभिहितवान् ।

स्वरांत उपसर्ग से परे दा संज्ञक धातु को तकारादि अगुण विभक्ति के आने पर 'त्' हो जाता है ॥७२१ ॥

प्र दा त = प्रत्तं प्रत्तवान् नित्तं नित्तवान् ।

धेट् को छोड़कर दा संज्ञक को तकारादि अगुण विभक्ति के आने पर 'इद्' आदेश हो जाता है ॥७२२ ॥

दत्तः दत्तवान् । दत्त्वा, दत्तिः । धाव्—गमन करना शुद्ध होना । धाव् त 'छ्वोः शूठौ पञ्चमे च' ६६१ सूत्र से व् को ऊ होकर—

अवर्ण से परे 'ऊ' को वृद्धि हो जाती है ॥७२३ ॥

धा औ = धौतः धौतवान् ।

आदिक्रिया और कर्ता में 'क्त' प्रत्यय होता है ॥७२४ ॥

प्रकृतः कटं भवान्—आपने चटाई बनाना आरम्भ किया । प्रकृतः कटः भवता—आपने चटाई बनाई । सुप्तः भवान् प्रसुप्तं भवता । यहाँ 'प्र' शब्द आदि क्रिया का द्योतक है ।

गत्यर्थ, अकर्मक और श्लिषादि धातु से कर्ता में 'क्त' प्रत्यय होता है ॥७२५ ॥

गतः प्राप्तः, भवान् ग्रामं प्राप्तः, भवता ग्रामः प्राप्तः अयं गतः, अनेन गतम् । इत्यादि । अकर्मक

श्लिष आलिङ्गने । अधिशयितः खट्वां भवान् । अधिशयिता खट्वा भवता । उपस्थितो गुरुं भवान् । उपस्थितो गुरुर्भवता । उपसितो गुरुं भवान् । उपासितो गुरुर्भवता । वस निवासे । अनृषितो गुरुं भवान् । अनूषितो गुरुर्भवता । अनुजातो बुधं चन्द्रमाः अनुजातो बुधश्चन्द्रमसा । आरूढो वृक्षं कपिः आरूढो वृक्षः कपिना । जूषुजूषु वयोहानौ । अनुजीर्णो वृषलीं भवान् । अनुजीर्णा वृषली भवता ।

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसादनार्थेभ्यः ॥७२६ ॥

ध्रुवस्य भावो ध्रौव्यं प्रत्यवसादनं भोजनं । ध्रौव्यार्थेभ्यः गत्यर्थेभ्यः प्रत्यवसादनार्थेभ्यश्च क्तो भवति अधिकरणे इदमेषामासितं । इदमासितमेभिः । अत्रासितोऽयं । इदमेषां यातं । इदं । तैर्यातं । ग्रामं ते याताः । इदमेषां भुक्तं । इदं तैर्भुक्तं । ओदनं ते भुक्ताः । इदमेषां पीतं । पयस्तैः पीतं । पयस्ते पीताः । पीत पयः ।

व्यनुबन्धमतिबुद्धिपूजार्थेभ्यः क्तः ॥७२७ ॥

मतिरिच्छा बुद्धिर्ज्ञानं पूजा सत्कारः । व्यनुबन्धमतिबुद्धिपूजार्थेभ्यः क्तो भवति वर्तमानकाले भावे कर्मणि कर्त्तरि च यथासम्भवं । ञिमिदा स्नेहने । मिन्नः । स्विन्नः । क्ष्विण्णः । राज्ञां मतः । सतामिष्टः बुद्धौ राज्ञां बुद्धः । राज्ञां ज्ञातः । पूज पूजायां । राज्ञां पूजितः । सतामर्चितः ।

नपुंसके भावे क्तः ॥७२८ ॥

भावे क्तो भवति नपुंसके । उपासितमत्र । सुजल्पितं । कुमारस्य शयितं । आस् उपवेशने । आसितं पुत्रस्य एधित ।

युट् च ॥७२९ ॥

भावे नपुंसके युट् च भवति । भवनं । पचनं । यजनं । वसनं । देवनं । तोदनं । रोदनं । करणं । मननं । इत्यादि सर्वमवगन्तव्यं ।

से—शयितः भवान्, शयितं भवता । श्लिषादि धातु उपसर्ग सहित सकर्मक कहलाती हैं ।-आश्लिष्टः गुरुं भवान्, आश्लिष्टः गुरुः भवता इत्यादि ।

ध्रौव्यार्थक, गत्यर्थक और भोजनार्थक प्रत्यवसादनार्थक धातु से अधिकरण अर्थ में 'क्त' प्रत्यय होता है ॥७२६ ॥

ध्रुव के भाव को ध्रौव्य कहते हैं । भोजन को प्रत्यवसादन कहते हैं । आस् धातु से—आसितं, इदं एषां आसितं इदं आसितं एभिः अर्थात् यह यहाँ बैठा है । इत्यादि ।

ञि अनुबंधधातु से, मतिबुद्धि पूजार्थ वाले धातु से 'क्त' प्रत्यय होता है ॥७२७ ॥

